तां २१.३.७ तां वा एतां शबलीं समामनन्ति, इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतिर् अदिति सरस्वति महि विश्रुति, एता ते अघ्न्ये नामानि। देवेभ्यो मा सुकृतं कृतात्। १०.३.४९

तां २०.१५.१५

शत ४.५.८.१० तार्ष्यं यजमानः परिधत्ते, दर्भमयं पत्नी। १०.४.१३ (महाव्रते) तार्ष्यं यजमानं परिधापयति दर्भमयं पत्नीम्।

तैब्रा १.३.७.१ तावब्रूतां अग्नीषोमौ 'आज्यस्यै वनौ उपांशु पौर्णमास्यां यजन्।' २.२.३,१०

तैसं २.५.२ ताभ्यां एतं अग्नीषोमीयं एकादशकपालं पौर्णमासे प्रायच्छत्। (उपांशु, आज्यस्य।) आज्यहविर् उपांशुयाजः पौर्णमास्यां एव, वैष्णवोऽग्नीषोमीयः प्राजापत्यो वा।

आप २.१८.२३

तां ७.८.१ तासां वायुः पृष्ठे व्यवर्तत। १.४.३ तं.

पा १.४.१०१ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। ३.४.१३ तं.

पा ३.४.७८ तिबादयः-तिप् तस् झि, सिप् थस् थ, मिप् वस् मस्। त आतां झ, थास् आथां ध्वं, इट् वहि महिङ्। ३.४.१३ तं.

तैब्रा ३.२.१०.१ तिर्यञ्चं स्फ्यं धारयेद्, यद् अन्वञ्चं धारयेद्, वज्रो वै स्फ्यो, वज्रेण अध्वर्युं क्षिण्वीत। ३.८.२३

आप ७.१४.६ तिष्ठन्तं पशुं प्रयजन्ति। ५.१.२३; १०.४.१०; १२.१.२; १२.२.१५ पशुकाः प्रयाजास्तिष्ठति पशौ क्रियमाणाः सन्तः।

तैसं २.५.११ तिष्ठन् अन्वाह। (आसीनो यजति)। ३.६.२२ तं.

आप ४.१९.१० तिष्ठन् याज्यां अन्वाह, आसीनः पुरोनुवाक्यां अन्वाह। १०.४.४१

तिष्ठन् पुरोनुवाक्यां अन्वाह, आसिनो याज्या। उभे तिष्ठन् आसीनो वा।

तैसं २.३.९ तिस्र आहुतीर् जुहोति। (इति संक्षेपः) ३.६.७

तैसं ६.२.५ तिस्र एव साह्नस्य उपसदो द्वादशाहीनस्य। ३.३.१५,१६; ३.४.१६

जैब्रा २.१२७ तिसृषु माध्यन्दिनः पवमानः। १०.५.१० (एकत्रिके तां १६.१६)

तां २०.१२.२ तिस्रः संस्तुतानां विराजं अतिरिच्यन्ते। २.४.८

तैब्रा १.५.९.४ तिस्रः सामिधेनीर् अन्वाह। १०.५.१

तैसं ५.६.७ तिस्रो दीक्षाः। ३.७.११; ६.५.२८

आप १.१३.५ तिस्रो दोहयित्वा 'बहुदुग्धीन्द्राय देवेभ्यो हव्यं आप्यायतां पुनः। वत्सेभ्यो मनुष्येभ्यः पुनर् दोहाय कल्प्यतां' इति त्रिर् वाचं विसृज्य तूष्णीं उत्तरा दोहयित्वा।

तिस्रोऽनुष्टुभश् चतस्रो गायत्रीः कुर्वन्ति। तैसं ५.४.१२ शत १३.३.३.१

तिस्रो वा दीक्षास्तिस्र उपसदः सप्तमीं प्रसुतः। ६.५.२८ न्यामा. सप्तम्यां रात्रौ सोमः।

तैसं ६.१.१ तीर्थं एव हि सजातानां भवति। ३.४.१४ तं.

तीर्थं वै प्रातःसवनं, यत् प्रातःसवने पशव आलभ्यन्ते, तीर्थं एव एनान् आलभते सयोनित्वाय अथो वपानां अमिश्रतत्वाय। ४.१.३५

तैसं १.१.१ तीर्थे स्नाति तीर्थं एव हि सजातानां भवति । ३.४.१४

तैसं १.४.४३ तुथो वो विश्ववेदा वि भजतु । (दक्षिणाः) १०.३.५२

पा ३.३.१० तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् । ३.१.२४ तं.

ऋ १.१६४.४५ तुरीयं वाचो मनुष्या वदन्ति । १.३.२४ तं.

ऋ ८.१७.८ तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते । ९.१.६,९

तैसं ५.२.४ तुषपक्वा भवन्ति (इष्टकाः) । ७.१.७

शत ७.२.१.८ तूपरसृगयोः प्रत्येकं षड्विंशतित्वाद् अश्वस्य च चतुस्त्रिंशत्वात् षडशीति वङ्क्रयः । ९.४.१८-२१ न्यामा.

तैब्रा १.१.६.९ तूष्णीं होतव्यम् । ५.३.२१ तं. तूष्णीं एव होतव्यम् ।

तां ११.३.८ तृच उत्तमः पर्यासः । ५.३.७,१० (पर्यासः = अन्तः)

पा. ६.१.३७ वा तृचः । त्रि + ऋवः । ऋचि, त्रेः उत्तरपदादिलोपः त् र् इ = त् ऋच् =

पा ५.४.७४ तृच् + असमासान्तः ।

तृचात्मकेषु सूक्तेषु या प्रथमा योनिभूता छन्दोग्रन्थस्य 'योनिग्रन्थः' इति अध्यापकसमाख्या । इतरस्य तु तृचसंघरूपस्य उपरितनयोर् ऋचोर् नामधेयेन 'उत्तरा' इति समाख्या । ९.२.२३-२४ न्यामा.

पा २.२.१५,८ तृजकाभ्यां कर्तरि षष्ठी न समस्यते । १.३.२४ तं.

आप ७.१९.३ तृणमुष्टिना पर्णमुष्टिना वापिधाय आवपाहोमाद् उदासिष्यते । ३.६.२४ मुष्टिना शमिता वपोद्धरणं अपिधाय आस्ते आवपाहोमात् ।

तैसं ३.२.५ तृतीयसवनत्वात् 'जगतीछन्दसः' इति प्राप्ते 'अनुष्टुप्छंदसः' इति षोडशिनि

तां १.६.१ भक्षमन्त्रं नमति ।

तृतीयसवनस्य जगतीछन्दसः । ३.२.३९

शत ५.१.२.१,३ तृतीयसवने आग्रयणाद् गृह्णाति, षोडशिनम् । १०.५.४४

मैसं ४.६.७ तृतीयसवने गृह्यास्तत् सर्वेषु सवनेषु गृह्णाति, न पूर्वे सवने आर्तिं नीते । १०.५.४४

तैसं ३.२.२ तृतीयसवने अंशुर् एको अभिपूयते । ३.३.३१ उपांशु हुत्वा, उपांशुपात्रे अंशुमद् अपास्य तं तृतीयसवने अपिसृज्य अभिषुणुयात् ।

पा २.३.२ तृतीयास्थाने द्वितीया । २.१.१२ 'सकृभिर् जुहोति' स्थाने 'सकृत् जुहोति' ।

पा १.४.४२ तृतीया, साधकतमे हि सा भवति । ६.४.३६ (साधकतमं हि करणम्, करणे तृतीया । पा. २.३.१८)

तैसं २.५.४ तृप्त एव एनं इन्द्रः प्रजया पशुभिस्तर्पयति । ८.१.३४;९.१.८

तैसं ६.२.५ तेजः संस्तवो ब्राह्मणस्य । ६.६.१४ तेजो वै ब्राह्मणः ।

मनुस्मृ ३.९३ तेजोमूर्तिः पथर्जुना । ३.१.१३ तं. एवं यः सर्वभूतानि, ब्राह्मणो नित्यमर्चति । स गच्छति परमं स्थानं, तेजोमूर्तिः पथर्जुना ॥ (ऋजुना पथा)

ऐ ८.२० तेजो वै घृतम् । १.४.२४ तेजो वा आज्यं । तेजो वै (वा एतत् पशूनां यद्) घृतम् ।

मैसं ४.७.६ तेजो वै माध्यन्दिनं सवनं, तेजसा एव वज्रं निर्मिमीते । १०.४.५५ ओजो

पा ५.१.३७ तेन क्रीतम् । २.२.१० तं. तेन क्रीते अर्थे ठन् यत् आदि प्रत्ययः ।

पा २.२.२८ तेन तुल्ययोगे सदृशशब्दः । ४.२.१० तेन सह इति तुल्ययोगे ।

तां ६.७.१४ तेन पुनर् यजेत । ६.५.५२ अदक्षिणः स यज्ञक्रतुः संस्थानः ।

पा ४.३.१०१ तेन प्रोक्तम् । १.२.२७-३२ न्यामा. तेन प्रोक्तं इत्यर्थे अण् माथुरी वृत्तिः छः । पाणिनीयम् ।

शत २.५.३.२३ तेन हि अन्नं क्रियते । १.२.२९ शूर्पेण

शत १.२.३.५ तेनान्वाहार्यम् आनमन्ति (ऋत्विजं) । ३.४.१७ एतां दर्शपूर्णमासयोर् दक्षिणां अकल्पयन् यद् अन्वाहार्यम् ।

मैसं ४.८.५ तेनावभृथं यन्ति । ४.२.२१ यद् यत् सोमलिप्तं द्रव्यं – ऋजीषः अभिषवण-फलकं आदि तेन ।

तैसं ७.४.८ तेनैकाष्टकां न छम्बट् कुर्वन्ति । ६.५.३५ तेन एकाष्टकां

मैसं १.५.६ तेनैनं पुनर्नवं करोति तत् न सूक्ष्यम् । ३.६.१३ तेन एनं

तैसं ४.५.११ तेभ्यो दश प्राचीः (समाना गीतिः इति लाघवात् त्रिषु पादेषु न गीयते यथा तेभ्यो दश प्राचीर् वर्षमिषवस् 'तेभ्यो दश प्राचीर्' दश दक्षिणा दश प्र-प्रतीचीर् दशोदीचीर् दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते, यं द्विष्मो, यश्च नो द्वेष्टि तं वो जम्भे दधामि । ९.२.१८ तं.

आश्व ९.१.४ तेषां ये प्रथमं यजेरन् तेषां गौर् अतिरात्रः, ये द्वितीयं तेषां आयुः ।

तां ४.१.९ (अभ्यासे) ११.१.२१ ज्योतिष्टोमं अग्निष्टोमं रथन्तरसामानं गामुक्थ्यं,

जैब्रा २.३७५ बृहत्सामानं आयुषमुक्थ्यम् ।

तैसं ७.४.८ तेषामेकाष्टकायां क्रयः संपद्यते तेन एकाष्टकां न छम्बट् कुर्वन्ति । ६.५.३२,३५

तां २१.१४.१० (तेषां च सुत्यासु प्रतिप्रसवः) त्रींस्त्रीन् उक्षणः एकैकस्मिन् अहनि आलभन्ते, पञ्चोत्तमे । ११.२.५४ अन्वहं

पाम १.१.१.२४ तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः । १.३.२४ तं.

आप १९.१.१ तोक्मशब्देन अङ्कुरिता यवा उच्यन्ते । तदकुङ्कुररूपं बालतृणं शष्पं इति उच्यते । ८.२.४

शत १.६.३.१९ तौ न सौम्ये अध्वरे न पशौ करोति । (आज्यभागौ) १०.१.१६; १०.८.५; १२.१.८

शत १.६.३.१९ तौ ह ऊचतुः किं आवयोस्ततः स्यात् इति । यस्यै कस्यै च देवतायै हविर् निर्वापात् तद् वां पुरस्तात् आज्यस्य यजात् इति । तस्माद् यस्यै कस्यै च देवतायै हविर् निर्वपन्ति तत्पुरस्तात् आज्यभागौ अग्नीषोमाभ्यां यजन्ति । तद्व सौम्ये अध्वरे, न पशौ, यस्यै कस्यै च देवतायै हविर् निर्वपात् इति हि अब्रुवन् । १०.१.१६

पा ६.४.१४१ त्मना । १.१.३०-३५ न्यामा. मन्त्रेषु आङि आदेर् आत्मनो लोपः ।

महाभरते १.१०७.३८ त्यजेदेकं कुलस्यार्थे । १.२.७ तं.

तैसं १.५.१० त्रयस्त्रिंशत् तन्तवो ये वितत्निरे, य इमं यज्ञं स्वधया ददन्ते । तेषां छिन्नं प्रत्येतद् दधामि, स्वाहा घर्मो देवाँ अप्येतु ॥ ६.४.१६ न्यामा.

तैसं ६.२.१ त्रयस्त्रिकपालास्त्रिवृतः स्तोमेन संमिताः । नवप्रकृतिर् अग्निष्टोमः । १०.६.२३ त्रिवृदग्निष्टोमः

तैसं ७.२.१ त्रयस्त्रिंशेन प्रतिष्ठाकामं याजयेत । ५.१.१३; ५.३.७; १०.४.२०; १०.५.१५

तां २३.१.५ त्रयोदशरात्रं ऋद्धिकामा उपेयुः । ८.२.२७ उपेयुषोदना सत्रलिङ्गम् ।

शत ११.१.६.२५-२८ त्रयोदशाहुतयोऽमावास्यायां हूयन्ते । २.२.८;४.१.१०; ४.४.३८;१०.४.४६, ५८;११.१.१७, ३१,३४
पंचप्रयाजा द्वौ आज्यभागौ स्विष्टकृत् त्रयोऽनुयाजाः । प्रधानाहुतिद्वयम् (पत्नी संयाजा, इडा च)

शांब्रा. ३.८ त्रयोऽनुयाजाः सन्ति । १०.४.७ अथ त्रीन् अनुयाजान् यजति ।

शत ११.५.८.३ त्रयो वेदा असृज्यन्त – अग्नेर् ऋग्वेदः, वायोर् यजुर्वेदः, आदित्यात् सामवेदः । ३.३.२ तं.

तैसं २.५.४ त्रयो ह वै गतश्रियः = (प्राप्तश्रियः) ब्राह्मणः शुश्रुवान्, ग्रामणी, राजन्यः । ९.४.२९-३० न्यामा. और्वो गोतमो भारद्वाजः– इति कल्पकाराः

तैब्रा ३.११ त्रिछन्दा आवापो माध्यन्दिनः पवमानः पञ्चसामा । ९.२.२५/२;१०.५ ७-९ न्यामा. गायत्रछन्दस्कं साम ६७२-७४ । बृहतीछन्दस्कं साम ६७५-७६ त्रिष्टुप्छन्दस्कं साम ६७७-७९.

तैसं ७.१.३ त्रिणवेन ओजस्कामं याजयेत् । ५.३.७; १०.४.२०; १०.५.१५ तेजस्कामं । ५.१ १३
त्रिवृद् बहिष्पवमाने त्रयस्तृचाः तत्र षट्तृचा आगमयितव्या । ५.३.७-१२ न्यामा.

आप २.९.२ त्रिधातु वा पंचधातु वा वेदिं स्तृणाति । ३.८.३२ बर्हिषा वेदिं स्तृणाति त्रिधातु वा पंचधातु वा ।

तैसं २.५.१० त्रिंशतं च अनुब्रूयात् । अन्नकामस्य (साग्निधेनीर् अनुब्रूयात् ।) १०.५.२७ (एकविंशतिं)

शत ११.१.२.१३ त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत यदि दाक्षायणयाजी स्यात् । अथो अपि पञ्चदशैव वर्षाणि यजेत अत्र ह्येव संपद् संपद्यते । द्वे हि पौर्णमास्यौ यजेत द्वे अमावास्ये, अत्र ह्येव खलु सा संपद् भवति । २.३.९

काठकसं ३६.२ त्रिंशदाहुतयो हूयेरन् वाजिनो यजन्ति, आहुतीनां संपत्यै त्रिंशत्त्वाय । ७.१.१९

तैब्रा १.६.३.१० त्रिंशत्पूरणं च केषांचित् (तैत्तिरीयाणां–नवप्रयाजा, नवानुयाजा, अष्टौ हवींषि, द्वौ आघारौ, द्वौ आज्यभागौ त्रिंशत् संपद्यन्ते । ७.१.१९

तैसं ६.३.७ त्रिःपरिधीन् संमार्ष्टि ११.१.३७ परिधीन् संमार्ष्टि त्रिः त्रिः संमार्ष्टि ।

तैसं २.५.७ त्रिः प्रथमां अन्वाह, त्रिर् उत्तमाम् ताः पञ्चदश संपद्यन्ते । ९.१.३३; १०.५. २७, ३० एकादशसामिधेन्यः समाख्याताः (तैब्रा ३.५.२) तत्र प्रथमा-प्र वो वाजा अभिद्यवः ... त्रिः ३+९+३ त्रिः उत्तमा-आजुह्वोत दुवस्यत...

तैब्रा ३.२.५.५ त्रिः प्रोक्षति वेदिम् । तस्य मन्त्रः-वेदिरसि बर्हिषे त्वा इति सकृद् उच्चारितेन मन्त्रेण त्रिः प्रोक्षति । ११.४.४६

आप १०.६.२९ त्रिरभ्यङ्क्ते । ५.२.५

आप १९.१.१ त्रिरात्रं संहता वसन्ति । ८.२.४ तिस्रः संसृष्टा वसन्ति । तैब्रा १.८.५.४

तां २१.५.२ त्रिरात्रेण यजेत । १०.५.१

आप १.१९.७ त्रिराह्नयति (हविष्कृद् एहीति +)। ३.२.६
तैब्रा ३.२.५.८ त्रिराह्नयति त्रिः सत्या हि देवाः। ३.२.५ न्यामा. त्रिर् ह्वयति।
तैसं ७.३.२ त्रिवृच्छन्दश्च द्वादशाहे दिवसे (द्वादशाहे) न द्वादशरात्रे। ६.७.३९
मनुस्मृ २.४३ त्रिवृता ग्रन्थिना केचित्, त्रिभिः पञ्चभिरेव वा। मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः॥ १.३.९ तं.
आप १२.१८ १२ त्रिवृता यूपं परिवीय सवनीयं पशुं उपाकरोति। ३.६.२१; ११.३.४,७
तैब्रा १.५.११ त्रिवृत् पञ्चदश सप्तदशैकविंशानि अस्य ज्योतींषि। २.२.२२ त्रिवृदादीनि...
तां २०.२.३ 'त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंशः, त्रिणवः, त्रयस्त्रिंशः' इति एतैः स्तोमयुक्तानि षडहानि षडहः पृष्ठ्यः। १०.६.२७-२८ न्यामा.
तैसं ७.४.१२ त्रिवृत्स्तोमः। १०.६.१५
तां १७.५ भाष्ये त्रिवृद् अग्निष्टुत्। २.२.२७ त्रिवृदग्निष्टुतो ब्रह्महत्यानिर्हरणार्थम्।
तां १७.६.१,२ त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यासु एकविंशं अग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत इति। एतस्यैव रेवतीषु वारवन्तीयं अग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत। २.२.२७
तां २३.८.१ त्रिवृदग्निष्टुदग्निष्टोमस्त्रिरात्रो दशरात्र उदयनीयोऽतिरात्रः। पञ्चदशरात्रः भूतिकामं इच्छन्तः उपेयुः। कुण्डपायिनां अयनं उपेयुः। उपेयिवोदनाद् उभे रात्रे। तैसं ७.३.७ य एतद् उपयन्ति। तां २५.४.३
तैसं ७.१.१० त्रिवृदग्निष्टोमः। १०.६.१५,१७,२२,२३
तैब्रा १.५.११.१ त्रिवृदादीनि अस्य ज्योतींषि। २.२.२२
तां ६.५.१-१२ साम ६५१-५९ त्रिवृद् बहिष्पवमानं, पञ्चदशानि आज्यानि सप्तदश पृष्ठानि।
भर ७.८.१६ त्रिवृद् भवति, दर्भमयी भवति, प्रपिष्टानां कर्तव्या (रशना)। ३.६.३१
वाराहगृ ४.२४ त्रिशिखाः केचित्। १.३.१५ दक्षिणतः कपर्दो वसिष्ठानां उभयतोऽत्रिभार्गवकश्यपानाम्।
तैब्रा १.१.५.१ त्रीणि हवींषि निर्वपति ३.१.२२ न्यामा.
जैब्रा १.३११ त्रीणि ह वै यज्ञस्य उदरानि-गायत्री, बृहती, अनुष्टुप्, अत्र ह्येव आवपन्ति अत एव उदवयन्ति। ५.३.१४; १०.४.२१
वाराह ३.२.२.३९ त्रीण्यनीकानि अग्राणि – ऐन्द्रवायवाग्रं, शुक्राग्रं, आग्रयणाग्रम्। १०.५.८३-८७ न्यामा.
तैसं ५.५.१ त्रीण्येतानि हवींषि भवन्ति, त्रय इमे लोकाः, एषां लोकानां आरोहाय। ४.४.१२
तैब्रा ३.७.४.९ त्रीन् परिधीन्, तिस्रः समिधः इति मन्त्राम्। ९.१.११
तैसं २.४.१ त्रीन् ललामान्। ४.१.१२,१६
आप २.१६.६ त्रीन् वृणीते। ६.१.४३ 'यथा आङ्गिरसबार्हस्पत्यभारद्वाजगोत्रोऽहं' य एवं त्रीन् गोत्रर्षीन् उच्चारयति।
तैसं २.५.५ त्रेधा तण्डुलान् विभजेत्। ६.५.३,११,१९; ९.४.४१
मैसं १.१०.७ त्रेधा संनद्ध इध्मः। ७.१.१७
तैब्रा १.६.३.१ त्रेधा संनद्धं बर्हिर् भवति। ७.१.१७
सत्या ४.२.२४ त्रैधातवीया दीक्षणीया भवति (अश्वमेधे)। ९ १.३/२

शांश्रा १.१	त्रैधातव्यायां सप्तदश सामिधेनीर् अनुब्रूयात् । १०.८.१७ सप्तदश सामिधेनिकाः इष्टिपशुबन्धाः ।
तां १२.१०.३	त्रैशोकं नाम साम द्वादशाहे चतुर्थे अहनि अतिजगत्यां उत्पन्नं गायेत । ९.२.२१
त्रैशोकं साम ९३०	विश्वाः पृतना अभिभूतरं नरः सजूस्तत्रक्षुरिन्द्रं जजनुश्च राजसे । क्रत्वे
ऋ ८.९७.१०	वरे स्थेमन्या मुरीमुतोग्रं, ओजिष्ठं तरस तरस्विनम् ॥
साम ९३१	नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे । सुदीतयो वो अद्रुहोऽपि कर्णे
ऋ ८.९१.१२	तरस्विनः समृक्वभिः ॥
साम ९३२	समुरेभासो अस्वरन्निन्द्रं सोमस्य पीतये । स्वःपतिर् यदी वृधे धृतव्रतो
ऋ ८.९७.११	ह्योजसा समूतिभिः ॥
पाम १.२.३१	त्रैस्वर्यम् । २.१.३२ उदात्तानुदात्तस्वरिताः ।
पाम १.२.३१ वा	त्रैस्वर्येण अधीयन्ते केचित् । ९.१.३०/३ कैश्चिद् उदात्तगुणैः कैश्चिद् अनुदात्तगुणैः कैश्चित् स्वरितगुणैः अधीयन्ते ।
आप ७.२२.६	त्र्यङ्गैः स्विष्टकृतं यजति । अनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृतं यजेत । १०.७.१०,११ दोष्णः पूर्वार्धात् अग्नये स्विष्टकृतेऽवद्यति, गुदस्य मध्यतः, श्रोण्या-ऊधनतः । मैसं ३.१०.३
तैसं ७.२.७	त्र्यनीकानि अग्राणि बहूनि सन्ति । १०.५.८३-८५ न्यामा. ऐन्द्रवायवाग्राः मैत्रावरुणाग्राः, आश्विनाग्राः, शुक्राग्राः, मन्थ्यग्राः, आग्रयणाग्राः, उक्थ्याग्राः ।
भर ८.९.७	त्र्यम्बकेषु पुरोडाशाः करम्भपात्राणि तण्डुलाः । ८.४.२५ ऐष्टिके शूर्पे उपस्तीर्य करम्भपात्राणि ओप्य अभिघार्य शीर्षन्नधि निधाय पुरस्तात् प्रत्यङ् तिष्ठन् दक्षिणेऽग्नौ यजमानः सहपत्न्या करम्भपात्राणि जुहोति ।
मनुस्मृ ११.२११	त्र्यहं नाश्नाति । ३.८.९
आप १.५.७.८	त्वक्सहितत्वशयानत्वादयो परिधेः धर्माः । १२.२.२७,२९ आर्द्रः शुष्कः वा सत्वक्कः, स्थविष्ठो मध्यमोऽणीयान् द्राघीयान् दक्षिणार्ध्यो अणिष्ठः हसिष्ठ उत्तरार्ध्यः । शयाः परिधयः । सत्या ७.४.३
भर १.१६.६	त्वग्बिलया मूलदण्ड्या दर्व्या जुहोति । ८.४.६ त्वग्बिला मूलदण्डा दर्वी ।
पा ५.१.११९	त्वतलौ । ३.४.१३ तं. तस्य भावस्त्वतलौ-त्व-त्वं-क्लीबं, तल् तास्त्रियाम् ।
ऋ १.१६९.४	त्वं तू न इन्द्र तं रयिं दाः । १२.४९ तं. (+ ओजिष्ठया दक्षिणयेव रातिम् । स्तुतश्च यास्ते चकनन्त वायोः, स्तनं न मध्वः पीपयन्त वाजैः ॥)
तैसं १.१.१४;८.११.१	त्वं अग्ने व्रतपा असि देव आ मर्त्येषु आ । त्वं यज्ञेष्वीड्यः ॥ ११.४.५०
गर्गसंहिता-द्वारका-	त्वमेव माता पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या
खण्ड १२.१.८	द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ॥ १.२.३९
तैब्रा ३.५.१० १	त्वं सूक्तवाग् असि । ३.२.११-१४ न्यामा.
तैसं ४.३.१३	त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रोऽसि क्रतुः ॥ २.२.३-८ न्यामा.
तैब्रा ३.६.१०.१	त्वं ह्यग्ने प्रथमो मनोता । अस्या धियो अभवो दस्म होता । त्वं सीं वृषन्नकृणोर्
ऋ ६.१.१	दुष्टरीतु । सहो विश्वस्मै सहसे सहध्यै ॥ १०.४.४२

साम ८०९
ऋ ६.४६.१ त्वामिद्धि हवामहे सातौ वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

साम ८१०
ऋ ६.४६.२ स त्वं नश्चित्र वज्रहस्त धृष्णुया महस्तवानो अद्रिवः । गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ पूर्वा बृहती, उत्तरा पङ्क्तिः, तयोः प्रगाथः-काकुभः प्रगाथः । ९.२.२५/१

तैसं ६.६.६ त्वाष्ट्रं पात्नीवतं विधाय इदं उच्यते-यत् पर्यग्निकृतं पात्नीवतं उत्सृजन्ति । २.३.१९ (पुनरायनाय-आश्व ६.१४.११)

काठकसं ३४.२ त्वाष्ट्रं पात्नीवतं आलभेत । २.३.१९ तं. (गार्हपत्ये त्वाष्ट्रेण पशुना चरन्ति । त्वाष्ट्रं बहुरूपं आलभेत ।)

तैसं २.५.१ त्वाष्ट्रवधनिमित्तेन्द्रगतब्रह्महत्यां तुरीयविभागप्रतिग्रहप्रस्तावनागतरजस्वलानां व्रतानां, भूमिशयनं, अस्नानं, अमांसभक्षणं, अनभ्यङ्गानञ्जनं, अविलेखनं, अकर्तनं, अदन्तधावनं, अनखच्छेदनं, अरज्जुपंसर्जनादीनां त्रिरात्रविषयाणां प्रकरणातिरिक्तस्त्रीधर्मावधारणम् । १.३.९ तं.

मैसं ३.८.२ त्सरा वा एषा यज्ञस्य, तस्माद् यत् किंचित् प्राचीनं अग्नीषोमीयात् तेन उपांशु चरन्ति । ९.१.२० (त्सरा नाम छद्मगतिः – शबरस्वामी)

तैआ २.११ दक्षिणत उपनीय उपविश्य हस्तौ अवनिज्य त्रिः आचम्य द्विः परिमृज्य दर्भाणां महद् उपस्तीर्य उपस्थं कृत्वा प्राङ्मुख उपविश्य स्वाध्यायं अधीयीत । १.३.७ तं.

मैसं १.४.६ दक्षिणतः संपरिहर्तव्याः । ९.१.९ यद् अन्वाहार्यं आहरति तां एव तेन प्रीणाति, दक्षिणतः सद्भ्य परिहर्तवा आह, दक्षिणावता एव यज्ञेन यजता । आहुतिभिरेव देवान् हुत्वादः प्रीणाति, ते अस्मै प्रीताः इषं ऊर्जं नियच्छन्ति ॥

शत ३.८.३.१० दक्षिणतो निधाय प्रतिप्रस्थाता अवद्यति (स हि अवदानं करोति +) १०.७.२३

आप १.१५.५ दक्षिणतो ब्रह्मयजमानौ आसाते कर्मणः क्रियमाणस्य । १.४.२३

तैआ १.६.५.१ दक्षिणवैहारिकस्य मारुत्याख्यस्य (विध्यतिदेशो भवति) । ७.१.२१

आप ३.४.१.४ दक्षिणसद्भ्य उपहर्तव्या इति संप्रेष्यति । ये ब्राह्मणा उत्तरतः तान् यजमान आह 'दक्षिणं एत' इति तेभ्यो अन्वाहार्यं ददाति । 'ब्राह्मणाः अयं वः ओदनः, प्रतिगृह्णीत, उत्तरतः परीत ।' इति सं प्रेष्यति । १०.३.३५ न्यामा.

तैसं १.३.२. दक्षिणस्य हविर्धानस्य अधस्तात् चत्वार उपरवाः प्रादेशमुखाः प्रादेशान्तरालाः । तत्र हस्तौ प्रवेश्य ।

आप ११.११.१-६ अध्वर्युर् यजमानं आह 'किमत्र' इति, स आह 'भद्रं' इति, 'तत्रौ सह' इति अध्वर्युः ॥ ३.८.२९

तैआ १.१.१०.५ दक्षिणाग्नौ अन्वाहार्यश्रपणादि करोति । ११.३.२

मैसं ४.८.३ दक्षिणा च ऋत्विग्भ्यो दीयते । १२.४.४७

आपध २४.२.१५ दक्षिणाचारेण कर्तव्यम् । (यज्ञोपवीतिना कर्तव्यं +) । १.३.५ यज्ञोपवीति प्रदक्षिणं दैवानि कर्माणि करोति ।

आप ३.१.७ दक्षिणार्धात् मध्यात् च अवद्यति । १०.२.३०

तां १८.३.२ तैसं ६.१.४ दक्षिणाः सोमस्य । ३.७.११

आप ८.१०.१० दक्षिणे अग्नौ पत्न्याः व्रतस्य श्रपणं आम्नातं, यदा आमयदोषात् मांसं व्रतकार्ये उपादीयेत तदा तत् न दक्षिणाग्नौ श्रपयितव्यं इति तस्य दक्षिणाग्नौ व्रत-श्रपणवाक्यस्य अयं शेषः–'अन्यत्र मांसात्'। १२.२.७

तां २५.१३.२ दक्षिणेन तीरेण सरस्वत्याः, आग्नेयेन अष्टाकपालेन। २.३.२५ तं. स य आग्नेयेन अष्टाकपालेन दक्षिणेन तीरेण दशद्वत्याः शम्या परासीयात्।

शत १२.५.२.७ दक्षिणे पाणौ जुहूं आसादयति। ११.३.४६ जुहूं घृतपूर्णां + दक्षिणे पाणौ।

मैसं २.६.१३ दण्डउपानहौ शुल्कादतिः, सा हि दक्षिणा। १०.२.२२

तैसं ६.१.४ द डी प्रैषान् अन्वाह। ३.१.१२; ४.२.१८ मुशली अन्वाह। ४.२.१८ मैत्रावरुणाय दण्डं प्रयच्छति (तैसं ६.१.४) ४.२.१७ जैसू–अर्थकर्म वा कर्तृसंयोगात् इति सूत्रात् मैत्रावरुणो दण्डी, स एव च मुशली–मुशल-शब्दश्च दण्डे प्रसिद्धः।

तैसं ६.१.४ दण्डेन दीक्षयति। ५.३.२९,३० दीक्षितदण्डं प्रयच्छति, औदुम्बरो (दण्डो) भवति, मुखेन सम्मितो भवति।

तैसं ३.५.१ दतो धावते। ३.८.३;४.३.१

ऋ १०.८५.३३ दत्वाय–सुमंगलीरियं वधूर्, इमां समेत पश्यत। सौभाग्यमस्यै दत्वायाथास्तं वि परेतन। १.३.२४ तं.

पा ७.१.४७ दत्वाय। १.३.२४ तं. क्त्वो यक् छन्दसि।

तैसं २.५.५ दधनि चरुं, शृते चरुम्। ६.५.४,२१; ९.४.४२

पाम १.१.७.३ वा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिण्याय। ३.३.१४ तं.

काठकसं ११.२ दधि मधु पयो घृतं धानास्तण्डुला उदकं तत्संसृष्टं प्राजापत्यम्। १.४.३; ८.१.४०; ९४.३२; १०.२.७० दधिमधुघृतधानास्तण्डुलास्तत्संसृष्टं प्राजापत्यं पञ्चैतानि संसृष्टानि, द्वे इतरे (पय उदकम्)

तैसं २.५.३ दध्नः पूर्वं अवदेयम्। ५.४.२,३ पूर्वस्य

मैसं ४.७.७ दध्ना जुहोति। २.२.१३,१६,२३,२४; ४.३.५,६; ७.३.४

तैसं ५.४.५ दध्ना मधुमिश्रेण अग्निं प्रोक्षति। ९.१.२६ दध्ना मधुसंश्लिष्टेन व्यवोक्षति।

तैब्रा २.१.५.६ दध्नेन्द्रियकामस्य जुहुयात् (अग्निहोत्रं)। २.२.२५,२६; २.३.११; ४.३.५

पा ६.१.७७ दध्यत्र (दधि + अत्र – दध् इय अत्र) १.१.१०,१६ इको यण् अचि।

तैसं १.६.२ दब्धिरसि अदब्धो भूयासम्। ३.३.१२

माश्रौ १.४.२.४ दब्धिर् नामाऽसि। ३.३.१२

पा ६.४.१२० दम्भेर् एत्वम्। १.३.२४ तं. अत एकहल्मध्ये अनादेशात् 'ए' लिटि। देभुः देभतु

पा ६.४.१२० वा दम्भेर् एत्वं वक्तव्यम्। १.३.२४ तं.

ऐब्रा ३५.६ दर्भतरुणकेन उपघातं जुहोति। २.१.१ तं.

तैब्रा २.७.९.५ दर्भपिञ्जूलैर् अवज्वलयति। १०.१.५७

मैसं १.११.८ शंत ३.६.४.१ दर्भमयं परिदधाति। ६.८.२८ न्यामा.

मैसं १.११.८ दर्भमयं वासो भवति। पवित्रत्वाय। ६.८.२८

तैब्रा ३.८.२ दर्भमयी रशना भवति। ३.६.३१ न्यामा.

आप ७.११.२ दर्भमय्यौ रशने भवतः। द्विगुणा, द्वियामा, त्रिगुणा, त्रियामा।

भर १३.८.३.४ दर्भाभ्यां स्तोत्रं उपाकरोति। १०.४.१/३ उपावर्तध्वं इति + दर्भाभ्यां

काठकसं ३१.१४ दर्भाभ्यां स्तृणीत हरितैः – स्तृणीत बर्हिः परिधत्त वेदिं च मि मा हिंसीर् अमुया शयानां। दर्भैः स्तृणीत हरितैः सुवर्णैः निष्का एते यजमानस्य सन्तु। ९.३.३-८ न्यामा.

तैसं ३.५.१ दर्शपूर्णमासं आरभमाणः सरस्वत्यै चरुं निर्वपेत्, सरस्वते द्वादशकपालं, अमावास्या वै सरस्वती, पूर्णमासः सरस्वान्, एतौ यथापूर्वं कल्पयित्वा आरभते ऋद्धयै ऋध्नोति एव। ४.४.३४

ऊहः दर्शपूर्णमासदेवतायाश्च 'उज्जितिं अनूज्जेषम्'। ९.१.४ 'अग्नेर् उज्जितिं अनूज्जेषं' इति मंत्राद् ऊहितम्। ४.४.३४

शत १.२.३.५ ११.१.३.७ दर्शपूर्णमासयोर् अन्वाहार्यं दक्षिणा। ३.८.१ एतां दर्शपूर्णसयोर् दक्षिणां अकल्पयन् यद् अन्वाहार्यं, अन्वाहार्यो नाम ऋत्विग्भ्यो देयः ओदनः।

तैसं १.१.१२; २.६.३ दर्शपूर्णमासयोर् आग्नेयस्य पूर्वं पाठः, उत्तरो ब्राह्मणपाठः। ५.१.१६

तैब्रा ३.७.५.१० दर्शपूर्णमासयोर् बर्हिर् आज्ये धर्मवती। ७.३.१८ समङ्क्तां बर्हिर् हविषा घृतेन।

तैब्रा २.३.६.२ दर्शपूर्णमासयोर् यज्ञक्रतोः चत्वार ऋत्विजः – ब्रह्मा, अध्वर्युर्, होता, आग्नीध्रः। ४.२.२३; ११.२.१; ११.३.३३; १२.२.३१

मैसं २.३.१ दर्शपूर्णमासयोः पुरोडाशः व्रीहिमयः कर्तव्यः। ६.३.१

तैसं २.५.६ दर्शपूर्णमासाभ्यां इष्ट्वा सोमेन यजेत। २.४.४; ४.३.३७; ४.४.१९; ५.४.२६; ६.६.३०

शत ११.२.५.५ दर्शपूर्णमासाभ्यां यजेत। २.२.२; ७.१.२; ७.४.१०; ८.१.२,१०; ११.१.३,८,९

तैसं २.२.५ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत। सुवर्गाय हि लोकाय दर्शपूर्णमासौ इज्येते। २.३.४; ३.१.७; ४.४.३४; ६.१.१,४,६,२४; ६.२.३; ६.४.२२, ४३; ७.१.३; ८.१.२०,२१; ९.१.४.९,३४; १०.१.१६; १०.४.२३; १०.८.३५

तैपं ३.५.१ दर्शपूर्णमासावारप्स्यमाणः। १२.२.१९–२१ न्यामा.

तैसं ३.५.१ दर्शो वा एतयोः पूर्वः पूर्णमास उत्तरः, तयोर् अथ यत् पूर्णमासं पूर्वं आरभते तद् अयथापूर्वं प्रक्रियते। ४.४.३४

तां १८.९.४ भर १३.२.१०,१३ दश चमसाध्वर्यवो दशैकैकं चमसं अनुसर्पन्ति। ३.७.२७ होतुः, ब्रह्मणः, उद्गातुः, यजमानस्य, मैत्रावरुणस्य, ब्राह्मणाच्छंसिनः, पोतुः, नेष्टुः, अच्छावाकस्य, आग्नीध्रस्य च, चमसाः ते दश।

तां १८.९.४ दश दशैकैकं चमसं अनुसर्पेयुः। ३.५.५२ अनुसर्पन्ति।

शत ३.८.१.४ दश प्रयाजान् इष्ट्वा आह 'शासं आहर' इति असिं वै शासं आचक्षते। ९.४.२३

तैसं ६.१.१० मैसं ३.७.७ दशभिः क्रीणाति सोमम्। १२.४.५-७ न्यामा. कलया क्रीणाति, शफेन, गवा, अजया, हिरण्येन, धेन्वा, वृषभेण, अनड्वहा, मिथुनाभ्यां, वाससा क्रीणाति दश संपद्यन्ते॥

ऐब्रा ५.२४ दशमं अहर् अविवाक्यं भवति। ८.२.२४ अविवाक्यं अहः

तैसं ६.४.४ दशमुष्टिना सोमेन यागः । २.२.२० तं. पंचकृत्वः यजुषा मिमीते, पंचकृत्वस्तूष्णीम् ।

तैसं ६.४.४ दशमुष्टीरेव सोमो गृहीतव्यः । ३.३.२८,३०

तैसं ६.४.४ दशमुष्टीर् मिमीते । ३.३.२८,३०

तैब्रा २.२.६.२ दशमेऽहनि मानसाय प्रसर्पन्ति । १०.६.४० मनसा प्रस्तौति, मनसा उद्गायति, मनसा प्रतिहरति, मन इव हि प्रजापतिः प्रजापतेर् आप्त्यै ।

तैब्रा २.२.६.१ दशमेऽहनि सार्धराज्ञोभिर् ऋग्भिः स्तुवन्ति । १०.६.४०

साम १३७६.८ ऋ १०.१८९.१-३

तैसं ७.२.५ दशरात्रेण यजेत । १०.५.१

तां. २५.४.१ दशरात्रो महाव्रतं उदयनीयोऽतिरात्रः । ८.२.२९

चरणव्यूह दशसामसहस्राणि, शतानि च चतुर्दश । सामानि सरहस्यानि, यानि गायन्ति सामगाः ॥ अशीतिशतं आग्नेयं, पवमानं चतुःशतम् । ऐन्द्रं स्यात् सप्तविंशानि, तानि गायन्ति सामगाः ॥

आप १२.४.८ दशापवित्रेण ग्रहं संमार्ष्टि (सर्वे ग्रहाः)। ३.१.१३,१६; ३.६.३० पवित्रदशाभिः परिमृज्य ।

शांब्रा १४.२ दशैतान् ऊध्वर्युः प्रातःसवने ग्रहान् गृह्णाति । २.२.१७; ३.६.१८,३०

तैसं २.५.५ दाक्षायणयज्ञेन यजेत प्रजाकामः । २.३.५ स्वर्गकामः ।

तैसं ६.१.१ दाक्षिणानि जुहोति । २.२.१

काठकसं३४.५ दिक्षु दुन्दुभयो नन्दन्ति । १०.४.९ दुन्दुभयो वदन्ति दिक्षु ।

तैसं ६.१.१ दिक्चतीकाशान् करोति । १.२.१४ (वातायनानि)

तैब्रा २.१.२.१९ दिवा अग्निर् आदित्यं प्रविशति, रात्रौ आदित्यो अग्निम् । १.२.१ तं. अग्निं वाव आदित्यः सायं प्रविशति, उन्यतं वाव आदित्यं अग्निर् अनुसमारोहति ।

तैसं १.८.१९ दिशां अवेष्ट्यो भवन्ति-आग्नेयं अष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रं एकादशकपालं वृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी षष्ठौही दक्षिणा, मैत्रावरुणीं आमिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा । ११.४.९-११ न्यामा.

तैसं ५.५.१;६.२.१; ६.१.३; ६.१.५;६.४.५ दीक्षणीया आतिथ्या प्रायणीयादयः अङ्गानि, सौत्ये अहनि सोमयागो मुख्यः । ४.४.३९

तां. १८.४.२ दीक्षणीयायां द्वादशमानहिरण्यं दक्षिणा, चतुर्विंशतिमानं प्रायणीयायाम् । ८.१.१६

तैसं ५.५.१;५.२.७ दीक्षणीयायाः परतो रुक्ममोचनादि आम्नातम् । ५.२.२,२३

तैसं ५.५.१; ५.१.१,१० ५.१.८; ५.२.१० दीक्षणीयायाः पूर्वं सावित्रहोमाः, उखासंभरणं, इष्टकाः, पशुश्च इति एतद् आम्नातम् । ५.२.२३ दीक्षणीया पूर्वं स्यात्

तैसं ६.१.२ दीक्षणे हि ते वैकृताः मन्त्राः श्रूयन्ते- (आकूत्यै प्रयुजे अग्नये स्वाहा आदयः) षड्भिर् दीक्षयति

तैसं ६.१.१ दीक्षाकाले नवनीताभ्यञ्जनं च । १०.४.१० नवनीतेन अभ्यङ्क्ते ।

आप १०.४.४६	दीक्षासु यूपं छिनत्ति । ५.१.२७; ११.३.३,६ कारयेत् ।
तैसं ६.१.३	दीक्षा सोमस्य । ३.७.११ (दीक्षा सोमस्य राज्ञः पत्नी) कृष्णाजिनेन दीक्षयति, मेखलया दीक्षयति ।
काठकसं २३.१	दीक्षितम् अदीक्षिता दक्षिणापरिक्रीता ऋत्विजो याजयन्ति । १०.२.२६ तस्माद् दीक्षितम् अदीक्षिता याजयन्ति ।
मैसं ३.६.९	दीक्षितम् आवेदयन्ति । ३.१.२४ एभ्य एव एनं (दीक्षितं) लोकेभ्य आवेदयन्ति ।
आप १०.१४.३-७ मैसं ३.६.५	दीक्षितो न ददाति न जुहोति, न पचति । १०.८.१२ सूत्रं – दीक्षितस्य दानहोमपाकप्रतिषेधात् दीक्षितो न ददाति न पचति । १०.८.१२ तस्माद् दीक्षितो न ददाति न पचति ।
काठकसं २३.१	दीक्षितो नयनं दक्षिणं प्रथमम् आङ्क्ते, सव्यं हि मनुष्याः पूर्वम् आञ्जते विधृत्यै । १.३.९ तं.
द्र.काठकसं २३.६,२६.३	दीक्षितोऽपि अजुह्वन् प्रत्यवेयात् । ३.४.१३ तं.
मैसं ३.६.९	दीक्षितो भृतिं वन्वीत । ६.५.२८ न्यामा.
आप १८.५.२	दुन्दुभिघोषेण महेन्द्रस्य स्तोत्रम् उपाकरोति । १०.४.१
ऐब्रा २.१.४	दुर उषासा देवता । १०.१.३३ दुरो यजति, वृष्टिर् वै दुरः, उषासानक्ता यजति । अहोरात्रे वा उषासानक्ता ।
तैब्रा २.२.४.६	दुर्वर्णोऽस्य भ्रातृव्यो भवति । ३.४.२४
पा–परिभाषा ५१	दुष्टः शब्दः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ १.३.२४ तं. (मन्त्रो हीनः)
पाम १.१.१	दुष्यति च अपशब्दैः । १.३.२४ तं. यस्तु प्रयुङ्क्ते कुशलो विशेषशब्दान् यथावद् व्यवहारकाले । सोऽनन्तमाप्नोति जयं परत्र, वाग्योगविद् दुष्यति च अपशब्दैः ॥
कात्या २२.८.२६ ऋ ६.२७.८	दूणाशेन यजेत । ८.१.१६ (पाठभेदेन) दूणाशेन बहुहिरण्येन – कात्या. दूणाशेयं दक्षिणा पार्थिवानाम् ।
कात्या २२.३.३७-३९	दृतिं नवनीतम् आज्यम् । ३.८.३६ चतुर्भिर् अश्वरथैः सक्षीरदधिभिर् आवहन्ति होत्रादीन् ततो नवनीतम् आज्यं दृतेर् यत् जातं भवति । (दृतिः = चर्ममयी भस्त्रा)
आप १.२१.३,६	दृशदुपलाभ्यां पिनष्टि । ३.१.११
पाम १.१.४ वा	दृष्टानुविधित्वात् छन्दसः । १.३.२४ तं.
मैसं ३.४.६ तां ५.७.८	देवक्षेत्रम् । ९.१.७,९
तां ६.९.२	देवग्रामः । ६.१.४; ७.१.५९; ९.१.७
तैसं २.४.११	देवताभ्यो वा एष आवृश्च्यते यो यक्ष्ये इति उक्त्वा न यजेत । स त्रैधातवीयेन यजेत । ६.२.१५ तं.
ऋ २.२६.३	देवता यष्टुः फलं ददाति–स इत् जनेन स विशा स जन्मना, स पुत्रैर् वाजं

तैसं २.५.४ भरते धना नृभिः। देवानां यः पितरमाविवासति, श्रद्धामना हविषा ब्रह्मणस्पतिम्॥ ९.२.८ नृम एव एनम् इन्द्रः प्रजया पशुभिस्तर्पयति। ९.१.९

ऐब्रा २.२.१३ देवतायै एतत्। ३.४.५० स्वाहाकृतिं हविर् 'इदं देवाय' इति यजति। इदं देवानां इदं उ नः सह।

तैसं १.१.४

पाम १.१.३.९२ देवदत्त गाम् अभ्याज शुक्लां दण्डेन। १.३.३३ तं. ७.४.१० उपरिष्टात् लक्ष्मा याज्या

तैब्रा ३.५.९ देवं बर्हिः वसुवने वसुधेयस्य वेतु। देवा नराशंसो वसुवने वसुधेयस्य वेतु। देवो अग्निः स्विष्टकृत् इत्यादिभिर् एकादश मन्त्रैर् अनुयाजा इज्यन्ते। ४.३.३६ न्यामा.

तैब्रा ३.८.१.२ देवयजनं अध्यवस्यति। १.३.१३

तैसं २.५.११ देवलक्ष्मम् एव तत् कुरुते यद् उपव्ययते। ३.४.१-९ न्यामा. उपव्ययते देवलक्ष्मम् एव तत् कुरुते।

तैसं १.२.१ देवस्त्वा सविता पुनातु अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। २.१.४८

तैसं १.२.१ देवस्य त्वा सवितुः प्रसवे। २.१.४६

आप १.१८.२ देवस्य त्वा सवितुः (प्रसवेऽश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये त्वा जुष्टं निर्वपामि) इति चतुरो मुष्टीन् निर्वपति। ११.४.४४

आप २.९.२ देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये त्वा ऊर्णाम्रदसं स्तृणामि इति त्रिधातु वा पञ्चधातु वा वेदिं स्तृणाति। ११.४.४५-४६ न्यामा.

मैसं १.१.२ देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये त्वा बर्हिर् देवसदनं दामि। ११.४.४५-४६ न्यामा.

तैसं १.२.११ देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम् अग्नये त्वा शुक्रं त्वा शुक्रायां धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामि। ११.४.४५-४६ न्यामा.

आप २.२.७ देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्यां खनति। १०.१.१-३ न्यामा.

तैसं २.६.४ देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्याम् इति स्फ्यम् आदत्ते। १२.३.२५

तैब्रा ३.५.१०.४ देवा आज्यम् अजुषन्त। १०.४.५०-५९ न्यामा. देवा आज्यपा आज्यम् अजुषन्त।

तैसं २.४.१ देवा ऋषयो गन्धर्वास्ते अन्यतः आसन् असुरा रक्षांसि पिशाचास्ते अन्यतः।

काठकसं १०.७ ४.४.१५ देवा मनुष्याः पितरः

पा ५.४.२७ देवात् तल् स्वार्थे। १.३.३० तं. देव एव देवता। तलन्तं स्त्रियाम्। लिङ्गानुशासने

तैब्रा ३.५.३.२ देवान् आज्यपान् आवह। १०.४.५०

षड् १.२० देवा ब्रह्माण आगच्छत। ११.४.५३ औपवसथ्येऽहनि सुब्रह्मण्याह्वानवचनम्।

लाट्यान १.३.३ जैब्रा २.८० आह्वाने।

तैसं २.४.१; काठकसं १०.७ देवा मनुष्याः पितरस्ते अन्यतः आसन्, असुरा रक्षांसि पिशाचास्ते

जैब्रा १.१५४ अन्यतः। ४.४.१८

तैब्रा २.४.६.९ देवांश्च याभिर् यजते ददाति च ज्योग् इति ताभिः सचते (अवतिष्ठते) गोपतिः सह। ३.१.१ तं. यजमानः।

तैसं ६.१.५ देवा वै देवयजनम् अध्यवसाय दिशो न प्राजानन् । १.२.१,१०

तैसं २.६.१० देवा वै शंयुं बार्हस्पत्यम् अब्रुवन् (हव्यम् इमं नो वह) इमं नो यज्ञं स्वगा कुरु इति, सोऽब्रवीत् वरं वृणै किं मे प्रजायै इति । तेऽब्रुवन् 'यो ब्राह्मणाय अवगुरै (अपगुरात्) तं शतेन यातयात्, यो निहनत् तं सहस्रेण यातयात्, यो लोहितं करवद् यावतः प्रस्कन्द्य पांसून् सङ्गृह्णात् तावतः संवत्सरान् पितृलोकं न प्रजानात् तस्माद् ब्राह्मणाय नापगुरेत् न हन्यात् न लोहितं कुर्यात् । ३.४.१७

तैसं १.६.११ देवा वै सत्रम् आसत । ६.१.४,५

तैसं २.६.६ देवा वै स्विष्टकृतम् अब्रुवन् 'हव्यं नो वह' इति, सोऽब्रवीद् 'वरं' वृणै भागो मेऽस्तु वृणीष्व इति अब्रुवन् । सोऽब्रवीद् उत्तरार्धाद् एव मह्यं सकृत् सकृद् अवद्यात् । ३.४.४५; ३.५.८

पा. ७.१.५० देवासः । १.३.३०-३५ न्यामा. आत् जसः असुक्, अकारान्तात् उत्तरस्य जसः 'अस्' छन्दसि ।

शत ९.५.१.१८,२०,२१ देवासुराः सत्यम् अभजन्त, अर्धं देवाः सत्यस्य अभजन्त, अर्धं असुराः । तद् असुराः सत्यम् अनूच्यमानं देवान् अपाक्रामन्, ते प्रायणीयं निरवपन् तत् शंयवन्तम् आसीत्, अथ असुरा यज्ञम् आयन् ततो यज्ञस्तत्वर इति । तम् एवं कृत्वा त्वरितम् आद्रियन्त इति । तथा आतिथ्यं निरवपन्, तद् इडान्तम् आसीत् । अथ असुरा यज्ञम् आयन्, ततो यज्ञस्तत्वर इति । तद् इडान्तम् एव कृत्वा त्वरितम् आन्द्रियन्त ॥ १०.७.४२

तैब्रा १.७.४.४ देविकाहविषाम् अग्नये स्विष्टकृते समवद्यति । १२.३.३ देवसुवाम् ।

भर १४.२४.१५ देविकाहवींषि अनुबन्ध्यायाम् । १२.३.३ अनुबन्ध्यायाः पशुपुरोडाशं देविकाहवींषि अनु निर्वपति ।

मैसं १.१.११ देवीरापः शुद्धा यूयं देवान् युयुध्वं, शुद्धा वयं सुपरिविष्टाः परिवेष्टारो भूयास्म । ११.४.५०

तैसं १.२.३ देवीरापो अपां नपाद्य ऊर्मिर् हविष्य इन्द्रियावान् मदिन्तमस्तं वो माऽव क्रमिषं इति नदीतरणार्थे मन्त्रः । ११.४.५०

तैब्रा ३.५.३.१ देवेद्धो मन्विद्धो (अग्ने महान् असि ब्राह्मण भारत । असावसौ । देवेद्धो मन्विद्ध । ऋषिष्टुतो विप्रानुमदितः । कविशस्तो ब्रह्मसंशितो घृताहवनः इत्यादि निवित्पदानि लिङ्गेन सामिधेनीभिस्तुल्यानि प्रयुञ्जन्ते । ३.१.२१ तं.

तैब्रा ३.५.९.१ देवोऽग्निः स्विष्टकृत् । १०.४.३८ न्यामा.

तैब्रा ३.६.११.२ देवेभ्यो वनस्पते हवींषि हिरण्यपर्णा प्रदिवस्ते अर्थम् । १.३.३०

तैसं १.१.५ देवो वः सविता उत्पुनातु अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । २.१.३७ न्यामा.

सत्या १३.१.१० दैवतानि अवदाय न तावत्येव होतव्यं सौविष्टकृतानि अवदेयानि । सौविष्टकृतानि अवदाय न तावत्येव होतव्यम् ऐडानि अवदेयानि । ५.२.११ (इडान्ता आतिथ्यवचनात्)

तैब्रा ३.५.८.३ दैव्या अध्वर्यव उपहूता, उपहूता मनुष्याः य इमं यज्ञं अवान्, ये च यज्ञपतिं वर्धान् । ९.१.४०

तैब्रा ३.६.६.१ दैव्याः शमितार उत मनुष्या आरभध्वम् उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधम्। ९.४.१०

मैसं ४.१३.४ दैव्याः शमितार उत मनुष्या आरभध्वम् उपनयत मेध्या दुर आशासाना मेधपतये मेधम्।

मैसं ३.१०.३ दोष्णः पूर्वार्धात् अग्नये समवद्यति, गुदस्य मध्यतः, श्रोण्या जघनतः। १०.७.११ (यद् +)

तैब्रा ३.२.३ दोहधर्माः–शाखाहरणं, गवां प्रस्थापनं, प्रास्नावनं, दोहनम् आदयः। ३.६.२८

शत २.४.३.६ द्यावापृथिवीय एककपाल आग्रयणे सर्वहोमपर्यावृत्तिकः। ७.१.२३;१२.२.३४

तैसं १.८.२ द्यावापृथिव्य एककपालः। चातुर्मास्येषु वैश्वदेवपर्वणि। ७.१.२; ७.३.२६

आप ४.१०.१ द्यावापृथिवीयानि अनुमन्त्रणानि। ९.३.१५,१८ द्यावापृथिव्योर् अहं देवयज्यया उभयोर् लोकयोर् ऋध्यासं भूमानं प्रतिष्ठां गमेयम्।

शत २.४.३.८ द्यावापृथिव्यम् एककपालं यत् सर्वहुतं करोति सा त्वेका परिचक्षा, हुतोऽहुतः पर्यावर्तते सा द्वितीया–आज्यस्यैव द्यावापृथिवीं यजेत। ७.३.२६

तैसं २.१.४ द्यावापृथिव्यां धेनुम् आलभेत, मारुतं (वायव्यं) वत्सम् आलभेत, ऐन्द्रं वृषभम्। ३.१.४,१३

उपवर्ष द्रव्यगुणसंस्कारेषु (शेषः) इति बादरिः। कर्माणि अपि (शेषभूतानि) जैमिनिः फलार्थत्वात् ५-फलं च पुरुषार्थत्वात्। फलम् अपि पुरुषं प्रति उपदिश्यते। पुरुषश्च कर्मार्थत्वात्। अथ इदानीम् अत्र भगवान् उपवर्षो वृत्तिकारः परिनिश्चिकाय 'द्रव्यगुणसंस्कारेषु एव नियतो यज्ञिं प्रति शेषभावः।' ३.१.३-६

पा २.१.५१ वा द्वन्द्वतत्पुरुषयोः उत्तरपदे नित्यसमासः। १०.६.४ तं.

पा २.२.२३ द्वन्द्वगर्भो बहुव्रीहिः। १०.६.४ पृष्ठयः षडहो बृहद्रथन्तरसामा–बृहत् च रथन्तरं च बृहद्रथन्तरे बृहद्रथन्तरे सामनी यस्य स बृहद्रथन्तरसामा, यदि द्वन्द्वगर्भो बहुव्रीहिस्तदा प्रत्यहं समस्ते सामनी।

पा १.२.६७ द्वन्द्वापवादाच्च एकशेषस्य। ६.१.२२ एकशेषत्वाद् एव द्वन्द्वापवादः। क्षौमे वसानौ (जायापती) 'पुमान् स्त्रिया' स्त्रिया सहवचने पुमान् शिष्यतेएकशेषः।

शत ३.८.३.६.५ द्वयानि मांसानि अभिमृशति शृतानि च अशृतानि च। १०.७.९ शृतं वै देवानां हविः। शमिता वै तद् वेद, यदि शृतं वा अशृतं वा। तद् अध्वर्युः त्रिः पृच्छति शमितारं, शृतं वा अशृतं वा मांसम्।

जैब्रा २.३७८ द्वये एव यज्ञक्रतवो भवन्ति ये होतारं अभितिष्ठन्ति ते ऊर्ध्वाः, ये अच्छावाकं ते तिर्यञ्चः। १०.५.५१

तां ४.२.१०.११ तद् आहुर् ईर्मं (व्रणम्) इव वा एषा होत्राणां यद् अच्छावाकम् अनुसंतिष्ठते। उक्थ्यम्। अथो खल्वाहुर् अग्निष्टोमम् एव कार्यम्, ऊर्ध्वो हि होतारम् अनुसंतिष्ठते।

तां ४.२.११

तां ४.४.२ द्वयोर् द्वयोर् ऋचोर् गेयं ब्रह्मसाम्नः स्वे प्रगाथे। ९.२.२७/४ तेषु आसेषु छन्दसी संयुज्य एतव्यम्। द्वे छन्दसी संयुज्य तृचीकृत्य प्रगाथे प्रोक्तव्यम्।

पा १.४.२२ द्वयोर् द्विवचनम्। ३.४.१३

शत ११.५.३.२,५,८ द्वयोः प्रणयन्ति तस्माद् द्वाभ्याम् एति। ७.३.१९,२२,२३ अयमेव दक्षिण ऊरुर् वरुणप्रघासाः। ३ अयमेव उत्तर ऊरुर् महाहविः (साकमेधाः)। ५ द्वयोः प्रणयन्ति तस्माद् द्वाभ्याम् एवं एति।

तैसं २.५.१० द्वात्रिंशतम् अनुब्रूयात् प्रतिष्ठाकामस्य। १०.५.२७

मैसं ४.४.१० द्वात्रिंशा पवमानाः (माध्यन्दिनार्भवपवमानाः) अभिषेचनीयस्य, तत्र नव

काठक सं १५.१० राजसामानि, एकादश राजसामानि बलौघश्रवसे वसिष्ठस्य जनिजनित्रे

तां १९.४; २०.४ च साकं प्रवेदनानि आहुः। शुद्धाशुद्धीये च संश्रवोपपदे च उभे। तथा रथहविर्धाने पुनःस्तोमस्य यज्ञस्य। पुनःस्तोमस्य सवनं मध्यमं द्वादशं स्मृतम्। कार्यौ नवदशस्तोमावभितः सवने उभे॥ १०.४.४०

तैसं २.३.७ द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय। ३.५.१६-१७ न्यामा.

तां २.२.५ द्वादशकपाले यद् अष्टाकपालो भवति। ३.७.३५ वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते, यद् अष्टाकपालो भवति गायत्रिया एवैनं (पुत्रं) ब्रह्मवर्चसेन पुनाति।

तैसं ४.१.९; १.२.२ द्वादश जुहोति। १०.३.२४ आकूतिम् अग्निं प्रयुजमादयः प्राकृत्यः षट्, 'आकूत्यै प्रयुजे अग्नये' आदयो वैकृत्यः षड्, एवं द्वादश जुहोति। सूत्रम्-अभ्यासात् तु प्रधानस्य। १०.३.२४ यत्र पुनरावृत्तिः श्रुता कर्तव्या एव।

तां १०.३.९ द्वादशदीक्षा द्वादशोपसदः। ११.४.१८

तैसं १.६.९ द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि सम्पाद्यानि-इत्याहुः वत्सं च उपावसृजति, उखां च अधिश्रियति, अव च हन्ति, इषदौ च समाहन्ति, अधि च वपते, कपालानि च उपदधाति, पुरोडाशं च अधिश्रयति, आज्यं च स्तम्बयजुश्च हरति, अभि च गृह्णाति, वेदिं च परिगृह्णाति, पत्नीं च संनह्यति, प्रोक्षणीं च आसादयति आज्यं च। ३.८.१९-२० न्यामा.

तैसं ५.४.८ द्वादश द्वादशानि जुहोति। १२.३.२७

मैसं ३.६.९ द्वादश रात्रीर् दीक्षितो भृतिं वन्दीत। ६.५.२९; ६.८.२६

गौतम स्मृ. २ द्वादश वर्षाणि एकवेदब्रह्मचर्यं चरेत्, प्रतिद्वादश सर्वेषु, ग्रहणान्तं वा। १.३.४ तं.

मैसं १.६.१२ द्वादश वै रात्रयः संवत्सरस्य प्रतिमा। ६.७.३९

मैसं १६.१.११ द्वादशशतं ज्योतिष्टोमे दक्षिणा। ६.७.३९ तस्य द्वादशशतं दक्षिणा। द्वादशशतं परिक्रयणं (दक्षिणा) विश्वजिति, द्वादशशतं वा देयम् (ज्योतिष्टोमे) प्रकृतित्वात्। सूत्रम्-अतद्गुणत्वात् नैवं स्यात्। ६.७.१५,१६ विश्वजिति सर्वस्वं देयम्। शत १०.२.१.१६

तां. १६.१२-१६ द्वादश साद्यस्काः। ११.४.१४,१५ पञ्च साद्यस्काः आवृत्या द्वादश।

तैब्रा १.१.६.७ द्वादशसु रात्रिषु निर्वपेत् (पवमानेष्टिम् अग्न्याधाने) ५.२.२१-२५ न्यामा.

तैब्रा १.२.२.१ द्वादश स्तोत्रशस्त्रोऽग्निष्टोमः। २.१.२५ द्वादशाग्निष्टोमस्य स्तोत्राणि। द्वादशस्तोत्रशस्त्रोऽग्निः। (तां ६.३.३) द्वादश स्तोत्राणि द्वादश शस्त्राणि तत् चतुर्विंशतिः। (तां ६.३.४)

तां १०.३.१ द्वादशाहम् ऋद्धिकामा उपासीरन् । ८.२.२५ द्वादशाहम् ऋद्धिकामा उपासीदत् सोऽराध्नोत् द्वादशाहम् ऋद्धिकामा उपेयुः । (तैसं ७.४.५)

तां ४.९.९ द्वादशाहस्य यानि गतरसानि छन्दांसि मानसेन तानि आप्याययन्ति– १०.६.३५ मनसा हिंकरोति, मनसा प्रस्तौति, मनसा उद्गायति मनसा प्रतिहरति, मनसा निधनम् उपयन्ति, असमाप्तस्य समाप्त्यै ।

गोपथ १.५.२३ द्वादशाहिकानि संस्थाविशिष्टानि स्युः । ८.३.९ द्वादशाहसंस्थाकानि । यथा अग्निष्टोमसंस्था, उक्थ्यसंस्था, षोडशीसंस्था, अतिरात्रसंस्था च ।

तैसं ७.२.९ द्वादशाहेन प्रजाकामं याजयेत् । ६.२.१; ९.२.२१/२; १०.५.१; ११.४.१२, १४,१८

तैसं ७.२.१० द्वादशाहेन (प्रजाकामो) यजेत । ८.१.१७ य एवं विद्वान् द्वादशाहेन यजेत ।

तैसं ७.२.९ द्वादशाहेन प्रजाकामो यजेत । ८.२.२५ यः कामयेत प्रजायेय स द्वादशरात्रेण यजेत ।

तां ४.२.१ द्वादशाहे प्रथमम् अहः । प्रायणीयं नाम प्रायणीयोऽतिरात्रः । ७.५.३ प्रायणीयम् एतद् अहर् भवति ।

तैब्रा १.५.१२.३ द्वादशैकाष्टका । ६.५.३३ प्रतिमासे कृष्णपक्षे अष्टमी सा एकाष्टका ।

तां १०.३.९ द्वादशोपसत्ता अहीनस्य धर्मः । ३.१.२१; ७.४.१४; ८.१.१७ चतुर्धा वा एतास्तिस्रस्तिस्रो रात्रयो यद् द्वादशोपसदः, ताभिः यज्ञं सम्भरति

तैसं ७.२.९ द्वादशाहोऽहर्गणः । (द्वादशाहः) प्रायणीयोऽतिरात्रः । ८.२.२४ पृष्ठ्यः षडहः

तैसं ७.२.६ त्रयश्छन्दोमा – चतुर्विंशो भवति चत्वारिंशद् अक्षरा गायत्री गायत्रं ब्रह्मवर्चसं चतुश्चत्वारिंशो भवति, चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । अष्टाचत्वारिंशो भवति, जगती ।

तैसं ७.३.१ अविवाक्यम् अहः दशमेऽहनि भवति ।

तैसं ७.३.३ उदयनीयोऽतिरात्रः । सूत्रम् – उभयसंज्ञको सत्रम् अहीनश्च । ८.२.२४

तैसं ५.१.४ द्वाभ्यां खनति । १२.३.३०; १२.४.४ + प्रतिष्ठित्यै ।

ऐब्रा १.२८ द्वाभ्यां गायत्रीभ्यां वैश्यस्य । ८.३.२२ जागतो वैश्यः ।

तैसं ७.४.९ द्वाभ्यां लोमम् अवद्यति, द्वाभ्यां त्वचं, द्वाभ्याम् असृक्, द्वाभ्यां मांसं, (द्वाभ्यां अस्थि, द्वाभ्यां मज्जानम् आत्मदक्षिणम् वै सत्रम् आत्मानम् एव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति) इत्येवं षड् द्विकान् अनुक्रम्य आह यद् द्वादशोपसदो भवन्ति आत्मानम् एव निरवदयत । ७.४.१४;८.१.१७

तैसं २.५.१० द्वात्रिंशतं – द्वात्रिंशतं (सामिधेनीर्) अनुब्रूयात् प्रतिष्ठाकामस्य । १०.५.२७

पा १.४.४९ द्वितीया विभक्तिः कर्तुर् ईप्सिततमे स्मर्यते । २.१.१० कर्तुर् ईप्सिततमं कर्म द्वितीया कर्मणि – कर्मणि द्वितीया । २.१.१०

तां ६.१०.१४ द्वित्व – द्वियजमानके प्रयोगे प्रतिपदम् आह । ३.३.१७ तं.

साम १००१ ऋ.९.१९.२ युवं हि स्थः स्वःपती इन्द्रश्च सोम गोपती । ईशाना पिप्यतं धियः ॥

तैसं १.८.८ द्विदेवतत्वसामान्येन ऐन्द्रापौष्णादीनाम् अग्नीषोमीय-ऐन्द्राग्नप्रकृतिकत्वम् । २.१.१७ तं.

मैसं ३.१०.३ द्विरवद्यति । ५.२.५; १०.७.७२

शत ३.८.३.२७ 'द्विर् अवद्यति' इति तस्य प्रतिषेधः । १०.७.६ अनिज्याङ्गावदाने न अंसयोर् अवद्यति, न शिरसो, न अनूकस्य, न अपरसक्थ्योर् अवद्यति। (अनूकं मूत्रबस्तिः– सायण)

सत्या १७.६.१ द्विरात्रादीनां आ एकादशरात्रात् अहीनत्वं यजतिचोदनात् । ८.२.२६ द्विरात्रेण यजेत । ८.१.१७; ८.२.२६; १०.५.१, १२,१३; १०.६.६०

शांब्रा १३.६ द्विर् ऐन्द्रवायवस्य भक्षयति । द्विर् ह्येतस्य वषट्करोति । ३.५.१८

शत ५.५.४.२६ द्विर् हविषोऽवद्यति । ३.४.८; ५.२.६; १०.८.३१; ११.१.३७

शांब्रा १३.६ द्विर् ह्येतस्य वषट्करोति । ३.५.१८ (ऐन्द्रवायवस्य)

पा ६.३.१ वा द्विवचनबहुवचनानाम् असमासः । ६.७.३३

काठकसं २९.८ द्वे द्वे रशने यूपम् ऋच्छतः–तस्मात् स्त्रियः पुंसोऽतिरिक्तास्तस्माद् उत एको बह्वीर् जायाः विन्दते, नैका बहून् पतीन् । १.३.९ तं.

मैसं ४.७.९ तैसं ६.६.४

मुंडक. उप १.१.४.५ द्वे विद्ये वेदितव्ये, इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैव अपरा च । तत्र अपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषं इति । अथ परा यया तद् अक्षरम् अधिगम्यते २.३.५-११ न्यामा.

मैसं १.१०.८ द्वे ऊरू वै देवानां (यद्) याज्यानुवाक्ये, एकया प्रत्यागच्छति गमयति अनया

तैसं १.६.८ अथात्र तिस्रः कार्याः इति पितृयज्ञे याज्यानुयाक्यात्रयविधानपरे वाक्ये तयोर् द्वित्वं उचितं दर्शयति–न सर्वाणि सह यज्ञायुधानि प्रहृत्यानि मानुषं तत् क्रियते नैकमेकं पितृदैवं तत् । द्वे द्वे सह प्रहृत्ये याज्यानुवाक्ययो रूपम् । १२.४.४

तां ९.३.९ द्वे वै संस्तुतानां विराजम् अतिरिच्यते । २.४.८,२६; १०.५.३५ द्वे स्तोत्रीये ।

शत २.४.४.६ द्वे हि पौर्णमास्यौ द्वे अमावास्ये यजेत, अत्र ह्येव खलु सा संपद् भवति । २.३.९ दाक्षायणे

आप २.१६.७ द्वौ वृणीते । ६.१.४३ न्यामा. द्वयोर् गोत्रप्रवर्तकयोर् ऋष्योर् नामोच्चरणकर्तृकं वृणीते । यथा उपमन्युवसिष्ठगोत्रोत्पन्नोऽहम् ।

काल्या ७.५.२३ द्वौ शंयू द्वे इडे । १०.७.४० पूर्वश्च उत्तरश्च द्वौ शंयू, पूर्वा च उत्तरा च द्वे इडे । पूर्वः पत्नीसंयाजानां पश्चादुत्तरः ।

तैसं ६.११.२ द्व्यक्षरो वषट्कारः, एष वै प्रजापतिः, सप्तदशो यज्ञे अन्वायत्तः । ८.४.१६

शत १.७.४.११ द्व्यवदानं जुहोति । ३.४.३८, ४०; ६.४.२ द्विर् हविषोऽवदाय अधोपरिष्टात् आज्येनाभिधारयति ।

मैसं ३.६.६ द्व्यहं नाश्नाति । ३.८.९ सायं प्रातर् वै मनुष्याणां देवहितं अशनम्, अविनीय सायम् अशनं व्रतं व्रतयति ।

शत २.५.१.३ द्व्यहं साकमेधैः । ५.१.२२ स वै द्व्यहं अनूचीनाहं यजते (साकमेधैः)

पा. १.४.२१ द्व्येकयोर् द्विवचनम् एकवचनम् । ३.४.१३ तं.

ऋ १०.४.१ धन्वन्निव प्रपा असि (त्वमग्न इयक्षवे पूरवे प्रत्न राजन् । प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ॥) १.३.२

तैसं २.५.१२

तैसं १.१.७ धर्मसि अन्तरिक्षं दृंह, प्राणं दृंह, अपानं दृंह सजातान् अस्मै यजमानाय

तैब्रा ३.२.७.२ पर्यूह इति द्वितीयं कपालम् अङ्गारेषु उपदधाति । १०.५.१-६ न्यामा.

आपश्र २.५.११,१२,१३ धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत, अन्यतरापाये कुर्वीत । ६.८.१८
धर्मं प्रति हि विप्रतिपन्ना बहुविदः । १.१.१
आप परि १.१.१.१ धर्मं व्याख्यास्यामः । १.३.२४ तं.
पाम १.१.१ धर्माय नियमः । लोकतोऽर्थं प्रयुङ्क्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः । १.३.२७ तं.
मनुस्मृ मेधातिथि धर्मे च अर्थे च कामे च नातिचरितव्या । ६.१.१४,१७; ६.८.१७,१८
पा ३.१.९१ धातोः । २.२.१ तं.
मैसं ४.६.२ धाना आश्विनपात्रे निदधाति । ३.८.३३
तैसं ६.५.९ धानामिर् हारियोजनं श्रीणाति । ९.१.१२;९.४.४५; ११.२.६८
तैसं १.१.६ तैब्रा ३.२.६.३ धान्यमसि धिनुहि देवान् इति दृषदि आवपति । ९.१.३८/२
वाज १.३१.३ धामनामाऽसि प्रियं देवानाम् अनाधृष्टं देवयजनमसि (सवितुस्त्वा प्रसवे आज्यग्रहणमन्त्रः ।) ११.४.४४
भर १३.१४.१ धारया गृह्णाति । २.२.१७–२० न्यामा. तिरःपवित्रं स्रवन्त्या धारया ग्रहान् गृह्णाति ।
सत्या ८.३.४६ धारयेद् वैणवं दण्डं शुभे रौक्मे च कुण्डले । ३.४.२४ तं. धारयेद् वैणवीं यष्टिं सोदकं च कमण्डलुम्। यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥
मैसं ४.८.९ धारयेयुस्तं यं कामाय गृह्णीयुः । १०.५.६९,७२,७४ ऐन्द्रवायवं गृहीत्वा सादयेत्, तं यं कामाय गृह्णीयुः ।
आप ६.३.१-३ धार्यैऽग्नौ पर्युक्षणं परिसमूहनं तृणापचयम् अहनि अहनि क्रियन्ते । ९.४.२९
धार्यो गतश्रिय आहवनीयः ।
नित्यो गतश्रिय आहवनीयो धार्यते ।
अस्यानुगमे प्रायश्चित्तम्–अग्नये ज्योतिष्मते अष्टाकपालं निर्वपेत् । ९.४.२९
साम १९३ धुरि सामानि । १०.५.१० एकस्याम् ऋचि गेयम् । सूत्रम्–एकस्यां वा स्तोमस्य आवृत्तिधर्मत्वात् । १०.५.११
साम १९३ ऋ ८.४६.१ त्वावतः पुरुवसो वयम् इन्द्र प्रणेतः । स्मसि स्थातर् हरीणाम् ॥
ऋ १.२७.११ धूमकेतुः । अग्नेर् नाम । १०.४.२३ स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः । धिये वाजाय हिन्वतु ॥
आप २२.२.२७ धेनुः –अथैष भूर् विश्वेदेवः त्रिवृदेव सर्वस्तस्य विश्वत्यः स्तोत्रिया धेनुर् दक्षिणा । १०.६.१५
तैब्रा १.६.१.५ तैसं ५.७.३ धेनुर् दक्षिणा । १०.६.२० अग्नौ दक्षिणा–चतस्रो धेनूर् दद्यात् ।
शत २.९.२.११ धेनुर् भुवि कृत्स्नस्य क्रतुदाक्षिण्यस्य निर्वर्तयित्री । १०.६.१९
तैसं १.१.७ ध्रुवमसि पृथिवीं दृंह आयुर् दृंह, प्रजां दृंह, सजातान् अस्मै यजमानाय पर्यूह
आप १.२२.२ इति मध्यमं कपालं अङ्गारेषु उपदधाति । १०.५.१ न्यामा.
मनुस्मृ ५.५ न कलञ्जं भक्षयितव्यं, न लशुनं, न गृञ्जनम् । ६.२.१९
काठकसं १२.६ न केसरिणो ददाति । ६.७.४; १०.३.४७ अश्वो न प्रतिगृह्यः, उभयादन् वा ।
आप ६.४.८ नक्षत्राणि दृष्ट्वा जुहोति । ५.१.३३ नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायम् ।
तैसं ६.१.१ नखानि निकृन्तते । ३.८.३; ४.३.१
मैसं २.६.५ नखावपूतानां चरुः । १०.४.१

तां ८.६.९,१०	'न गिरा गिरा' इति ब्रूयात्। यद् गिरा गिरा इति ब्रूयात् आत्मानं तद् उद्गाता उद्गिरेत्।
साम ७०३ ऋ. ६.४८.१	ऐरं कृत्वा उद्गेयम्। ९.१.५० यज्ञायज्ञा वो अग्नवे गिरागिरा च दक्षसे। यज्ञायज्ञीयं साम
तैब्रा १६.६.७	न च प्रयाजान् यजति न च अनुयाजान् यजति। ४.४.३१
तैसं ५.२.७	न चेतव्यम्–हिरण्यं निधाय चेतव्यं। १.२.५,१८ रुक्मम् उपदधाति, अमृतं वै हिरण्यम् अमृते एव अग्निं चिनुते।
मैसं १.४.११	न चैतद् विद्मो वयं ब्राह्मणा वा स्मः अब्राह्मणा वा। १.२.२ नैव एतद् ज्ञायते किं वा ब्राह्मणा वयम् उत अब्राह्मणा वा। १.२.२ (सूत्रम्–स्म्यपराधात् कर्तुश्च पुत्रदर्शनात्। १.२.१३)
पाम २.१.५१	न चैष नियोगो वृत्तिपक्षे नित्यः समास इति। विभाषां हि स्म भगवान् पाणिनिर् अधीते। १०.६.५
काठकसं १२.४	न जगत्या परिदध्यात्। यज् जगत्या परिदध्यात्, तत् छन्दांसि गमयेत। त्रिष्टुभा परिदधाति। १०.५.३१
मनुस्मृ ४.३४	न जीर्णमलवद्वासाः स्यात् सति विभवे। ३.४.२४ तं. न सीदेत् स्नातको विप्रः क्षुधा शक्तः कथञ्चन। न जीर्णमलवद्वासा भवेच्च विभवे सति॥
निरुक्त १.१८	न तज् ज्वलति कर्हिचित्। १.३.२४ तं. यदधीतम् अविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्केन्धौ न तज् ज्वलति कर्हिचित्॥
ऋ ६.२८.३	न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति। देवाँश्च याभिर् यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह॥ २.१.३० (गोसूक्ते)
शत १.५.३.२५	न तावत्येव होतव्यम्, अथ सौविष्टकृतानि अवद्यति। अथ सौविष्टकृतानि अवदाय नैव जुहोति। ऐडानि अवद्यति। ५.२.१० हविर्भिश्चरति उभौ स्विष्टकृद् इडा च।
शत १.६.३.१९	न तौ पशौ करोति (आज्यभागौ) न सोमे। १०.८.५
साम ६८१	न त्वावान् अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥ ९.२.२५/१
ऋ ७.३२.२३	
तैसं ७.२.१०	न द्वौ पुरुषौ संभूय यजेयाताम्। ६.१.१७ एक एव यजेत इति वचनात्। (सन्नम् अपोह्य)
वाराह १.१.१.१६	न ध्यानेन इति मन्त्रान्तेन कर्मसंनिपातः स्यात्। ९.४.९ ('न ध्यानादिना' मन्त्रान्तेन–पाठान्तरम्) मन्त्रान्तेन कर्म संनिपातयेत्।
आप २.१६.८	न पञ्चातिवृणीते। ६.१.४३
काठकसं २३.९	न पत्नीः संयाजयन्ति। १०.७.३८ पत्नीं तु न संयाजयन्ति।
शत १.६.३ १९	न पशौ। ४.१.१४ न तौ (आज्यभागौ) पशौ सोमे न।
शत १२.१.१.१०	न पूतः पावयेत्। ५.१.२ तं.
तैसं ५.२.७	न पृथिव्याम् अग्निश्चेतव्यः, नान्तरिक्षे, न दिवि, हिरण्यं (रुक्मं) निधाय चेतव्यम्। १.२.५.१८

मनुस्मृ ११.९४ — न पेया ब्रह्मवादिभिः। १.३.७ तं. गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः॥ न पेया ब्रह्मवादिभिः (पाठान्तरम्)

शत १४.२.२.४४ / भर ११.१२.१३ — न प्रथमे यज्ञे प्रवृज्यात्, द्वितीये तृतीये वा प्रवृज्यात्। ३.३.३२

तां ८.६.११ / साम ७०३ / ऋ ६.४८.१ — न 'प्र प्र' इति ब्रूयात् प्रप्रीति ब्रूयात्। ९.१.५८ वैश्वानरे वा एतद् उद्गाता आत्मानं प्रदधाति यत् 'प्र प्र वयं' इत्याह, 'प्रप्री वयं' इति वक्तव्यम्। यज्ञा यज्ञा वो अग्नये गिरागिरा च दक्षसे। प्र प्र वयममृतम् जातवेदसं प्रियं मित्रं न शंसिषम्॥

तैब्रा २.१.४.९ — न बर्हिर् अनुप्रहरति, असंस्थितो हि तर्हि यज्ञः। ९.१.३०

तैसं २.६.१० — न ब्राह्मणं हन्यात्। ३.४.१७

आपध २.१४.१६ — न भर्त्रा सह विभजते। ६.१.१७ तं.

मनुस्मृ ५.५६ — न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला॥ १.३.४ तं.

तैब्रा १.१.९.७ — न मांसम् अश्नीयात्। १०.६.५३

वसिष्ठस्मृ १२ — न म्लेच्छभाषां शिक्षेत। १.३.२४ तं.

तैब्रा ३.७.५.१० — न राजन्यो न वैश्यो वा सांनाय्यं पिबेत्, असोमपीथो ह्येषः। १२.४.४५

तां २४.१५.१ — नव त्रिवृन्ति अहानि भवन्ति। ८.३.३,५ (पञ्चमे एकोनपञ्चाशद्रात्रे)

कात्या २२.३.३७ — नवनीतम् आज्यं भवति। ३.८.३६ इति नवनीतम् आज्यम् – इयेने

तैसं ६.१.१ — नवनीतेन अभ्यङ्क्ते। ३.४.११; १०.४.१०

तैब्रा १.६.२.३ — नव प्रयाजा इज्यन्ते, नवानुयाजा इज्यन्ते। अष्टौ हवींषि द्वौ आधारौ द्वौ आज्यभागौ त्रिंशत् संपद्यन्ते॥ ७.१.१८-२१ न्यामा.

मैसं १.१०.८ — नव प्रयाजा नवानुयाजाः। ५.३.१;१०.३.१

तैसं ७.२.४ — नवरात्रेण यजेत। १०.५.१

शब १४.४.३.१५ — न वा अरेऽहं मोहं ब्रवीमि, अविनाशी वा अरेऽयं आत्मा अनुच्छित्तिधर्मा। मात्रा संसर्गस्तु अस्य भवति। १.१.५

तां १६.१.११ — न विश्वजिति कृत्स्नाः प्रतीयन्ते। तस्माद् द्वादशशतम् अन्न देयम्। विश्वजितः प्रकृतिर् ज्योतिष्टोमः, ज्योतिष्टोमे च द्वादशशतम्। ६.७.१५ सूत्रम्– अतद्गुणत्वात् तु नैवं स्यात्। 'द्वादशशतं दक्षिणा' इति गुणो विश्वजितो नास्ति। ६.७.१६

कात्या ७.१.७ — न वेदे तावन्तो (षोडश ऋत्विजो) वरीतव्याः। चतुरो वा आद्यान् वृणीते। (अध्वर्युं, ब्रह्माणं, होतारम्, उद्गातारं च) ३.७.२४

तां ७.७.५ — न वै बृहद्रथन्तरम् एकच्छन्दोऽयच्छत्। ततः ककुभौ उत्तरे उपादधुः तस्माद् बृहद्रथन्तरे एकस्मिन् तृचे कुर्वन्ति। ९.२.२५/१

मैसं १.१०.१३ — न वैश्वदेवे उत्तरवेदिम् उपवपन्ति, न शुनासीरीये। ७.३.२० न वैश्वदेवे उत्तरवेदिं उपवपन्ति, उप अन्न (वरुणप्रघासेषु) वपन्ति। न वैश्वदेवे त्रिंशदाहुतयः सन्ति, न साकमेधेषु, वरुणप्रघासेषु वाव त्रिंशदाहुतयः।

याज्ञस्मृ १.१३२ न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्। नाहितं नानृतं चैव न स्तेनःस्यात् न वार्धुषी ॥ ३.४.१३ तं.

लाट्यायन ८.२.१ अवभृथाद् उदेत्य वत्सत्वचम् आच्छादयति। (शेषकर्म) ६.७.१०

तैसं १.६.८ न सर्वाणि सह यज्ञायुधानि प्रहृत्यानि मानुषं तत् क्रियते। न एकम् एकं पितृदैवं तत्। द्वे द्वे सह प्रहृत्ये याज्यानुवाक्ययो रूपम्। १२.४.४

मैसं ३.८.२ न सोमम् आज्येन आधारयति। ८.१.६

शत १.६.३.१९ न सोमेऽध्वरे तौ (आघारौ) करोति, न पशौ। १०.८.५ न्यामा.

आश्व ५.६.३ न सोमेन उच्छिष्टा भवन्ति। ३.५.५२ न हि सोमेन

तैब्रा १.१.९.७; मैसं ३.३.१ न स्त्रियम् उपेयात्। ५.३.२६,२७; १०.६.५३

शत ३.८.३.९ न स्वाहा करोति। १०.३.१७ सूत्रम् – मन्त्रं च नाह, पूर्वस्मिन् (आघारे – वायव्यपशोः) अमन्त्रवायव्यपशौ पूर्वाघारोऽमन्त्रकः – उत्तरेऽस्मिन् आघारे हिरण्यगर्भमन्त्रः (तैसं ५.५.१)

शत १.५.३.२५ न हि ततः पराम् आहुतिं यक्ष्यन् भवति। ३.५.४ नो हि ततः काञ्चन हविषो अग्नौ आहुतिं होष्यन् भवति।

छां ८.१५.१ न हिंस्यात् सर्वभूतानि। १.१.२ अहिंसन् सर्वभूतानि।

पा १.१.७३ न हि विस्मृते 'वृद्धिरादैच्' इत्यस्य सूत्रस्य कर्तरि 'वृद्धिर् यस्य अचाम् आदिस्' तद् वृद्धम् इति किञ्चित् प्रतीयेत। १.१.५

पा १.१.१ न हि वृद्धिशब्देन अपाणिनेर् व्यवहारतः आदैच् पाणिनिकृतिम् अननुमन्यमानस्य वा। १.१.५

पा परिभाषा १ न हि संदेहाद् अलक्षणम्। १.३.२४ तं.

आश्व ५.६.३ न हि सोमेन उच्छिष्टा भवन्ति। ३.५.५२ (न सोमेन)

तैब्रा १.६.९.१,२ न हि होतारं वृणीते न आर्षेयम् (पितृयज्ञे)। ७.४.४,५; १०.८.१; ११.३.२०

शत ३.४.१.१८ न ह्यत्र अनुयाजान् यक्ष्यन् भवति। ४.१.४०,४१ चतुर् गृहीतानि आज्यानि भवन्ति, न हि अत्र अनुयाजान् यक्ष्यन् भवति (आतिथ्यायां) चतुर् गृहीतानि आज्यानि गृह्णाति, न हि अत्र अनुयाजा भवन्ति।

वाराह ३.२.१.३४ न ह्यत्र गौर् दीयते न वासो न हिरण्यम्। १०.२.३५,३८; १०.६.५८; अदक्षिणानि सत्राणि आहुः।

तां ८.६.९ न ह्यात्मानं गिरेत्। ९.२.४०

मनु ४.६३ नाञ्जलिना वारि पिबेत्। न कुर्वीत वृथाचेष्टां, न वार्यञ्जलिना पिबेत्। १.४.३० तं.

तां २०.१.४,५,६,७ नातिरात्रे गृह्णाति (षोडशिनम्)। २.४.२७; १०.८.६ ज्योतिष्टोमस्यातिरात्रे, नवसप्तदशातिरात्रे, विषुवदतिरात्रे, गोष्टोमातिरात्रे, आयुष्टोमातिरात्रे, एतेषु अतिरात्रेषु षोडशिनं गृह्णाति।

तैसं ६.३.१ नाध्वर्युर् गायेत्। ३.७.३०

आप ४.३.६ नानुयाजेषु ये यजामहं करोति। १०.८.१,४,६

सत्या २१.२.६०

तैसं २.२.५ नानृतं वदेत्। ३.४.१२,१३;४.१.४

तैसं ५.२.७ नान्तरिक्षे न दिवि अग्निश्चेतव्यः। १.२.५.१८

मैसं ३.९.४ नान्यस्य (वृक्षस्य) स्वरुं कुर्यात्, यदि अन्यस्य वृक्षस्य स्वरुं कुर्याद् अन्ये अस्य लोकम् आरोहेयुः। यूप्स्य स्वरुं कुर्यात्। ४.२.३

लाट्यायन २.१.११ नाभिचरितव्यम्। १.१.२ न व्यभिचरेत्। अभिचारो नाम परस्य नाशोपायचिन्तनम्॥

शत ३.८.३.२७ नांसयोर् अवद्यति, न शिरसो, न अनूकस्य, न अपरसक्थ्योः। १०.७.६

गोभिलगृ १.६.१८ नायज्ञियां वाचं वदेत्। ६.१.१७-२१ न्यामा.

आप ८.७.१७ नायुर्दा जुहोति, न साम गायति, न वा गमनमन्त्रं जपति। नाभिप्रवजनमन्त्रम्। वरुणप्रघासेषु अवभृथः। तत्र सौमिकाद् अवभृथाद् धर्मातिदेशः। सूत्रम्–तथा अवभृथः सोमात्। ७.३.१२

मनुस्मृ ५.८७ नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति।
आचम्यैव तु निस्नेहं गामालभ्यार्कमीक्ष्य वा॥ ६.६.२

तैब्रा ३.७.५.११,१२. नारिष्टहोमान् जुहोति। ५.२.१७ दश ते तनुवो यज्ञ यज्ञियाः (चत्वारो मन्त्राः)

तैब्रा ३.७.५-११,१२,१३ नारिष्टहोमेषु पार्वणहोमयोश्च पूर्णमासाय सुराधसे स्वाहा। ८.४.१५,१६ (नारिष्टान् जुहोति। ८.४.१९)

तैब्रा १.६.९ नार्षेयं वृणीते। न होतारम्। १०.८.१-४ न्यामा.

सत्या १.१.७३ नासोमयाजिनो ब्राह्मणस्य अग्नीषोमीयः पुरोडाशो विद्यते, एकेषाम् आग्नेयोऽष्टाकपालः, ऐन्द्राग्नो एकादशकपालो द्वादशकपालो वा। १०.८.३५-४६ न्यामा.

तैसं २.५.५ नासोमयाजी संनयेत्। ५.४.२५

मैसं १.४.११ नास्य यज्ञो व्यथते प्रजापतौ यज्ञेन प्रतितिष्ठति। ८.४.१

तैसं २.५.१ नास्याः अन्नम् अद्यात्, अभ्यञ्जनं वाव स्त्रिया अन्नं इति उपगमनप्रतिषेधो विधीयते। ३.४.१९

आप १.११.२ नास्यैज्ञतां रात्रिं कुमाराश्च न पयसो लभन्ते। ११.१.४९ नास्यैतां रात्रिं पयसाऽग्निहोत्रं जुहुयात्, यथाऽन्यस्यै देवतायै प्रत्तम् अन्यस्यै देवतायै दद्यात् तादृक् तत् स्यात्। यवाग्वा जुहुयात्। ११.१.५१

सत्या १७.१.२ निकायिनः–साहस्राः साद्यस्काः (सहस्रदक्षिणाः) ८.१.१९ चत्वारः साहस्राः, चत्वारः साद्यस्काः, चत्वारो द्विरात्राः। सूत्रम्–निकायिनां च पूर्वस्य उत्तरेषु प्रवृत्तिः स्यात्।

न्यायसूत्रं १.१.३९ निगमनं-प्रतिज्ञायाः हेतोश्च पुनर्वचनं निगमनम्। ७.१.१२

तर्कसङ्ग्रह ६ नित्यद्रव्यवृत्तयो विशेषाः। १.३.३० तं. [नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। तर्कसंग्रह (६)]

पा ४.३.१४४,३ नित्यं वृद्धशरादिभ्यो मयट् विकारे। शरमयम्। १०.४.२ न्यामा.

मर ६.८.६ आप ६.२.११ नित्यो गतश्रियो ध्रियते। १२.४.२६ नित्यो गतश्रिय आहवनीयो धार्यते।

बौधाध ३.१.१ नित्योदकी नित्ययज्ञोपवीति। ३.४.९ तं.

पा २.२.६ 'नित्यो हि अस्य न शब्दस्य सुबन्त सम्बन्धेन समासः' इति कात्यायनवार्तिकविभाषां हि पाणिनिर् आह। नानुयाजेषु। १०.८.४

तैब्रा ३.२.७.१ नियतम् अग्निसंयोगे दाह्यस्य सूक्ष्मा अवयवाः क्षीयन्ते। तेषु च कपालेषु अधःपाकार्थं पुरोडाशोऽधिश्रीयते, उपरि च अङ्गारा अभ्युद्यन्ते। ६.४.१७

भर १४.१८.१५ निरवधयन्तो चुश्रुषाकारं भक्षयन्ति (कृष्णलान् – हिरण्यशकलान्) १०.२.१४
तैसं २.५.५ निरुप्तं हविः । ३.५.१२-१५ न्यामा.
भर १४.१८.१५ निर्धानं चुश्रुषाकरणम् । १०.२.१७
आप १६.१३.७ निर्मन्थ्येन इष्टकाः पचन्ति । १.४.१२; ७.३.१८ निर्मन्थ्यशब्दः सद्यो निर्मन्थितम् अग्निम् आह । (तैसं ६.३.५ – निर्मन्थ्योऽग्निः ।)
तैब्रा ३.२.४,५ 'निर्वपणं प्रोक्षणम् अवहननम्' इत्यादयो औषधस्य हविषो धर्माः । ३.१.७
तैसं २.५.११ निवीतं मनुष्याणां, प्राचीनावीतं पितॄणाम्, उपवीतं देवानाम् । उपव्ययते देवलक्ष्मम् एव तत् कुरुते । ३.४.७,९
षड् ४.२.२२ निवीता ऋत्विजः प्रचरन्ति । ११.१.१६; १०.४.१
मैसं ४.७.६ यन् माध्यन्दिने (षोडशिनं) गृह्णीयात्, मध्यतो वज्रो निहन्यात्, तृतीये सवने गृह्णः, तत् सर्वेषु सवनेषु गृह्णीयात्, न पूर्वे सवने आर्तिं नीते । १०.५.४४

काठकसं १२.१२ यन् माल्यम् आसीत् तत् पश्चात् पर्यौहत्, सुरा वै माल्यं, ततो राजन्यम् असृजत, तस्मात् ज्यायांश्च कनीयांश्च स्नुषा च श्वशुरश्च सुरां पीत्वा सह लालपत आसते, पाप्मा वै माल्यं, तस्माद् ब्राह्मणः सुरां न पिबति, पाप्मना तेन संसृज्या इति तदेतत् क्षत्रियो ब्राह्मणं ब्रूयात् नैनं सुरां पीता हिनस्ति, य एवं विद्वान् सुरां पिबति । १.३.७ तं. (मधुसीधुविवक्षया एतत्)

तैसं ६.४.३;१.३.१३ 'यमग्ने पृत्सु मर्त्यम्' इति जपन् हविर्धाने प्रतिपद्येत । ३.६.४२ तं. यजुर्वहन्

विष्णुधर्मोत्तर २.१४४,१४५ यमं दण्डहस्तं आलिखन्ति कथयन्ति च । ९.१.६ सदण्डं महिषारूढं यमं लिखेत् पत्रे तु दक्षिणम् ।

तैआ ६.५ यमगाथा–योऽस्य कौष्ठ्यजगतः पार्थिवस्यैक इद् वशी । यमं भङ्ग्यश्रवो गाय यो राजाऽनपरोध्यः ॥ यमं गाय भङ्ग्यश्रवो यो राजाऽनपरोध्यः । येनाऽऽपो नद्यो धन्वानि, येन द्यौः पृथिवी दृढा ॥ हिरण्यकक्ष्यान् त्सुधुरान् हिरण्याक्षानयः शफान् । अश्वान् अनश्यतो दानं यमो राजाऽभितिष्ठति ॥

तैसं २.४.१४ यम् आदित्या अंशुम् आप्याययन्ति । १०.८.२२ न्यामा.

निरुक्त २.४ यमेव विद्या शुचिमप्रमत्तं, मेधाविनं ब्रह्मचर्योपपन्नम् । यस्ते न द्रुह्येत् कतमच्च नाह, तस्मै मां ब्रूयाः निधिपाय ब्रह्मन् ॥ १०.८.३९

तैआ २.१५ यं यं क्रतुम् अधीते तेन तेन तस्य अभीष्टं भवति । १.१.१

तैसं ३.१.३ यर्हि हविर्धाने प्राचीं प्रवर्तयेयुः तेन अक्षम् अब्ज्यात् । ४.१.३५

मैसं ३.९.४ यद्येकं यूपम् उपस्पृशेद् 'एष ते वायो' इति ब्रूयाद्, यदि द्वौ 'एतौ ते वायू' इति, यदि बहून् 'एते ते वायवः' इति । ९.३.५

मैसं ३.८.९ यवमतीभिर् अद्भिर् औदुम्बर्याः प्रोक्षणम् । १३.९ तं.

तैसं ६.३.३ यवमतीभिर् अद्भिः प्रोक्षणम्, अञ्जनं, परिव्याणं यूपस्य धर्माः ।

शत २.५.२.१४ यवमयेषु करम्भपात्रेषु विहितेषु । १.३.९ अतुषान् इव यवान् कृत्वा तान् अन्वाहार्यपचने ईषदिव उपतप्य तेषां करम्भपात्राणि कुर्वन्ति ।

शत ५.२.४.१० यवमयश्चरुः । १.३.८

तैसं २.४.११ यवमयो मध्यमः । १०.७.५१ मध्यः

काठकसं ६.३ यवाग्वा अग्निहोत्रं जुहोति । ५.३.१

शत ११.३.१.३ यवैर् यजेत । ३.१.१२; ६.१.१०; १२.३.११ यत् पयो न स्यात् केन जुहुयात् इति । 'व्रीहियवाभ्याम्' इति ।

तां २३.८.३ यश्चान्यतरतोऽतिरात्रः सोऽहीनः । ८.२.२९

पाम ६.१.९ यश्चोभयोर् दोषो न तम् एकश्च चोद्यो भवति । ६.६.२१; ८.३.७,१४,३७; १०.१.२५

पाउणादि १.१२४,१२५ यश्छिन्नगमनोऽश्वः स छागः छिदेर् गमेश्च छागः । ६.८.३६ छा पू खडिभ्यो गन् कित् – छो छेदने छायते छिद्यते वा यज्ञार्थं छागः पूगः खङ्गः ।

मैसं ४.४.६ यद्यौहीं दीन्यति । ४.४.१ यद्यौही विदीन्यते ।

काठकसं ८.१२ यस्तं श्वोऽग्निम् आधास्यन् स्यात् स एतां रात्रिं व्रतं चरेत्–न मांसम् अश्नीयात्, न स्त्रियम् उपेयात् । १०.६.५ (अध्वर्युः)

मनु १२.१०६ यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः । १.३.२ तं.

पाम १.१.१.२७ यस्तु प्रयुङ्क्ते कुशलो विशेषो, शब्दान् यथावद् व्यवहारकाले । सोऽनन्तमाप्नोति जयं परत्र, वाग्योगविद् दुष्यति चापशब्दैः ॥ १.३.२४ तं.

तैसं २.२.५ यस्माज्जगत्या एव अस्मिन् पशून् दधाति तस्मात् पशुमान् । १.४.२२ (यज्)

तैसं २.२.५ यस्मात् त्रिवृता एव अस्मिन् तेजो दधाति तस्मात् तेजस्वी । १.४.२२ (यत्)

तैसं २.२.५ यस्मात् त्रिष्टुभा एव अस्मिन् इन्द्रियं दधाति तस्माद् इन्द्रियावी । १.४.२२ (यत्)

तां ७.८.१ यस्माद् अपां पृष्ठे वायुना स्पृष्टे रथन्तरादीनि जातानि तस्मात् तानि पृष्ठानि स्तोत्रक्रमसु विधीयन्ते । १.४.३ तं.

तैसं २.२.५ यस्माद् गायत्र्या एव एनं ब्रह्मवर्चसेन पुनाति तेन पूत एव सः । १.४.२२ (यद्)

तैसं २.२.५ यस्माद् विराजा एव अस्मिन् अन्नादं दधाति तेन अन्नादः । १.४.२२ (यद्)

तैसं ६.४.८ यस्मान् मैत्रावरुणोऽपूर्वस्तस्मात् पयसा श्रयितव्यः । ९.१.१२ तस्मान् मैत्रावरुणं पयासा श्रीणन्ति ।

तैसं २.२.५ यस्मिन् जाते एताम् इष्टिं निर्वपति पूत एव सः तेजस्वी अन्नादः इन्द्रियावी पशुमान् भवति । ४.३.३८

मनु २.१८ यस्मिन् देशे य आचारः स सदाचार उच्यते । १.३.७ तं.

तैसं ३.५.७ यस्य खादिरः स्रुवो भवति सः छन्दसाम् एव रसेन अवद्यति सरसा अस्य आहुतयो भवन्ति । ३.६.१,५;४.३.१,१८,१९

तां १६.१.८ यस्य नवतिशतं (१९०) स्तोत्रीयाः अग्निष्टोमस्य–त्रिवृद् बहिष्पवमानं ९, पञ्चदशानि आज्यानि तानि चत्वारि ६०, पंचदशो माध्यन्दिनपवमानः १५, सप्तदशानि पृष्ठानि तानि चत्वारि ६८, सप्तदश आर्भपवमानः १७, एकविंशं यज्ञायज्ञीयम् २१=१९० । ५.३.३८

तैसं ३.५.७ यस्य पर्णमयी जुहूर् भवति न स पापं श्लोकं शृणोति । ३.६.१;४.३.१,२,१८,१९

तैसं ३.१.४ यस्य पशुर् मायुं कुर्यात्, उरो वा पादौ वा हन्यात्, स एतेन मन्त्रेण जुहुयात् 'अग्निर् मा तस्माद् एनसो विश्वान् मुञ्चतु अंहसः' ॥ ६.८.२८

तैसं ३.५.७ यस्य पालाशो जुहूर् भवति न स पापं श्लोकं शृणोति । ४.३.२ पर्णमयी ।

मैसं २.५.५ यस्य पिता पितामहः सोमं न पिबेत् । ३.१.१२

मैसं १०४.१३ यस्य पुरोडाशौ क्षायतः । ३.१.१३ तं.

तैब्रा ३.२.३.६ यस्य यावतीर् गावः स तावतीर् दोहयति । ११.१.११ उत्तराः दोहयति ।

तैसं ३.५.७ यस्य वैकङ्कती ध्रुवा भवति-प्रति एव अस्य आहुतयः संतिष्ठन्ते, अथ प्र एव जायते । ४.३.१

तैब्रा ३.७.१.९ यस्य व्रत्येऽहनि पत्नी अनालम्भुका स्यात्, ताम् अपरुध्य यजेत् । ३.४.१८

आप ९.४.४३;९.१५.१४ यस्य सर्वाणि हवींषि नश्येयुर् वा अपहरेयुर् वा, आज्येन ता देवताः परिसंख्याय यजेत । ६.४.२

आप ४.२४.३,४ यस्य सोमम् अपहरेयुर् एकां गां दक्षिणां दद्यात् अभिदग्धे पञ्चगाः । १०.३.५९

तैसं २.५.५ यस्य हविर् निरुप्तं पुरस्तात् चन्द्रमा अभ्युदियात् त्रधा तण्डुलान् विभजेत्...। ६.५.१२,१३,१४,१६

तैसं २.३.२ यस्य हिरण्यं नश्येद् एतम् एव आग्नेयम् अष्टाकपालं निर्वपेत्, सावित्रं द्वादशकपालं, भूम्यै चरुम् । ४.१.२

तैसं २.२.४ यस्याग्निर् उद्धृतोऽहुतेऽग्निहोत्रे उद्वायाद् अग्नये ज्योतिष्मते पुरोडाशम् अष्टाकपालं निर्वपेत् । ९.४.२८

तैब्रा १.२.५.३ यस्यातिरिक्तम् एकादशिन्याम् आलभेरन् अप्रियं भ्रातृव्यम् अतिरिच्येत अथ यद् द्वौ द्वौ पशू समस्येयुः कनीय आयुः कुर्वीरन् । यदि एते ब्राह्मणवन्तः पशव आलभन्ते न कनीय आयुः कुर्वीत । ७.४.१४

तैसं २.५.५ यस्याभ्युदियात् । ६.५.११ यस्य हविर् निरुप्तं पश्चात् चन्द्रमा अभ्युदियात् ।

तैसं ३.५.७ यस्याश्वत्थो उपभृत् भवति ब्रह्मणा एव अस्य अन्नम् अवरुन्धे । ४.३.१

आप १४.२४.१,२ यस्याश्विने शस्यमाने सूर्यो न उदियाद् अपि सर्वा दाशतयीर् अनुब्रूयात् । २.१.२३

मैसं १.८.९ यस्याहुतम् अग्निहोत्रं सूर्योऽभ्युदियात् ... अग्निं समाधाय वाचं यत्वा दम्पती सर्वाहम् उपासीयाताम् । १२.३.१७

तैब्रा २.१.१०.३ यस्याहुतम् अग्निहोत्रं सूर्योऽभ्युदियात् मैत्रं चरुं निर्वपेत् सौर्यम् एककपालम् । १२.३.१७

शत १.६.३.१९ यस्यै कस्यैचिद् देवतायै हविर् निर्वपन् आज्यस्यैव नौ पुरस्ताद् यजन् । २.२.३तै.

तैसं ३.५.७ यस्यैवंरूपाः स्रुचो भवन्ति सर्वाणि एनं रूपाणि पशूनां संतिष्ठन्ते नास्य अपरूपम् आत्मन् जायते । ३.६.६

तैब्रा ३.७.१.७ यस्योभयं हविर् आर्तिम् आर्च्छेद् ऐन्द्रं पञ्चशरावम् ओदनं निर्वपेत् । ६.४.२२,२८,३१

मैसं १.८.७ यस्योभौ अनुगतौ अग्नी अभिनिम्लोचेद् यस्य वाऽभ्युदियात् पुनराधेयम् अस्य

आप ५.२९.१३ प्रायश्चित्तिः । ६.४.२६

तैसं २.१.२ यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेय स एताम् अविं वशाम् आदित्येभ्यः कामाय आलभेत । ९.३.४१

तां २२.१५.१,२ 'यः कामयेत बहुस्यां प्रजायेय' इति एतेन कुसुरुविन्ददशरात्रेण यजेत । १०.५.८१

तां २१.१४.१,२,७,८,१० 'यः कामयेत बहु स्याम्' इति स एतेन पञ्चशारदीयेन अहीनेन मारुतीयेन यजेत, वैशाख्यायाम् अमावास्यायां सप्तदश मारुतीर्निवत्सा (त्रिसंवत्सराः) अप्रवीताः (अप्रसूताः) उपाकरोति, सप्तदश पृश्नीन् उक्षणस्तान् पर्यग्निकृतान् प्रोक्षितान् इतरा आलभन्ते प्रेतरान् उत्सृजन्ति । ततः संवत्सरे राजीवा आनयन्ति तांश्चैव उक्षणस्तान् पर्यग्निकृतान् इतरा आलभन्ते प्रेतरान् उत्सृजन्ति । ११.२.५४

आप १.१६.२ यः पशुकामः स्यात् स गोदोहनेन (अपां) प्रणयनम् अग्निर्वर्तयेत् । ८.१.२३

मैसं २.२.१३	यः पशुकामः स्यात् सोऽमावास्यायाम् इष्ट्वा वत्सान् उपाकुर्यात्, ये पुरोडाश्याः स्युः तान् त्रेधा कुर्याद्, ये क्षोदिष्ठास्तं (स्थविष्ठाः) अग्नये सनिमतेऽष्टाकपालं निर्वपेद्, ये मध्यमास्तं विष्णवे शिपिविष्टाय शृते चरुं, ये स्थविष्ठास्तम् इन्द्राय प्रदात्रे दधन् चरुम्। ६.५.१,५;९.४.४३ अपिष्ठाः (श)
षड् ४.१.१४	यः पशुर् अतिरिच्येत स ऐन्द्राग्नः कार्यः। १०.६.४२
तां १८.२.१२	'यः पशून् दद्यात् स ब्रह्मणे' इति गम्यते। १०.३.७०
मैसं १.४.५	यः पूर्वेद्युर् अग्निं गृह्णाति स श्वोभूते देवताः यजते। १२.४.२२
तैसं २.१.१	यः प्रजाकामः पशुकामो वा स्यात् स एतं प्राजापत्यं तूपरम् आलभेत। १.२.१०
तैसं ६.३.३	यः प्रथमः शकलः परापतेत् स स्वरुः कार्यः। ४.२.४; ११.२.९ यः प्रथमः शकलः परा पतेत् तम् अपि आहरेत् स तेजसम् एव एनम् आहरेत् (यूपस्य स्वरुं करोति। मैसं ३.९.२)
तैसं ६.६.११	यः षोडशी गृह्यते इन्द्रियम् एव तद् वीर्यम् आत्मन् धत्ते। १०.५.१४ (यत्)
आप १४.२३.१	यः सत्राय आगुरते स विश्वजिताऽतिरात्रेण यजेत। ९.४.३२
पा २.३.१३	यः सम्प्रदानात् प्राग्भावी तदुद्देशः स चतुर्थ्या लक्षयितव्यः। २.२.२३ तं. चतुर्थी संप्रदाने।
भर ५.२.६	यः सोमयागऋतुम् आदधीत स न प्रतीक्षेत नक्षत्रं नापि ऋतुं तावत्त्वेव आदधीत। ५.४.६ अथ यदि सोमेन यक्ष्यमाणः स्यात् न ऋतून् न नक्षत्रं यस्मिन्नेकस्मिन् ऋतौ आदधीत।
आप ५.३.२१	यः सोमेन यक्ष्यमाणो अग्नीन् आदधीत स न ऋतुं प्रतीक्षेत न नक्षत्रम्। ५.४.६,१५
काठकसं ८.१	यः सोमेन यजेत स अग्निम् आदधीत। ५.४.७ 'सोमेन यज' इति अग्निम् आदधीत।
मैसं १.६.११	यः सोमेन अयक्ष्यमाणो अग्निम् आदधीत स पुरा संवत्सराद् हवींषि निर्वपेत्। ५.४.८
शत १.३.६.१९	या आज्यभागादिषु देवता यष्टव्यास्ता एव इह देवताः (उत्तमप्रयाजे स्वाहाकारे)। १०.१.१४ आज्यभागौ अग्नीषोमाभ्यां यजन्ति।
ऋ. १०.९७.१	या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनैनु बभ्रूणामहं शतं धामानि सप्त च॥ १०.५.१४
आपध १.४.५.१	याजनाध्यापनपरिग्रहाः ब्राह्मणस्य एव वृत्त्युपायाः। १२.४.४३
तैसं ४.२.६	या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा। मन्दामि बभ्रूणामहं शतं धामानि सप्त च॥ १०.५.१४
तैसं ६.३.११	याज्यर्धर्चा वसां जुहोति। ११.२.२४ अर्धर्चे वसाहोमं जुहोति।
मैसं ३.१०.४	
तैसं ३.४.१०	याज्यानुवाक्ये तु विपर्ययेण आम्नाते, विपर्ययेण कर्तव्ये। ५.१.३ पुरोनुवाक्याम् अनूच्य याज्यया जुहोति सदेवत्वाय।
आप ४.१३.१०	याज्याम् अन्वाह पुरोनुवाक्याम् अन्वाह। २.१.१३;१०.४.३९
आप २४.१४.३	याज्याया अधिवषट् करोति। ३.५.४४,४५;१२.३.२७

आश्व ५.५.२२	याज्यायाम् अपनीयमानायां नापनीयेत भक्षणम्। प्रवरवत्। ३.५.४४,४५ सूत्रम्-याज्यापनये नापनीतो भक्षः प्रवरवत्। यष्टुर् वा कारणागमात् याज्याया अधिवषट् करोति। वषट्कारनिमित्ता च शेषभक्षाः। तस्माद् भक्षानापनीयत। याज्याम् अपनीयमानायां प्रवरे नापनीयते। ३.५.४४-४६ सूत्रम्- प्रवृत्तत्वात् प्रवरस्य अनपायः।
आप ७.२५.१०	याज्यार्धचान्ते वसां जुहोति। ११.२.२४,२५;११.४.३३,३४,३५,३६
अथर्व ३.१०.२ कथा	यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम्। संवत्सरस्य या पत्नी, सा नोऽस्तु सुमङ्गली॥ अष्टकायै सुराधसे स्वाहा॥ १.३.१ माध्याम् अष्टम्याम् (एकाष्टकायाम्) अभीज्यमानायाम् अयं मन्त्रः।
तैसं १.२.११	या ते अग्ने अयाशया रजाशया हराशया तनूर् वर्षिष्ठा गह्वरेष्ठा उग्रं वचोऽपावधीं त्वेषं वचोऽपावधीं स्वाहा। २.१.४८
तैसं १.२.१	याते अग्नेऽयाशया तनूर् वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा।
तैसं १.२.११	या ते अग्ने रजाशया तनूर् वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा।
तैसं १.२.११	या ते अग्ने हराशया तनूर् वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा। २.१.४८
पा ३.२.४५,३८	या न आशितं भवं करोति नासौ बलकरणी तस्माद् या न आशितं भवा ना. सौ दक्षिणा। ९.३.४५
अथर्व ३.१०.२	या पत्नी संवत्सरस्य, सा नोऽस्तु सुमङ्गली। ६.५.३५
मैसं १.१०.११	या पत्या क्रीता सती अथ अन्यैश्चरति। ६.१.११ (अनृतं वा एषा करोति+)
मैसं ३.६.३	यां प्रथमां रात्रिं दीक्षितो जागर्ति तथा स्वप्नेन व्यावर्तते। १२.१.१८
पैत्रा ३.३७	याम्याः शंसति। २.१.२२;७.२.१७ यामीं पूर्वां शंसेत् पित्र्याम्। (यामेन स्तुवन्ति-साम ६३०-३२-तां. ९.८.३)
शत १.३.१.२६ शत १.९.१.२१ तैसं ३.५.९	यां वै काञ्चन यज्ञे ऋत्विज आशिषम् आशासते यजमानस्य एव सा। ३.८.२७ यां वै काञ्चिद् अध्वर्युश्च यजमानश्च देवताम् अन्तरितस्तस्या आवृश्चेत् यत् प्राजापत्यं दधि (ग्रहं) गृह्णाति। ४.४.८;१०.८.५०
वाराह १.१.१.८६	यावज्जीवं जुहुयात्, यावज्जीवम् अभ्यसेत् इति। २.४.२
आप ३.१४.८,१३	यावज्जीवं दर्शपूर्णमासाभ्यां यजेत। २.४.१;६.२.२३,३१;६.३.१;६.५.३८; ८.१.२०;१०.८.३६
वाराह १.१.१.८६	यावज्जीवमग्निहोत्रं जुहोति। २.४.१;६.२.२३.३१;६.३.१;६.५.३८
तैसं २.३.१२	यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत्। २.१.३३;३.४.३०;११.४.३९
तैसं २.६.३	यावत् कपालं पुरोडाशं प्रथयति। ११.४.४१ सर्वाणि कपालानि अभिप्रथयति तावतः पुरोडाशान्।

आप १०.४.९,१० यावत्या वाचा कामयेत तावत्या दीक्षणीयायां ब्रूयात्, मन्द्रं प्रायणीयायां, मन्द्रतरम् आतिथ्यायाम्, उपांशु उपसत्सु। ९.१.३,२५ यावद् अस्य वाग्भवति तावती दीक्षणीयायां...

तां १६.८.६ यावद् अस्य साहस्रस्य उत्तरा गौः समाहिता भवति तावद् अस्मात् लोकाद् असौ लोकः। ८.१.१९

तां २५.४.१ यावद् दशरात्रो महाव्रतम् उदयनीयोऽतिरात्रः। ८.२.२९

वाराह २.२.५.२६ यावन्ति आग्नेयानि सूक्तानि दाशतय्यानि सर्वैर् इष्टका उपाधीयन्ते। १०.६.७२ दाशतय्यैर् वा आग्नेयैः सूक्तैः प्रतिसूक्तम् इष्टका उपदधाति।

सत्या १.१.७३ यावेतौ आग्नेयश्च ऐन्द्राग्नश्च। १०.८.३९ एकेषाम् आग्नेयोऽष्टाकपालः ऐन्द्राग्नश्च एकादशकपालो वा द्वादशकपालः।

मनु १२.९५ या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रोक्ताः तमोनिष्ठा हि ताः स्मृताः। १.३.५ तं.

आप ३.१०.३ या सरस्वती वेशमतीति पशुपुरोडाशो न स्यात्। १२.२.७

तैब्रा २.५.८.६ या सरस्वती वै शम्भल्या तस्यां मे रास्व।

मैसं ४.३.६ यासु स्थालीषु सोमाः स्युः ते चरवः स्युः। तस्मात् स्थाल्यां चरुं श्रपयेत्। १०.१.४८

मैसं ३.६.१० याः पशूनाम् ऋषभो वाचः। ३.२.१०

पाम २.२.२९ वा १३८५ युगपदधिकरणवचनायां द्वन्द्वस्मृतेर् द्विवचनबहुवचनोपपत्तेः। ६.१.२२ सिद्धं तु युगपदधिकरणवचने द्वन्द्ववचनात्। युगवस्त्रोपदंशिते ईषाचक्रादिसंनिधाने च 'अक्षम् आनय' इत्युक्ते यानाक्षम् अधिकृत्य ब्रूते इति गम्यते न तु विदेवनाक्षम्। ६.८.३५ एवम् अग्नीषोमीयं पशुम् आलभतेऽत्र पशुशब्देन छागो गृह्यः- अजोऽग्नीषोमीयः-(काठकसं २४.७)।

पा ७.१.७१,७०,५८ युङ्। युजेर् असमासे नुम्- युजेर् असमासे सर्वनामस्थाने परतः नुम्। युङ् युञ्जौ युञ्जः, युञ्जं युञ्जौ युगः।

तैसं ४.१.१ युञ्जानः प्रथमं मनः। ३.१.१४ न्यामा.

तैसं ३.१.६ 'युनज्मि ते पृथिवीं ज्योतिषा सह' इति ध्रुवाम् अभिमृशति, 'युनज्मि वायुम् अन्तरिक्षेण ते सह' इति उपभृतं, 'युनज्मि वाचं सह दिवा सूर्येण' इति जुहूम्। १२ १.११

साम १००१ ऋ ९.१९.२ युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः॥ इति

तां ६.१०.१४ द्वयोर् यजमानयोः प्रतिपदं करोति। ३.३.१७,१९; ६.२.३,११; ९.३.१५

तैब्रा ३.६.१.३ युवा सुवासाः परिवीत आगात्, स उ श्रेयान् भवति जायमानः। तं धीरासः

ऋ ३.८.४ कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥ यूपे परिव्ययमाणे मन्त्रः। ३.८.२१; ४.४.२४; १२.३.३०

पा १.४.१०५,७,८,१ युष्मदस्मदुपपदादिषु मध्यमाद् यस्तिङस्त्रीणि त्रीणि। प्रथममध्यमोत्तमाः। ३.४.१३ तं.

पराशरस्मृ १२.२५ यूपचित्याद्युपस्पर्शने स्नायात्। ९.३.९ तं. चैत्यवृक्षश्चितियूपश्चण्डालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत्॥

वाराह १.६.१.१५ यूपं तक्षति। २.१.९,१२

तैसं ६.३.३ काठकसं २६.३ यूपमच्छेष्यता स्थाणौ स्थाणवाहुतिं जुहोति । आत्रश्चने जुहोति ।
मैसं ३.९.२ यूपमच्छेष्यता (वैष्णवीम् अनूच्य) होतव्यं, न हि दीक्षितस्य अग्नौ जुहोति, आज्यं च अरणिं च आदाय यूपस्यान्तिके मथित्वा यूपाहुतिं जुहोति । १०.१.१०,११,१२; ११.२.२७
तैसं ६.३.४ यूपं मिनोति । ३.७.१३-१४ न्यामा.
मैसं ३.९.२ यूपस्य स्वरुं करोति । ४.२.१,३,५,६; ४.४.२५; ११.३.८,९
मैसं ३.९.२ यूपस्यान्तिके अग्निं मथित्वा यूपाहुतिं जुहोति । ११.२.२६,२७ यूपस्यैवान्तेऽग्निं मथित्वाऽथ होतव्यम् । यूपस्यान्तिके अग्निं मथित्वा । ११.२.२७,२८ सूत्रम् – अनुवादमात्रकम् अन्तिकस्य । ११.२.२९ सूत्रम्–अशास्त्रत्वाच्च देशानाम् । (अन्तिकदेशः)
कात्या १४.५.३५ यूपहस्तिनो दानम् आचरति । १.३.४ यूपपरिव्याणकं शाटकं यूपहस्तिशब्देन निर्दिश्यते, तम् अध्वर्युर् हरति । उदवसानीयान्ते यूपवेष्टनानि अध्वर्यवे ददाति ।
तैसं ६.३.४ यूपः किल अग्नौ प्रक्षेप्तव्यः यत् स्वरुः प्रक्षिप्यते तेन यूपः प्रक्षिप्यते । ४.४.२८
शत ४.२.१.२१ स्वरुं यूपस्य संस्थिते सोमे प्र प्रस्तरं हरति, जुहोति स्वरुम् अयज्ञवेशसाय ।
शत ३.७.१.१० यूपाय आज्यमानाय अनुब्रूहि । ९.२.४१,४३
तैब्रा ३.८.१९.२ यूपे पशुं नियुञ्जन्ति । १०.३.१९
तां १७.१३.१०
वाराह १.६.३.२० यूपाय परिवीयमाणाय अनुब्रूहि । ३.८.२१ तं.
मैसं ३.९.३ यूपो वै यज्ञस्य दुरिष्टम् आमुञ्चते यद् यूपम् उपस्पृशेद्, अथ यज्ञस्य दुरिष्टम् आमुञ्चेत् तस्माद् यूपो न उपस्पृश्यः । ९.३.९
सत्या १६.१.३५ ये ऋत्विजस्ते यजमानाः – अध्वर्युर् गृहपतिं दीक्षयति । ३.७.३७
मैसं २.२.१३; तैसं २.५.५ ये क्षोदिष्ठास्तेषां शृतसहितानां विष्णुः शिपिविष्टो देवता विधीयते । ६.५.३
तैब्रा ३.५.७.५ ये दैव्या ऋत्विजस्तेभिरग्ने । १०.४.३२-३३ न्यामा.
मैसं ३.२.३ ये द्वे गायत्र्यौ सा एका जगती । ८.३.३५
तैसं ३.४.६ येन कर्मणा ईर्त्सेत् तत्र जयान् जुहुयात्, हाष्टभृतो जुहोति, अभ्यातानान् जुहोति । ३.४.२५
मनुस्मृ ५.१७८ येनास्य पितरो याता येन याताः पितामहाः । तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते । १.३.७ तं.
तां. २५.१०.३ ये पुरोडाशिनस्ते उपविशन्ति ये सांनाय्यिनस्ते वत्सान् वारयन्ति । २.४.८,२८
आप ९.११.९ ये पुरोदञ्चो दर्भास्तान् दक्षिणाग्रान् सृणीयात् । ३.४.९+४ तं.
तैसं ६.२.१ येभिऽधुष्वन्ति जुह्वति च ते भक्षयन्ति । ३.५.३२ इविर्धाने ग्रावभिर् अभिषुत्य आहवनीये हुत्वा भक्षयन्ति ।
तैसं २.५.५; मैसं २.२.१३ ये मध्यमा ये स्थविष्ठा ये क्षोदिष्ठाः । ६.५.२२ अणिष्ठाः
तैसं २.५.५ ये मध्यमास्तेषाम् अग्निर् देवता । ६.५.३ ये मध्यमास्युस्तान् अग्नये दात्रे पुरोडाशम् अष्टाकपालं कुर्यात् ।
मैसं ४.२.१३ ये मां अधुक्षन्त ते मां प्रत्यमुञ्चत । २.१.२२ ये माऽधुक्षत ते मा प्रत्यनुदन्त । (ये मां दुग्धवन्तः ते एव मां निराकृतवन्तः । तं) (परिदेवनम्)

आप २१.१२.१६ ये यजमानास्ते ऋत्विजः । ६.६.१९,२० सूत्रम्–अपि वा यजमानाः स्युर् ऋत्विजाम् अभिधानसंयोगात् तेषां स्याद् यजमानत्वम् । १०.६.५२

बाराह ३.२.२.२८ 'ये यजामहे स्वाहा अग्निम्' इति निगदेन मान्त्रवर्णिको देवता विधिस्तः प्रकृता देवता । १०.१.१४

भर १३.२५.५ ये शुक्रामन्थिप्रचारे सवनमुखीयाः ऐन्द्रास्ते भवन्ति ध्रुवचमसाः । ३.२.२८

मैसं १.१.६ येषां (शाखिनां) 'कुक्कुटोऽसीति' अश्मादानमन्त्रो न समाम्नातः तेषाम् अपि हि इष्यते 'कुक्कुटोऽसीति' अश्मानम् आदत्ते 'कुटरुरसीति' वा । २.४.३०

बाराह १.३.७.४,७ येषां यागानाम् अपरयोर् अग्न्योर् होमः, तेषां प्रवृत्तिः स्यात् पत्नीसंयाजानाम् अविरोधात् । ८.४.२४

तैसं २.५.५ ये स्थविष्ठास्तान् इन्द्राय प्रदात्रे दधनि चरुं, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम् । ९.४.४१

तैसं २.५.५ ये स्थविष्ठास्तेषां दधिसहितानाम् इन्द्रो देवता । ६.५.३

तैसं ५.४.१ ये हि जनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषाम् एतानि ज्योतींषि नक्षत्राणि तथा च एष ज्योतिष्मन्तं पुण्यलोकं जयति । १.३.३० तं.
सुकृतां वा एतानि ज्योतींषि यत् नक्षत्राणि तान्येव आप्नोति ।

मैसं ३.२.२ ये हि द्वे गायत्र्यौ सा एका जगती । ८.३.१३,२२,३२,३५;८.३.१४ (एका जगती द्वे गायत्र्यौ) ये हि द्वे गायत्र्यौ सा जगती ।

तैब्रा ३.६.८.१ यैव वशा सैव छागा । २.१.२० छागस्य वपाया वशायाम् अर्थसमवायित्वात् ।

तैसं ६.१.३ योक्त्रेण पत्नीं संनह्यति मेखलया यजमानं मिथुनत्वाय । ६.१.१८;१२.१.२८
मेखलया यजमानं दीक्षयति, योक्त्रेण पत्नीं मिथुनत्वाय ।

वायुपुराण १.१३.२.२१ योगजन्याणिमाद्यष्टगुणैश्वर्यफलानि – अणिमा महिमा चैव लघिमा प्राप्तिरीप्सिता । प्राकाम्यं च वशित्वं च यत्र कामावसायिता ॥ १.३.२७ तं.

आप ५.२६.३ योऽग्नीन् आधाय भाग्यज्यानिं पुत्रज्यानिं जीयेत स पुनरादधीत । १०.३.३० (ज्यानिम् = हानिम् ।)

तैसं ३.३.४ योऽदाभ्यं (ग्रहं) गृहीत्वा सोमाय यजते । ५.३.१६ जुहोति ।

तैसं ६.१.११ यो दीक्षितो यद् अग्नीषोमीयं पशुम् आलभते । २.२ १७;३.६.१८,३१; ३.७.१३,४३;३.८.३१;४.१.११,२७;४.२.१;४.४.२;६.३.२८;६.८.३०; ८.२.१०;९.३.१,११,१५,२२,२९;९.४.१;१०.१.९;१०.३.१;१०.४.३२; १०.७.१,१०,१२,१८;१०.८.७२,७३

तैसं ६.१.११ यो दीक्षितो यद् अग्नीषोमीयं पशुम् आलभते वरुणपाशाभ्याम् एव मुच्यते । १०.१.१९

निरुक्त १.८ योऽध्वरं युनक्ति सोऽध्वर्युः । १०.३.६३

तैसं ५.४.२ यो न प्रतितिष्ठति तस्य एषा (षष्ठी) चितिर् उच्यते । ४.४.१७,१८
योऽग्निं चित्वा न प्रतितिष्ठति अथ षष्ठीं चितिं चिनुते ... प्रतितिष्ठत्येव ।

पाम १.१.१ योऽप्ययम् अनियमोऽभिहितो यद्यैव नित्यः शब्दोऽथापि कार्यः उभयथाऽपि लक्षणं प्रवर्त्यम् । १.३.२४ तं.

तैसं १.५.१ यो बर्हिषि रजतं दद्यात् पुराऽस्य संवत्सराद् गृहे रोदनं भवति । १.३.१०

आप १.९.२६.८ यो ब्रह्मचारी अवकिरेत् स गर्दभं पशुम् आलभेत । ६.८.२२ न्यामा.

मैसं १.६.८ यो ब्रह्मवर्चसकामः स्यात् तस्य सर्वाणि हवींषि निरूप्याणि। समानबर्हींषि भवन्ति। ११.४.१४

तैसं २.६.१० यो ब्राह्मणाय अवगुरेत् तं शतेन यातयेत्। ३.४.२३ न्यामा.

तैआ २.८ यो मासः स संवत्सरः। ६.७.३१,३९ यो वै...

मैसं ४.२.६ यो वा अध्वर्योः स्वं वेद स्ववान् भवति एतद् वा अध्वर्योः स्वं यद् आश्रावयति। ३.७.४३,४८

तैसं ३.१.२ यो वा अध्वर्यो स्वं वेद स्ववान् एव भवति, स्रग्वा अस्य स्वं, वायव्यम् अस्य स्वं, चमसोऽस्य स्वं यद् वायव्यं, वा चमसं वा अनन्वारभ्य आश्रावयेत् स्वाद् इयात् तस्माद् अन्वारभ्य आश्राव्यं स्वादेव नेति। ३.७.४३,४८

पाम १.१.१.३४ यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवति। १.३.२४ तं.

तैसं २.६.३ यो विदग्धः स नैर्ऋतो, योऽशृतः स रौद्रः, यः शृतः स दैवतः तस्माद् अविदहता श्रपयितव्यं सदैवतत्वाय। १.२.२४; ३.४.११

तां ८.८.१८-२० यो वृष्टिकामः स्याद्, योऽन्नाद्यकामो, यः स्वर्गकामः स सौभरेण स्तुवीत, सर्वे वै कामाः सौभरे, हीष् इति वृष्टिकामाय निधनं कुर्यात्, 'ऊर्ग्' इति अन्नाद्यकामाय 'ऊ' इति स्वर्गकामाय सर्वेषु एव कामेषु प्रतितिष्ठति। २.२.२८

तां १६.१.४ यो वै त्रिवृदन्य यज्ञक्रतुम् आपद्यते स तं दीपयति, यः पञ्चदशः स तं, यः सप्तदशः स तं, य एकविंशः स तम्। ५.४.४३,४४

तैआ २.८ यो वै मासः स संवत्सरः। ६.७.३९

ऋ. ७.१०४.१६ 'यो वै रक्षाः शुचिरस्मि' इत्याह। २.१.३३ न्यामा.

तैसं ५.५.१ यो वै संवत्सरं उख्यम् अभृत्वा अग्निं चिनुते, यथा सामि गर्भो विपद्यते तादृग् एव तद् आर्तिम् आर्च्छेत्, वैश्वानरं द्वादशकपालं पुरस्तात् निर्वपेत्, संवत्सरो वै अग्निर् वैश्वानरो यथा संवत्सरम् आप्त्वा काले आगते विजायते, एवम् एव संवत्सरम् आप्त्वा अग्निं चिनुते न आर्तिम् ऋच्छति, एषा वा अग्नेः प्रिया तनूः, प्रियाम् एव अस्य तनुम् अवरुन्धे, त्रीणि एतानि हवींषि, त्रय इमे लोकाः, एषां लोकानाम् आरोहाय। ४.४.१२

वैशेषिकसूत्र ३.२.४ योऽसौ प्राणिति अपानिति उच्छ्वसिति निमिषति सशरीरी यज्ञायुधि। १.१.५

शांब्रा २.७ प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छा द्वेष-प्रयत्नाश्च आत्मनो नवगुणाः। सोऽयं पुरुषो यः प्राणिति अपानिति।

तैसं १.१.९ योऽस्मान् द्वेष्टि यं च वयं द्विष्मः। ६.८.२८

आर्षेयब्रा १.१.१ यो ह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मन्त्रेण यजते याजयति वा अध्या-पयति वा (स्थाणुं वर्च्छति गर्तं वा पात्यते प्रमीयते वा, पापीयान् भवति, तस्माद् एतानि मन्त्रे मन्त्रे विद्यात्)। १.३.२ तं.

तां २५.४.५ यो होता सोऽध्वर्युः। ३.८.२१

आश्र १.१.४७ यो ह्यग्नौ सति सर्वं प्रायश्चित्तं जुहोति। १२.१.४ (क्रमविपर्यासनिमित्तं प्रायश्चित्तं क्रियते +)

तां ७.५.१२-१५ यौधाजयं साम– ९.२.२५/२ यद् एतद् रौरवं यौधाजयं च द्वे सामनी तयोः पूर्वा बृहती उत्तरा विष्टारपङ्क्तिः तयोश्च प्रगाथः।

साम ६७५ ऋ ९.१०७.४ पुनानः सोम धारयाऽपोवसानो अर्षसि। आ रत्नधा योनिमृतस्य सीद स्युत्सो देवो हिरण्ययः॥

साम ६७६ ऋ ९.१०७.५ दुहान ऊधर् दिव्यं मधुप्रियं प्रत्नं सधस्थमासदत्। आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर् धौतो विचक्षणः॥ ९.२.२५/२

तैसं १.१.५ रक्षसां भागोऽसि वायुर् वो विनक्तु। ४.१.२६ न्यामा.

पाम १.१.१.१८ रक्षार्थापि ..... वेदरक्षाहेतुर् व्याकरणाध्ययनं-रक्षार्थं वेदानां व्याकरणम् अध्येतव्यम्। लोपागमवर्णविकारज्ञो हि सम्यक् वेदान् पालयति॥ १.३.२४ तं.

तैसं १.३.२;६.२.११ रक्षोहणो वलगहनो वैष्णवान् खनामि। ११.४.५२ उपरवमन्त्रः।

तैब्रा १.७.३.१ रत्निनाम् एतानि हवींषि। १०.१.१-३ न्यामा.

आप १८.५.६ रथघोषेण माहेन्द्रस्य स्तोत्रम् उपाकरोति। १०.४.१ दुन्दुभिघोषेण।

तैब्रा १.१.८.१ रथन्तरं गायति। ९.२.३ कवतीषु रथन्तरं गायति।

तां ७.७.१५ रथन्तरधर्माः– नोच्चैर् गेयं, न बलवद् गेयं, रथन्तरे प्रस्तूयमाने संमीलेत् स्वर्देशं प्रतीक्षेत। ९.२.४७

साम ६८०,६८१ रथन्तरम् उत्तरयोर् गायति। ७.२.१,१२;९.२.२३,३२,३४;१०.६.३ उत्तरार्चिके पठितयोः ६८०,६८१ ऋचोर् गायति।

तां ७.७.१८ रथन्तरम् उत्तरयोर् न पश्यामि इति विश्वामित्रस्तपस्तेपे। ७.२.१०,१२ रथन्तरं क्षिप्रं गायति।

काठकसं ३२.२ साम६८२-८४ रथन्तरं पृष्ठं भवति। ९.२.८,२०,२५,४६;१०.६.५;१०.७.५१

तां १४.९.७ रथन्तरं बृहद् वैरूपं वैराजं शाक्वरं रैवतं तृचे गातव्यम्।

तैब्रा १.२.२.३ ७.३.९;९.२.१;१०.६.१

तां ११.४.६ रथन्तरं भवति ब्रह्म वै रथन्तरं, ब्रह्म प्रायणीयम् अहः, ब्रह्मणः एव तद् ब्रह्म आक्रम्य प्रयन्ति। २.१.१ तं.

साम ६८० रथन्तरं शूरादिकं स्तुतिं कुर्वन् पृष्ठं साधयति। ९.२.४७ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशम् ईशानमिन्द्र तस्थुषः॥

साम ६८०,६८१ रथन्तरं योन्युत्तरयोर् गायन्ति। १०.४.४७,४८ पूर्वार्चिके पठिता योनिभूता ऋक् २३३ पुनर् तयैव सह उत्तरार्चिके पाठितयोः ऋचोः ६८१ गायन्ति।

साम २३३ तां ४.४.१० रथन्तरस्य योनिर् बृहती–'अभि त्वा शूर नोनुमो' इति (२३३) पूर्वार्चिके योनिभूतायाः ऋचः बृहतीछन्दः।

ऋ ७.३२.२२ रथन्तरस्य योनिम् अनुशंसति। ७.२.१७ शंसतित्वात् ऋचि शंसति साम्नि तु स्तौति अभि त्वा शूर नोनुमो ...

साम ६८० ऋ ७.३२.२२ रथन्तरस्य योनिर् बृहती-अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥

साम ६८१ ऋ ७.३२.२३ न त्वा वाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते । अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ अनयोः प्रगथने कृते काकुभः प्रगाथः । ९.२.२५/१

तां ७.७.५ बृहत्याश्चतुर्थं पादं पुनरावर्त्य विष्टारपङ्क्त्योश्च पादद्वयं मिलित्वा एकां ककुभं कुर्यात्, तस्या एव द्वितीयपादं पुनरावर्त्य अवशिष्टपादद्वयेन अन्या ककुभं कुर्यात्, एवं तृचं कृते प्रगाथः काकुभो भवति ।

तां ४.४.१० रथन्तरस्य योनिर् बृहती, एतद् वै रथन्तरस्य स्वम् आयतनं यद् बृहती । ९.२.२५/१

तां ७.७.१५ रथन्तरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेत । ७.२.१२ (तां ७.७.९-यद्

जैब्रा १.३२७ रथन्तरं प्रस्तौति समुद्रम् अन्तर्धाय उद्गायेद् वाग् इति आदेयं वाग्वै समुद्रः ।)

तां ७.७.१५ रथन्तरे प्रस्तूयमाने संमीलेत् स्वर्दृशं प्रतिवीक्षेत् । ९.३.४७;१०.६.३

वाराह ३.२.७.१३ रथाक्षमात्राणि यूपान्तरालानि भवन्ति । २.४.८,२६

आप १४.५.१७

तैसं ५.५.२ 'रश्मिरसि क्षयाय त्वा' इत्यादयो मन्त्राः स्तोमभागाः तान् अधीयानो ब्रह्मत्वम् अर्हति, वसिष्ठाय एतान् स्तोमभागान् इन्द्रोऽब्रवीत् ततो वासिष्ठ-पुरोहिताः प्रजा अजायन्त । ६.६.२४-२६ न्यामा.

पा. ५.२.९५;८.२.९,१६ रसादिभ्यो मतुप् । ३.१.१२ तं. मादुपधायाश्च मतोर्वस् अयवादिभ्यः मकारान्तात् मकारोपधात् च अकारान्तात् अकारोपधात् च मतोर्वस् अयवादिवर्जम् ॥

तैब्रा १.७.९.३ राजन्यं जिनाति । ४.४.१

कात्या ३.३.८ राजन्यात्रिबध्रिअश्वसिष्ठवन्यशुनकादीनां कण्वकश्यपसंकृतीनां नाराशंसो द्वितीयः प्रयाजः तनूनपात् इतरेषाम् । ६.६.१

तां १९.१७.४ राजपुरोहितौ यजेयाताम् । १०.२.४१,४३ एतेन मरुत्स्तोमेन राजपुरोहितौ

कात्या २२.११.२० सायुज्यकामौ यजेयाताम् ।

आश्व ९.९.१९ राजसूयेन स्वाराज्यकामो यजेत । ४.४.१;१०.१.५;११.२.१२,१४

तां १८.८,९ राजसूये अभिषेचनीयदशपेयौ एकाहौ । ११.२.५८

तैब्रा २.८.९.८ राजाचिद् यं भगं भक्षीत्याह । २.१.३३ न्यामा.

ऐब्रा ८.१४ राजानम् अभिषेचयेत् । २.३.३ तं.

शत ५.३.१.१३ राजा राजसूयेन यजेत । १.३.१९; २.३.३;११.४.९ राजा वै राजसूयेन इष्ट्वा भवति ।

आश्व ९.९.१९ राजा राजसूयेन स्वाराज्यकामो यजेत् । २.३.१

शत ५.१.१.१० राजा वै राजसूयेन इष्ट्वा भवति । १.३.१९

गौतमध १४ राजा सर्वस्य ईष्टे ब्राह्मणवर्जम् । ६.७.३ न्यामा.

पाधातुपाठ ८२२ राजृ दीप्तौ । २.३.३ तं.

पा ५.१.१२४.३ राज्ञःकर्म राज्यम् । २.३.३ गुणवचनब्राह्मणादिभ्यः कर्मणि भावे च ष्यञ् । ब्राह्मणादिगणपाठे राजन् पठितः ।

पा ४.१.३७ राज्ञा च कार्याविघातार्थं ब्राह्मणानां च स्वाध्यायानिवृत्यर्थम् अशौचादीनाम् अल्पावधिः । १.३.४ तं.

पा ४.१.३७ राज्ञोऽपत्यं राज्यम्। २.३.३३ तं. राजश्वशुराद् यद्-राजन्यः (जातौ) श्वशुर्यः तस्यापत्यम्। (पा ४.१.९२-१७३ राज्ञोऽपत्ये जातितो ग्रहणम्। २.३.३ तं.)

महाभारत ३.२९०.२० रामरावणयोर् युद्धं रामरावणयोरिव। १.४.५ तं. अलब्धोपममन्यत्र, तयोरेव तथाऽभवत् ॥ तयोरेव तत्तथा।

तां १३.४.१६ रायोवाजीयं 'स्वादोरित्था विषूवतः' इति विषुवान् पञ्चमम् अहः तत्र रायोवाजीयम्। ४.३.४

साम १००५;ऋ. १.८४.१० रायोवाजीयं– स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः।
या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभयः वस्वीरनु स्वराज्यम्॥

साम १००६ ऋ १.८४.११ ता अस्य पृशना युवः सोमं श्रीणन्ति पृश्नयः। प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम्॥

साम १००७;ऋ १.८४.१२ ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम्॥ ४.३.४

तैसं ५.४.९ राष्ट्रभृतो जुहोति। ३.४.२५

तैसं ५.१.१० रुक्मप्रमोचनादि रुक्मम् अन्तर् प्रमुच्यते अमृतम् एव मृत्योर् अन्तर् धत्ते। ५.२.२३ न्यामा.

तां १८.१.२०,२२,२१ रुक्मललाटोऽश्वो दक्षिणा, स हि अनिरुक्तः। १०.३.६८-७३ न्यामा.

पा १.४.३३,३२ रुच्यर्थानां प्रीयमाणः संप्रदानसंज्ञः। १.२.७ तं.

तैब्रा २.५.१०.९ रेतस्येव प्राणान् दधाति (प्राणभृत उपदधाति +)। १.४.२८ न्यामा.

तां १७.७.१ रेवतीषु वारवन्तीयम् अग्निष्टोमसाम कृत्वा पशुकामो यजेत्। २.२.२७

सामरैवतं १०८४।१५३ ऋ १.३०.१३ रेवतीर् नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर् मदेम॥

साम १०८५ ऋ १.३०.१४ आ घ त्वावान् त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः। ऋणो रक्षं न चक्रयोः॥

साम १०८६ ऋ १.३०.१५ आ यद् दुवः शतक्रतवा कामं जरितॄणाम्। ऋणोरक्षं न शचीभिः॥२.२.२७

काठकसङ्कलन १३७;९.१२ रोहितके बध्नाति। २.२.२७; ११.३.३

मैसं ३.९.३ रोहितको यूपो भवति। १०.७.५१

काठकसङ्कलन १३७;९.१२ रोहिते बध्नाति। ४.२.१

वाराहगृ ६.४० रौरवं परिधत्ते। १०.४.१४; १२.३.२ रौरवं क्षत्रियस्य (उपनीतस्य)।

साम ६७५,६७६ रौरवयौधाजये तृचे भवतः ताः षड्बृहत्यः (प्रगाथेन)। ९.२.२८/२

तां ७.५.१०,११ रौरवं साम-अग्निर् वै रुरुः तस्य एतद् रौरवम्। यदेतद् रौरवं यौधाजयं च द्वे सामनी तयोः पूर्वा बृहती उत्तरा विष्टारपङ्क्तिः। ९.२.२५/२

साम रौरवं ६७५/५११ पुनानः सोम धारयाऽपो वसानो अर्षसि। आ रत्नधा योनिमृतस्य

ऋ ९.१०.७.४ सीदत्स्युत्सो देवो हिरण्ययः॥ बृहती

साम ६७६; ऋ ९.१०७.५ दुहान ऊधर् दिव्यं मधुप्रियं प्रत्नं सधस्थमासदत्। आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर् धौतो विचक्षणः॥ विष्टारपङ्क्तिः। ९.२.२५/२

काठकसङ्कलन १३७;९.१२ रौहितके बध्नाति। ६.३.२८

मैसं ३.९.३ रौहितको यूपो भवति। १०.७.५१

पा ३.२.१२६,१२४,१२३ लक्षणहेत्वोः क्रियायाः । ३.२.६ तं. लक्षणे हेतौ चार्थे वर्तमानाद् धातोः परस्य लटः शतृशानचौ आदेशौ अप्रथमा समानाधिकरणे भवः ।

पाम १.१.१.१६ लक्ष्यलक्षणे व्याकरणम् । १.३.२४ तं.

पा ३.४.७७,७८ लस्य तिबादयः । १.४.१३ तं.

पा ३.४.६८,६७ लः कर्मणि भावे अकर्मकेभ्यः कर्तरि । ३.४.१३ तं.

पा ४.४.१२६ लिङ्गप्रकरणप्राप्तमन्त्रानुवादेन इष्टकोपधाने विधिः । १.४.२८ न्यामा. तद्वान् आसाम् उपधानो मन्त्र इति इष्टकासु लुक् च गतोः ।

तां २४.१.४ लुप्यते वा एतत् षष्ठमहो यत् पञ्चाहान् उपयन्ति । १०.५.२

पाम १.१.१.१/३ लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः । १.३.२७ तं.

तैसं ४.२.४ 'लोकं पृण छिद्रं पृण' इति अनेन मन्त्रेण उपधीयमाना इष्टका लोकं पृणातु अस्याश्च संपूरणार्थता । ५.३.२० न्यामा.

पा. ७.१.४१ लोपस्तः आत्मनेपदेषु छन्दसि । पा १.१.६१ प्रत्ययलोपे प्रत्ययलक्षणम् ।

पा. ६.१ ६६ लोपो व्योर् वलि । १.३.३ तं.

तैसं ६.३.९ लोहितं निरस्यति शकृत् संप्रविध्यति स्थविमतोर् बर्हिर् अङ्कत्वा अपास्यति । ४.१.२७ सूत्रम्–पशौ वा अनालम्भात् लोहितशकृतोर् अकर्मत्वम् ।

षड् ४.२.२२ लोहितोष्णीषादीनां धर्माणां विधिः श्येने । ७.१.१४

षड् ४.२.२२ लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति । ३.१.१२;३.८.१२; ७.१.१४;८.३.९;१०.४.१;११.१.१ वाससः ।

पाम १.१.१.३ लौकिकानि वचनानि उपपन्नार्थानि-यथा देवदत्त गाम् अभ्याज अनुपपन्नार्थानि च यथा दशदाडिमानि षडपूपाः । १.१.५ अनर्थकानि ।

पा. ४.१.१५ ल्युडन्तात् । १.३.३ तं. ल्युट् इति टित्त्वात् स्त्रियां ङीप् । ल्युडन्तत्वेन नपुंसकं प्रमाणम् । १.३.३ तं.

तैसं ५.७.३ वज्रिणीर् उपदधाति । ३.६.३५;५.३.१५

षड् ४.५.१ वज्रेण अभिचरन् यजेत् । १.१.२ अथैष वज्रो, अभिचरन् यजेत् ।

मैसं ३.९.४ वज्रो वै यूपो, यद् अन्तर्वेदि मिनोति तत् निर्दहेत्, यद् बहिर्वेदि अनवरुद्धः स्याद्, अर्धम् अन्तर्वेदि मिनोति अर्धं बहिर्वेदि, अवरुद्धो भवति न निर्दहति । ३.७.१३

तैसं १.८.२१ वडवा दक्षिणा । ११.३.१

सत्या १.२.६५ वत्सजानुं पशुकामस्य वेदिं कुर्यात् । ४.१.२ वत्सजुं पशुकामस्य ।

तैसं १.६.९ वत्सं च उपावसृजति, उखां च अधिश्रयति, अव च हन्ति, इषदुपलेषु समाहन्ति, अधि च वपते, कपालानि च उपदधाति, पुरोडाशं च अधिश्रयति, आज्यं च स्तम्बयजुश्च हरति, अभि च गृह्णाति, वेदिं परिगृह्णाति, पत्नीं च संनह्यति, प्रोक्षणीश्च आसादयति, आज्यं च, तानि द्वादश द्वन्द्वानि दर्शपूर्णमासयोः । ३.८.१०

तां १६.६.१ वत्सत्वचं परिधत्ते । १२.३.१ पशुभिर् एष व्यृद्ध्यते यः सर्वं ददाति तत् छवीं परिधत्ते ।

मैसं १.५.९ वत्सनिकान्ता हि पशवः । २.३.१६,१७

मैसं १.५.९ वत्सम् आलभेत, वत्सनिकान्ता हि पशवः । २.३.१६ सूत्रम्-विशये प्रादर्शनात् काऽत्र प्रतिज्ञा, कश्च संदेहः इति नावगच्छामः । अत्र भगवान् आचार्यः (उपवर्षः) इदम् उदाहृत्य 'वत्सम् आलभेत वत्सनिकान्ता हि पशवः' इत्याह । उपपद्यते च एतद् उदाहरणं संशयश्च किम् आलम्भनं वा स्पर्शनम् ।

तैसं १.८.१ वत्सः प्रथमजो हि दक्षिणा । १०.३.३४,३५,३६,३८ प्रथमजो वत्सो हि दक्षिणा ।

तैसं १.६.७ वत्सेन व्रतम् उपयन्ति अमावास्यायाम् । ६.४.३६

तैब्रा ३.२.१ वत्सेभ्यश्च ह वा एता मनुष्येभ्यश्च पुरा आप्यायन्ते, अथ एतर्हि देवेभ्य एव एते आप्यायन्ति । ११.१.५३

तैब्रा ३.८.१६.५ वनस्पतिं जुहोति । ९.४.५९ वनस्पतिहोमान् जुहोति ।

तैसं १.८.१३ वनस्पतिभ्यः स्वाहा । ९.१.६-१० न्यामा.

तैसं १.३.५;६.३.३ वनस्पते शतवल्शो विरोह । १०.१.१३

तैब्रा ३.६.६.३,४ वनिष्ठमस्य मा राविष्ट उरुकं मन्यमानाः । ९.४.२२

तैब्रा ३.६.६.३ वनिष्ठुम् आग्नीध्रे । १०.७.१७ (षडवत्तं संपादयति)

शत ३.८.३.२५ वनिष्ठुं प्रास्यति (समवत्तधान्याम्) । १०.७.१७

तैसं ५.२.५ वपति । ५.२.४ चतुर्दशभिर् वपति ।

मैसं ३.९.५ वपया प्रातःसवने प्रचरन्ति, पुराडाशेन माध्यन्दिने सवने, अङ्गैस्तृतीये सवने (सवनीयस्य पशोः +) । ३.६.२१,२६; ३.८.३१; ८.१.१३; ११.२. १४,६३; १२.२.१०,३३

शत ३.८.२.१९ वपाम् असौ श्रपयति । १०.७.२३ दक्षिणतः परीत्य प्रतिप्रस्थाता वपां श्रपयति ।

तैसं ६.३.७ वरणम् । १०.२.६२ ऋत्विजो वृणीते ।

आप ५.११.५ वरः–गौर् वै वरोऽतिवरोऽन्यः, धेनुर् वै वरोऽतिवरोऽन्यः, अनड्वान् वरोऽतिवरोऽन्यः, पष्ठौही वरोऽतिवरोऽन्यः । ३.८.२

तैसं ७.१.६ वरः–यैव वरः कल्याणी रूपसमृद्धा सा स्यात्, सा हि वरः समृद्ध्यै । ३.८.२

मैसं १.६.३ वराहं गावोऽनुधावन्ति । १.३.९

मैसं ४.८.५ वरुणगृहीतं वा एतद् यज्ञस्य यद् ऋजीषं, यद् ग्रावाणः, यद् औदुम्बरी, यद् अभिषवणफलके, तस्माद् यत् किञ्चित् सोमलिप्तं द्रव्यं तेन अवभृथं यन्ति । ४.२.२०

विष्णुधर्मोत्तर २.१०४.१६ वरुणं पाशहस्तं आलिखन्ति कथयन्ति च । ९.१.६ पश्चिमे वरुणदेवं सपाशं हंसवाहनम् ।

मैसं ३.७.८ वरुणपाशाभ्यां वा एषोऽभिधीयते यो दीक्षितः अहोरात्रौ वै वरुणपाशौ यद् दिवा संस्थापयेत् अनुन्मुक्तो वरुणपाशाभ्यां स्यात् नक्तं संस्थाप्यो वरुणपाशाभ्याम् एव मुच्यते आत्मनोऽहिंसायै । ९.१.३१

तैसं ६.६.३ वरुणं यजति । ९.२.५९ न्यामा.

तैसं २.३.१२ वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति, यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत् । ३.४.२८,३१; ४.३.१२

काठकसं १२.६ वरुणो वा एतमग्रे प्रत्यगृह्णात् । ४.३.१२

तैसं १.५.५ वर्चोदा अग्ने असि वर्चो मे देहि । ३.८.१५

मैसं ३.८.७ वर्त्मनि जुहोति । १०.८.१६

पा ३.२.१२३ वर्तमाने लट् । ३.४.१३ तं.

तैसं ५.४.९ मैसं ३.३.१ वर्षति न धावेत् न स्त्रियम् उपेयात् (अग्निचित्) । ५.३ २७

तैब्रा १.१.४.८ आप५.३.१८ वर्षासु रथकार आदधीत । ६.१.४४; ११.२.१३

आप ८.४.१३ वर्षासु वरुणप्रघासैर् यजेत । ११.२.१३

मैसं ४.३.१ वल्मीकवपायाम् उपगृह्य जुहुयात् । १०.८.१६

तैब्रा १.८.६.२ वल्मीकवपायां होमः । ४.४.१; १०.८.१६ अवनयेत्

ऐब्रा ३.३२ वषट्कर्तुः प्रथमभक्षः । ३.५.३१,३८ वषट्कर्ता प्रथमः सर्वभक्षान् भक्षयति ।

षड् ४.३.५ वषट्कारनिधनं भवति । ७.१.१६ तं.

आश्व ५.५.२२ वषट्कारनिमित्ताः शेषभक्षाः । ज्योतिष्टोमे । १०.२.२९ प्रतिवषट्कारं भक्षणम् ।

शत १४.८.९.१ वषट्कारेण स्वाहाकारेण च देवोभ्योऽन्नं प्रदीयते । १०.८.२०-तस्यै वाचे द्वौ स्तनौ देवा उपजीवन्ति वषट्कारे स्वाहाकारे च ।

शत २.५.२.३८ वषट्कृते जुहोति । ३.४.१९ तं.

तैसं १.६.२ वसन्तम् ऋतूनां प्रीणामि, स मा प्रीतः प्रीणातु, ग्रीष्मम् ऋतुनां प्रीणामि, स मा प्रीतः प्रीणातु, वर्षा शरद् -- हेमन्तशिशिरौ ऋतूनां प्रीणामि तौ मा प्रीतौ प्रीणीताम् ॥

तैब्रा १.१.२.६ वसन्ता अग्निम् आदधीत । ४.१.२; ६.१.३७ वसन्ता-सुपां सुलुक्+आल् ७.१.३९

वाज २४.१० वसन्ताय कपिञ्जलान् आलभेत । २.१.३२; ४.१.११; ७.४.१०; १०.१.३८; ११.२.५०

बौधागृ २.५.६ वसन्ते गर्भाष्टमे ब्राह्मणम् उपनयीत । ६.१.३३ तं.

तैब्रा १.१.२.६ वसन्ते अग्नीन् आदधीत । १२.२.१ अग्निम् ।

तैसं २.१.२ वसन्ते प्रातर् आग्नेयीं कृष्णग्रीवाम् आलभते, ग्रीष्मे माध्यन्दिने सिंहीम् ऐन्द्रीं, शरदि अपराह्णे श्वेतां बार्हस्पत्यां, गर्भिण्यो भवन्ति । ४.१.१७

आपध १.१.१.१९ वसन्ते ब्राह्मणम् उपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यम् । ६.१.२३; ११.३.२

तैब्रा १.१.२.६ वसन्ते ब्राह्मणोऽग्नीन् आदधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः । २.३.४; ६.१.२३ अग्निम् ।

तैसं २.१.४ वसन्ते ललामान् वृषभान् आलभते । ८.१.१५ वसन्ता प्रातर् त्रीन् ललामान् आ...(ऐकादशिनो विधिः)

आप १०.२.५ सत्या७.१.४ वसन्ते वसन्ते ज्योतिषा यजेत । ३.३.१९; ६.२.३१

आप ८.४.११ वसन्ते वैश्वदेवेन यजेत, वर्षासु (प्रावृषि) वरुणप्रघासैः, शरदि साकमेधैर् यजेत । ११.२.१,१३,१४

तां १९.३.८ वसिष्ठस्य जनित्रे भवतः । १०.४.१६,१७,१८

साम वसिष्ठस्य जनित्रे ६८५ तं वो दस्ममृतीषहं वसोर् मन्दानमन्धसः । अभि वत्सं न स्वसरेषु धेनव
ऋ ८.८८.१ इन्द्रं गीर्भिर् नवामहे ॥

साम ६८६; ऋ ८.८८.२ द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् । क्षुमन्तं वाजँ शतिनँ सहस्रिणं मक्षू गोमन्तमीमहे ॥

साम द्वितीय जनित्रे ६९७ पुरोजिती वो अन्धसः सुताय मादयित्नवे । अपश्चानँ श्रथिष्टन सखायो दीर्घ-
ऋ ९.१०१.१ जीह्वयम् ॥

साम ६९८ ऋ ९.१०१.२ यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः ॥

साम ६९९ ऋ ९.१०१.३ तं दुरोषमभी नरः सोमं विश्वाच्या धिया । यज्ञाय सन्त्वद्रयः ॥
१०.४.१६,१७,१८

कात्या ३.३.८ वसिष्ठादीनां नाराशंसो यज्ञाङ्गम् (द्वितीयः प्रयाजः) । ६.६.४,५,९,१० (राजन्यात्रि...)

तैसं ३.२.५ वसुमद्गणस्य रुद्रमद्गणस्य आदित्यमद्गणस्य सोमदेव ते मतिविदः प्रातःसवनस्य माध्यन्दिनसवनस्य तृतीयसवनस्य गायत्रीछन्दसः त्रिष्टुप्छन्दसः जगतीछन्दसः अग्निष्टुतः इन्द्रपीतस्य नाराशंसपीतस्य पितृ-पीतस्य मधुमतः उपहूतस्य उपहूतो भक्षयामि । ३.२.२६

मैसं १.१.८ वसूनां रुद्राणाम् आदित्यानां सदसि सीद, भृगूणाम् अङ्गिरसां तपसा तप्यध्वम् । १०.१.५३

तैसं १.३.९ वाक् ते आप्यायताम् । ४.१.१७ न्यामा.

तैसं १.२.१ वाक्पतिस्त्वा पुनातु अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । २.१.४८

तैब्रा ३.२.३.६,७ वाग्यतस्त्रिस्रो दोहयित्वा विसृष्टवाग् अनन्वारभ्य तूष्णीम् उत्तरा दोहयति । ११.१.११,४.७ अन्वारभ्य वाचं यच्छति, सा विश्वायुः सा विश्वचा सा विश्वकर्मा एवं नामानि दत्वा दोहयति, अवाचंयमोऽनन्वारभ्य उत्तराः दोहयति ।

पाम १.१.१.२७ वाग्योगविद् दुष्यति चापशब्दैः । १.३.२६ तं. (यस्तु प्रयुङ्क्ते कुशलो...)

तैसं ६.४.७ वाग्वा एषा यद् ऐन्द्रवायवो, यद् ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचम् एव अवरुन्धे अनुप्रयन्ति । १०.५.६२

तैसं ६.१.४ वाग्वै देवेभ्योऽपाक्रामत्, यज्ञाय अतिष्ठमाना सा वनस्पतीन् प्राविशत्, सैषा वाग्वनस्पतिषु वदति या दुन्दुभौ, या च तूणवे, या च वीणायां, यद् दीक्षितं दण्डं प्रयच्छति वाचम् एव अवरुन्धे, क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति । ४.२.१६

तैसं ७.४.५ वाग्वै द्वादशाहो (मनो मानसम्) । १०.६.३४ वाग्वै द्वादशाहः इति वाक्संस्तवः ।

तैसं ६.४.७ वाग्वै पराची अव्याकृताऽवदत्, ते देवा इन्द्रम् अब्रुवन् 'इमां नौ वाचं व्याकुरु' ताम् इन्द्रो मध्यतोऽपक्रम्य व्याकरोत्, तस्माद् इयं व्याकृता वाग् उद्यते । १.३.२४-२९ न्यामा.

शत १.१.४.११ वाग्वै हविष्कृद् वाचम् एव एतद् आह्वयति । ३.२.८ विसृजति ।

तैसं ६.१.४ वाचं यच्छति । ३.१.२४

तैसं ६.१.४	वाचं विसृजति । ३.२.२०
वाराह ३.२.६.१३	वाचस्तोमादिषु तु यूपैकादशिन्याम् अस्य नित्यानुवादत्वाद् रथाक्षमात्राणि एव यूपान्तरालानि । २.४.२६
सत्या १७.२.३०	वाचःस्तोमे सर्वा ऋचः । २.१.२३
आप ६.१.५	वाचा त्वा होत्रा, प्राणेन उद्गात्रा, चक्षुषा अध्वर्युणा, मनसा ब्रह्मणा, श्रोत्रेण
भर ६.८.६	आग्नीध्रेण, एतैस्त्वा पञ्चभिर् दिव्यैर् ऋत्विग्भिर् उद्धरामि इति गार्हपत्याद् आहवनीयं ज्वलन्तम् उद्धरति । ९.४.३१
ऋ. ८.७५.६	वाचा विरूप नित्यया । १.१.२३ तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥
आप १८.१७.१५	वाजपेयम् अभिनिर्वर्त्य न एतावता कृती स्याद् बृहस्पतिसवम् अभिनिर्वर्तयेत् । ४.३.४० वाजपेयेन इष्ट्वा बृहस्पतिसवेन यजेत् ।
तैब्रा १.३.७.३	वाजपेयस्य यूपः । ८.१.१० सप्तदशारत्निर् वाजपेयस्य यूपः ।
शत ५.१.१.१३	वाजपेयेन सम्राट् । ११.३.६
आप १८.१.१	वाजपेयेन स्वाराज्यकामो शरदि यजेत् । १.४.६;२.२.२१;४.१.३३;१०.४.६
तैब्रा १.३.२.३	य एवं विद्वान् वाजपेयेन यजेत् गच्छति स्वाराज्यम् ।
आप १८.१७.१५ शांब्रा १५.४.१	वाजपेयेन इष्ट्वा बृहस्पतिसवेन यजेत् । ४.३.२९,४०;१०.२.३९
तैसं ४.७.१	'वाजश्च मे, प्रसवश्च मे, प्रयतिश्च मे, प्रसितिश्च मे, धीतिश्च मे, क्रतुश्च मे, स्वरश्च मे, श्लोकश्च मे, श्रावश्च मे, श्रुतिश्च मे, ज्योतिश्च मे, सुवश्च मे इति एतैर् द्वादशमन्त्रैर् एकाहुतिर् होतव्या, प्राणश्च मे, अपानश्च मे ... इत्यादिभिर् एकादशोत्तरा आहुतयः संपादयितव्याः । २.३.२६-२७ न्यामा.
तैसं १.१.१३ तैसं १.६.४	वाजस्य मा प्रसवेनोदग्राभेणोदग्रभीत् । अथा सपत्नाँ इन्द्रो इन्द्रो मे निग्राभेणाधराँ अकः ॥ इति स्रुचो व्यूहति । ३.८.१७
कात्या ४.४.९	वाजिनं निधिच्य उत्करे करोति । १०.५.५८ तं.
शत २.४.४.२३	'वाजिनस्याग्ने वीहि' इति अनुवषट्करोति । ८.२.२
काठकसं ३६.२,१०	वाजिनो यजति आहुतीनां संपरस्यै त्रिंशत्त्वाय । १२.१.४ नवप्रयाजा नवानुयाजा द्वौ आज्यभागौ, अष्टौ हवींषि, अग्नये समवद्यति वाजिनो यजति, तत् त्रिंशः त्रिंशद् आहुतयः त्रिंशत्त्वाय । अग्ने वेर् होत्रं वेर् दूत्यम् इति आधारम् आधारयति आहुतीनां संपरस्यै त्रिंशत्त्वाय ।
शत २.४.४.२२	वाजिभ्यो वाजिनम् । ८.२.१ (वाजिने सांनाय्यविधिः)
तां. ६.५.३	वानस्पत्योऽसि । १२.३.२३-२४ न्यामा.
पा ४.२.९	वामदेवाद् ड्यड् ड्यौ । १.३.२४ तं. ड्यत् ड्यः यप्रत्ययः तित् स्वरार्थः ङितौ-
पा ६.२.१५६	न उत्तरपदस्य यद् अन्तोदात्तत्वं तन्निवारणार्थं तेन दृष्टं साम इत्यर्थो यप्रत्ययः ।
तां ११.४.८	वामदेव्यं साम वामदेव्यं भवति । ९.२.२८/२
साम ६८२ ऋ ४.३१.१	कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥
साम ६८३ ऋ ४.३१.२	कस्त्वा सत्यो मदानां मँहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥
साम ६८४ ऋ ४.३१.३	अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥ ९.२.२८/२

तां. २.७.१ वामदेव्ये सप्तदश गायत्र्यः । ९.२.२८ विष्टुत्या

तैसं १.८.८ वामनो दक्षिणा । ११.४.७

तैसं २.१.१ वायव्यं पशुम् आलभेत । १.२.१-१८ न्यामा. वायव्यं श्वेतं (पशुम्) आलभेत वायुर् वै क्षेपिष्ठा देवता, वायुम् एव स्वेन भागधेयेन उपधावति, स एव एनं भूतिं गमयति ।

तैसं २.१.१ वायव्यं श्वेतम् आलभेत भूतिकामः । १.२.६,७;२.३.१२;४.२.२५;१०.२.६८; १०.३.१,१३

पाशिक्षा ६.७.९ वायुर् आपद्यते शब्दताम् । १.१.२२ शिक्षाकाराः- आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति । स प्रेरयति मारुतम् ॥ मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् । सो दीर्णो मूर्ध्न्यभिहतो वक्त्रम् आपद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥

मैउ ७.११ वायुर् नाभेरुत्थितः उरसि विस्तीर्णः कण्ठे विवर्तितो मूर्धानम् आहत्य परावृतो वक्त्रे विचरन् विविधान् शब्दान् अभिव्यनक्ति । १.३.२५ न्यामा.

तैसं २.१.१ वायुर् वै क्षेपिष्ठा देवता वायुम् एव स्वेन भागधेयेन उपधावति, स एवैनं भूतिं गमयति । १.२.७;१.४.१;२.१.३२,३३

वाराह १.२.४.१ वारणं प्रणयनपात्रम् । ४.३.४ वरण (काष्ठ) मयानि शिष्टानि पात्राणि ।

तां ५.३.९ वारवन्तीयं साम-अग्निर् वा इदं वैश्वानरो दहन् ऐत् । तं देवा वरणशाखया अवारयन्त यद् अवारयन्त तस्माद् वारवन्तीयम् । २.२.२७;१०.८.३६; ११.१.१०;११.२.६४

तां ५.३.८ वारवन्तीयम् अग्निष्टोमसाम कार्यम् । २.२.२७;१०.८.३६;११.१.१०;११.२.६४

साम १६३४;ऋ १.२७.१ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ॥

साम १६३५; ऋ १.२७.२ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः । मीढ्वाँ अस्माकं बभूयात् ॥

साम १६३६; ऋ १.२७.३ स नो दूराच्चासाच्च नि मर्त्यादघायोः । पाहि सदमिद् विश्वायुः ॥

तैब्रा १.७.९.४ वाराही उपानहौ । १.३.८ वाराही उपानहौ उपमुञ्चते ।

शत ३.९.१.२०,२४ वारुणम् अन्ततः पुनः पर्यावृत्तेषु आग्नेयम् एव प्रथमेऽहनि आलभेत । १०.५.८६

काठकसं २९.३ वारुणेन एककपालेन अवभृथम् अभ्यवयन्ति । ४.२.२०;१०.४.३४;१०.७. ४५;११.२.२९,३२

तैब्रा १.६.५.५ वारुण्या निष्कासेन तुषैश्च अवभृथं यन्ति । ७.३.१२;११.२.६२,६४

मैसं १.१०.५ वार्त्रघ्नानि वा एतानि हवींषि । ७.१.१६

तैसं २.५.२ वार्त्रघ्नी पौर्णमास्याम् उच्येते, वृधन्वती अमावास्यायाम् । ३.१.२३ याज्यानुवाक्ये ।

तैब्रा ३.५.६ वार्त्रघ्नी-अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया । समिद्धः

ऋ ६.१६.३४ शुक्र आहुतः ॥

तैब्रा ३.५.६ ऋ १.९१.५ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥ ३.१.२३

पा ३.१.९४ वाऽसरूपोऽस्त्रियाम् । ३.४.१३ तं. अस्मिन् धात्वधिकारे असरूपः- असमानरूपः प्रत्ययोऽपवादो वा बाधको भवति ।

शत ४.२.३.४ वाससा उपावहरति (राजानं सोमं) । १०.६.७७ राजानम् उपावहरति ।

तैसं ६.१.१० वाससा क्रीणाति (सोमम्) । १२.४.५

शत ३.३.२.९ वाससि मिनोति (सोमम्)। १०.६.७६ अथ वासः। द्विगुणं वा चतुर्गुणं वा प्रादेशं वा उपस्तृणाति, तद् राजानं मिमीते।

तैब्रा ३.८.१.२ वासः परिधत्ते। १.४.२९

तैब्रा १.७.९.४ वासांसि वाराही च उपानहौ विमुञ्चति। १०.४.१५ वाराही उपानहौ उपमुञ्चति।

आप १८.१६.९,१० वासांसि विस्रंसति ततोऽध्वर्युः परिधत्ते। १०.४.१५ (कृष्णविषाणया+ वासांसि)

जैब्रा ३.१४९ वासिष्ठं साम। ९.२.१८

सामवासिष्ठं १०८० पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने। देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि॥

तैब्रा ३.५.२.२ वासिष्ठो ब्रह्मा भवति। ६.६.२४,२५ तस्माद् वासिष्ठो ब्रह्मा कार्यः।

तैसं १.८.१ वासो दक्षिणा। १०.३.३४,३५,३७,३८
वासो दक्षिणा, वत्सः प्रथमजो दक्षिणा आग्रयणे तदा ३४ अन्वाहार्यो दक्षिणा निवर्तते, वासोवत्सौ अन्वाहार्यधर्मकौ स्याताम्। ३६ न पाको वत्सस्य कर्तव्यः। ३८ न च अभिधारयेत्।

तैब्रा १.१.६.११ वासो ददाति। ७.३.२८

मैसं २.२.४ वास्त्वमयं रौद्रं चरुं निर्वपेद्, यत्र रुद्रः प्रजाः शमयेत। वास्तोर् वै वास्त्वं जातं वास्त्वमयं खलु वै रुद्रस्य स्वेनैवैनं भागधेयेन शमयति। तया निषादस्थपतिं याजयेत्। ६.१.५१

तैसं ३.४.१० वास्तुहोमे हि वैदिके दर्विहोमत्वम्। ८.४.३ रुद्रः खलु वै वास्तोष्पतिः। वास्तोष्पतीयं जुहोति।

तैसं ६.६.११ विच्छिन्दन्ति ह वा एतद् उक्थ्यं यद् उक्थ्यानि षोडशिनं च ततः प्रणयन्ति।

तैसं ७.२.५ १०.५.४६,४८
सूत्रम् - विच्छेदः स्तोमसामान्यात्। एकविंशस्तोमत्वाद् उक्थ्यग्रह इव षोडशी। षोडशी-एकविंशतिस्तोत्रम्। भवति, हरिवच्छस्यते। एकविंशम् उक्थ्यः सौरिषु प्रतिष्ठित्यै।

शत १४.२.४.१२; शत १४.४.३.१४ विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तानि एव अनु विनश्यति न प्रेत्य संज्ञा अस्ति। १.१.५

महाभारत १.१.४९ वितीर्यं हि महज्जालम् ऋषिः संक्षिप्य चाब्रवीत्। इष्टं हि विदुषां लोके समासव्यासधारणम्। ८.१.२

मैसं ४.४.७ विदेवनादयः। ४.४.३,४ 'षष्ठ्यर्हीं दीव्यति' इति विदेवनादयः।

मैसं ३.३.९ विघ्नो वा। २.१.३२ वेदकर्णवर्ती सूर्मिं प्रतिवचनं 'विघ्नो वा' विदकर्ण-कवर्ती सूर्मि– विघ्न इति।

याज्ञस्मृ १.४५ विद्याम् अधीयीत। ६.१.३१ इतिहासांस्तथा विद्याः शक्त्याऽधीते हि योऽन्वहम्।

मनुस्मृ २.१६५ विद्यासंयोगाच्च। २.४.१४ तपोविशेषैर् विविधैर् व्रतैश्च श्रुतिचोदितैः। वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना॥

पाश्करगृ २.५.८ विधिर् विधेयश्च तर्कश्च वेदः। १.३.११ तं.

शत ३.४.१.१८ विधृती च ऐक्षव्यौ। ४.२.३०

तैसं ७.५.८ विनिषद्य उद्गातारः साम्ना स्तुवते । ३.५.२६ (इति स्तोत्रकारिषु) पञ्चधा विनिषद्य स्तुवन्ति– पञ्चदिशो दिक्षु एव प्रति तिष्ठन्ति ।

आप १८.६.७ विप्रकृष्टे काले माध्यन्दिने सवने ब्रह्मसामकाले प्राजापत्यानाम् आलम्भः । ४.१.३३ ब्रह्मसाम्ना लभते ।

तां ४.६.१५ 'विभ्राड् बृहत् पिबतु सौम्यं मधु' इति तृचे जागते गेयं साम महादिवाकीर्त्यम् । २.३.२ तं.

साम जगत् १४५३ विभ्राड् बृहत् पिबतु सौम्यं मधु, आयुर् दधद् यज्ञपता ववि्हतम् ।
ऋ १०.१७०.१ वातजूतो यो अभिरक्षति त्मना, प्रजाः पिपर्ति बहुधा विराजति ॥
साम १४५४ विभ्राड् बृहत् सुभृतं वाजसातमं, धर्म दिवो धरुणे सत्यमर्पितम् ।
ऋ १०.१७०.२ अमित्रहा वृत्रहा दस्युहन्तमं, ज्योतिर् जज्ञे असुरहा सपत्नहा ॥
साम १४५५ इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं, विश्वजिद् धनजिद् उच्यते बृहत् ।
ऋ १०.१७०.३ विश्वभ्राड् भ्राजो महि सूर्यो दृश, उरु पप्रथे सह ओजो अच्युतम् ॥ २.३.२ तं.

पा ५.२.६२ विमुक्तादिभ्यो अण् मतौ (एव) । ९.१.५४–५८ न्यामा. वैमुक्तोऽनुवाकः, देवासुर – दैवासुरः, वसुमत् – वासुमतः, सत्वत् – सात्वतः, औपसदः, दाशार्हपयसः, हाविर्धानः, सौमापौष्णः, आग्नावैष्णवः, वार्त्रघ्नः, वसु–वासवः, इडा–ऐड, मारुत्वतः, पात्नीवतः, सौमः, वयस्–वायसः, पयस्–पायसः ।

तैसं ५.५.१० विमोकः पूर्वम् आम्नातः पश्चात् तद्योगः । ५.१.२ इमं स्तनम् ऊर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमूर्वं समुद्रियं सदनम् आविशस्व इति परिधिविमोकं जुहोति ।

तैसं ५.४.१० 'वि ते मुञ्चामि' इति च 'अग्निं युनज्मि शवसा घृतेन' इत्याह युनक्ति एव एनं स एनं युक्तः सुवर्गं लोकम् अभिवहति ।

तां १८.६.२४ विरण्यो वा एष यज्ञक्रतुर् यद् वाजपेयः अतीव हि अग्निष्टोमं क्रामति, उक्थ्यम् अति, षोडशिनं नातिरात्रम् आप्नोति । १०.४.५ यज्ञारण्ये संतिष्ठते इत्याहुः, उक्थानि एति, अतिषोडशिनं न रात्रिं प्राप्नोति ।

तां १५.१२.१ विराट्सु वामदेव्यं गायति । ९.२.३१ विराट्सु वामदेव्यम् अग्निष्टोमसाम भवति शान्त्यै अग्निं नरो दीधितिमिर् ।
साम १३७३ अग्निं नरो दीधितिमिररण्योर् हस्तच्युतं जनयत प्रशस्तम् । दूरेदृशं गृहपतिमथव्युम् ॥
ऋ ७.१.१ तमग्निमस्ते वसवो न्यृण्वन् त्सुप्रतिचक्षमवसे कुतश्चित् । दक्षाय्यो यो दम आस नित्यः ॥
साम १३७४ प्रेद्धो अग्ने दीदिहि पुरो नो अजस्रया सूर्म्या यविष्ठ । त्वां शश्वन्तम् उप यन्ति वाजाः ॥ ९.२.३२
ऋ ७.१.२

तैसं २.५.५ वि वा एतं प्रजया पशुभिर् अर्धयति (व्यर्धयति), वर्धयति अस्य भ्रातृव्यं यस्य इविर् निरुप्तं पुरस्तात् चन्द्रमा अभ्युदेति, त्रेधा तण्डुलान् विभजेद्, ये मध्यमास्युस्तान् अग्नये दात्रे पुरोडाशम् अष्टाकपालं कुर्याद्, ये स्थविष्ठास्तान् इन्द्राय प्रदात्रे दधिश्रुते, येऽणिमास्तान् विष्णवे शिपिविष्टाय शृते चरुम् । ६.५.१,१३;९.२.४४;९.४.४१

तैसं २.३.२ वि वा एष इन्द्रियेण सोमपीथेन ऋध्यते (व्यृध्यते) यः सोमं वमिति स एतं सोमेन्द्रं श्यामाकं चरुं निर्वपेत् । ३.४.३८-३९ न्यामा.

मैसं १.५.९ 'वत्सम् आलभेत वत्सनिकान्ता हि पशवः' इति इमं संशयं उपन्यस्ति स्म । किं यजिमदभिधाने एष आलम्भति उत आलम्भमात्रवचने इति वत्सम् आलभेत, 'वत्सनिकान्ता हि पशवः' इति वाक्यम् अग्निहोत्रे धेनुदोहाधिकारे श्रुतम्, आलभ्यमानो वत्सो गां प्रस्नावयिष्यति, तस्मात् स्पर्शमात्रं वत्सालम्भः ॥ २.३.१६

लाट्या १.७.७ विशाखे घृतेन द्यावापृथिवी आप्रीणाथां स्वाहा विशाखयोर् मध्ये स्वाहाकाराद् आज्यं यथाभूमिं गच्छेत् । १०.८.२१

शत १०.२.१.१६ विश्वजिता यजेत । १.४.१;४.३.१०,१३;८.१.१६

शत १०.२.१.१६ विश्वजिति सर्वस्वं ददाति । ६.७.१,८,१८ सर्ववेदसम् ।

तैसं ७.२.५ विश्वजित् सर्वपृष्ठो भवति । ७.३.६;१०.६.१३ विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति ।

तां १६.६.१ विश्वजिदभिजितौ अग्निष्टोमौ अभितः– उभयतो ज्योतिर्मध्ये षडहः पशुकामो ह्येतेन यजेत् । १२.३.१.२

तां १६.६.१ विश्वजिति एकाहे वत्सत्वक् – अवभृथाद् उदेत्य वत्सत्वचं परिधत्ते । ज्योतिष्टोमे अहतं वासः (तैब्रा ३.८.१.२) । उपरिवासो हि वत्सत्वक् । १२.३.१,२

शत १०.२.१.१६ विश्वजिद् यागः कर्तव्यः । ४.३.१० विश्वजिता यजेत् ।

तैसं २.५.१ विश्वरूपो हि त्वाष्ट्रपुरोहितो देवानाम् आसीत् स्वस्रीयोऽसुराणाम् । ३.१.२१ न्यामा.

साम १५८८-९० विश्ववत्यः स्तोत्रीयाः । १०.३.५६

साम १५८८ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यम् अरोचयत् । इन्द्रे ह विश्वा

ऋ ८.३.६ भुवनानि येमिरे इन्द्रे स्वानास इन्दवः ॥

साम १५८९ विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व तन्वं स्वा हि ते । मुह्यन्त्वन्ये

ऋ १०.८१.१६ अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥

साम १५९० अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न

ऋ ९.१११.१ सयुग्वभिः । धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर् ऋक्वभिः ॥ १०.३.५६

तैब्रा ४.९.२ विश्वान् आवह । १०.१.१-३ न्यामा.

ऋ १.९५.१० विश्वा सनानि जठरेषु धत्ते । ९.१.६ धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम् । विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥

तैसं ४.३.७ विश्वेदेवा देवताः । १०.३.५७

वाराह ३.४.४.२२ विश्वेषां देवानाम् उस्राणां छागानां मेषाणां वपानां मेदसोऽनुब्रूहि । ६.८.४३; ९.३.३ विश्वेभ्यो देवेभ्यश्छागानाम् उष्ट्राणाम् ... ।

तैसं ६.१.३ विषाणायाः कण्डूयनं प्रासनं च । ४.२.१९

तां ४.६.१५ विषुवति पृष्टस्तोत्रे 'विभ्राड् बृहत् पिबतु' इति जगत्यां साम। विषुवति अर्कं ग्रहं गृह्णाति। १०.४.३ (अर्कं नाम ग्रहं गृह्णाति।)

तां २.७.१ विष्टुतिः – पञ्चभ्यो हिंकरोति – स तिसृभिः, स एकया, स एकया। पञ्चभ्यो हिंकरोति – स एकया, स तिसृभिः, स एकया। सप्तभ्यो हिंकरोति – स एकया, स तिसृभिः, स तिसृभिः। १.३.१;१,३.३;३.१.१

तैसं १.६.५ विष्णुक्रमाः। ६.१.४,६/९ विष्णोः क्रमोऽसि अभिमातिहा गायत्रेण छन्दसा पृथिवीम् अनुविक्रमे निर्भक्तः स यं द्विष्मः।
विष्णोः क्रमोऽसि अभिशस्तिहा त्रैष्टुभेन छन्दसाऽन्तरिक्षम् अनुविक्रमे निर्भक्तः स यं द्विष्मः।
विष्णोः क्रमोऽसि अरातीयतो हन्ता जागतेन छन्दसा दिवम् अनुविक्रमे निर्भक्तः स यं द्विष्मः॥
विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽनुष्टुभेन छन्दसा दिशोऽनुविक्रमे निर्भक्तः स यं द्विष्मः॥

शांब्रा ८.८ विष्णुम् आवह, अग्निम् आवह, सोमम् आवह, विष्णुम् आवह, इति ता वै तिस्रो देवता यजति। १०.१.१-३ न्यामा.

शत ३.४.४.१३ विष्णुं यजति। ९.२.५९ विष्णुं यज इति वषट्कृते जुहोति।

आप २.१८.२३ विष्णुर् उपांशु यष्टव्यः अजामित्वाय, प्रजापतिर् उपांशु यष्टव्यः अजामित्वाय, अग्नीषोमौ उपांशु यष्टव्यौ अजामित्वाय। २.२.९,१०,११; १०.८.४९,५७ आज्यहविर् उपांशुयाजः पौर्णमास्याम् एव वैष्णवः प्राजापात्योऽग्नीषोमीयो वा।

तैब्रा ३.२.३.७ विसृष्टवाग् अनन्वारभ्य उत्तरा दोहयति। ११.१.४८ अवाचंयमो।

शत १२.९.२.११ विहितत्वाद् गोदानस्य दक्षिणाविधाने। २.१.३१ धेनुविधिर् भुवि कृत्स्नस्य क्रतुदक्षिणस्य कार्ये भवति।

शत ४.५.२.१ विहितत्वाद् गोयागस्य तु अनुबन्ध्यायाम्। २.१.३१ मैत्रावरुणीं वशाम् आलभते।

तैसं १.५.२ वीरहा वा एष देवानां योऽग्निम् उद्वासयते। ६.४.२७ तं.

ऐब्रा ३६.३ वीर्यसंस्तवो राजन्यस्य। ६.६.१४ वीर्यं राजन्यः।

अमरकोष २.४.५ वृक्षः पादपो द्रुमो नगः–वनस्पतेर् अभिधानानि। १०.४.३२ वृक्षो महीरुहः शाखी विटपी पादपस्तरुः। अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः॥ (द्रुमः अगमः-नगः)

आप ५.१४.३ वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्य आहृत्य अवदध्यात्। १२.४.१७

तैब्रा १.४.७.७ वृता यजन्ति। १.३.१३

मनुस्मृ ४.१५४ वृद्धवयाः प्रत्युत्थेयः संमन्तव्यश्च। ६.६.२१,२३ अभिवादयेद् वृद्धांश्च, दद्याच्चैवासनं स्वकम्। कृताञ्जलिर् उपासीत, गच्छतः पृष्ठतोऽन्वियात्।

पा ४.२.११४ वृद्धात् छः। ९.१.५४ ऐरम् – आयिरीयम्।

पा १.१.१ वृद्धिर् आदैच्। १.१.५ "आ ऐ औ" एते वृद्धिसंज्ञकाः।

पा १.१.७३ वृद्धिर् यस्य अचाम् आदिस्तद् वृद्धम्। १.१.५

तैसं २.५.२ वृषन्वती अमावास्यायां (याज्यानुवाक्येऽनूच्येते)। ३.१.२३

तैब्रा ३.५.६.१ ऋ८.४४.१२	अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं स्वाम् । कविर् विप्रेण वावृधे ॥
तैब्रा ३.५.६.१ ऋ१.९१.११	सोम गीर्भिष्ट्वा वयं वर्धयामो वचो विदः । सुमृळीको न आ विश ॥ ३.१.२३
षड् १.१.१६,१७	वृषणस्य मेनका नाम दुहिता आस, तां ह इन्द्रश्चकमे । ९.१.४३/१
तां ११.६.७,८	वृषण्वतां तृचानां वृषण्वन्तौ एव प्राक् पर्यासात् तृच उत्तमो भवति । ५.३.१२ वृषासोमः, वृषाह्यसि, पवस्वेन्दो वृषा सुतः ।
साम ७८१ ऋ ९.६४.१	वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दध्रिषे ॥
साम ७८२ ऋ ९.६४.२	वृष्णस्ते वृष्ण्यं शवो वृषावनं वृषासुतः । स त्वं वृषन्वृषेदसि ॥
साम ७८३ ऋ ९.६४.३	अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः । वि नो राये दुरो वृधि ॥
साम ७८४ ऋ ९.६५.४	वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे । पवमान स्वर्दृशम् ॥
साम ७८५ ऋ ९.६५.६	यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः । द्रोणे सधस्थमश्नुषे ॥
साम ७८६ ऋ ९.६५.५	आ पवस्व सुवीर्यं मन्दमानः स्वायुध । इहो ष्विन्दवा गहि ॥
साम ७७८ ऋ ९.६१.२८	पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि ॥
साम ७७९ ऋ ९.६१.२९	यस्य ते सख्ये वयं सा सद्याम पृतन्यतः । तवेन्दो द्युम्न उत्तमे ॥
साम ७८० ऋ ९.६१.३०	या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे । रक्षा समस्य नो निदः ॥ ५.३.१२
तां ६.१०.९	वृषा पवस्य धारया इति राजन्याय प्रतिपदं कुर्यात् । ३.३.१४ तं.
साम ८०३ ऋ ९.६५.१०	वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ॥ ३.३.१४
आप ५.१४.३	वृष्टिकामो वैद्युतात् (आहृत्य अन्वादध्यात्) । १२.४.१७,१९
मैसं १.१०.७	वृष्ट्या एव पशून् अभिजिघर्ति । १०.४.५७
तैसं ५.४.४	वेतसशाखया अवकाभिश्च अग्निं विकर्षति । १.२.१०
मैसं ३.३.९	'वेदकर्णवतीं सूर्मिम्' इति प्रतिवचनं विद्मः । २.१.३२ विदकर्णकवतीं सूर्मिं, विद्येति होतुर् यावनेषु तां विद्म ।
आप ७.३.१०	वेदम् कृत्वा वेदिं कुर्यात् । १.३.६ दर्भमुष्टिनिर्मितो वेदिसंमार्जनहेतुर्वेदः ।
बौधागृ २.५.६	वेदम् अधीत्य स्नायात् । १.१.१
तैआ २.१६	वेदम् अधीयीत । ३.८.१८ याजयित्वा प्रतिगृह्य वा अनश्नन् त्रिः स्वाध्यायं वेदम् अधीयीत ।
मनुस्मृ २.१४०	वेदम् अध्यापयन् आचार्यो भवति । ६.१.२४ तं. उपनीय तु यः शिष्यं, वेदम् अध्यापयेद् द्विजः । सकल्पं सरहस्यं च, तम् आचार्यं प्रचक्षते ॥
मनुस्मृ १.२१	वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे । १.३.२४ तं.
मनुस्मृ ३.२	वेदान् अधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् । अविलुप्तब्रह्मचर्यो गृहस्थाश्रममावसेत् । १.१.१;२.१.१;२.४.९ तं.
तैब्रा ३.२.९.१	वेदिं खनति । ३.७.१-५ न्यामा.
तैसं ७.४.१८	वेदिम् आहुः परम् अन्तं पृथिव्याः । २.१.३२
तैसं २.६.५	वेदिं स्तृणाति । ३.८.३२ बर्हिः स्तृणाति प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रतिष्ठापयति ।
तैसं १.१.११	'वेदिरसि बर्हिषे त्वा' इति वेदिं प्रोक्षति । ११.४.४६

तैसं ५.६.८ वेदिसमानम् । २.४.२५ वेदिसंमितां मिनोति ।

आप १.२५.१२ वेदेन भस्मना अङ्गारान् अभ्यूहति । १०.१.५६

तैब्रा ३.१२.९.३ वेदैरशून्यैस्त्रिभिरेति सूर्यः । ३.३.३

मनुस्मृ २.६ वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च । १.३.७

पाम १.१.१.२० वेदोऽध्येतव्यो ब्राह्मणेन निष्कारणः । १.३.२४ तं.

तैब्रा १.६.५.१ वेद्यां हवींषि आसादयति । ३.७.२;१०.३.१९;१२.१.१० उत्तरस्यां वेद्याम् अन्यानि हवींषि सादयति ।

मैसं १.३.३६ वेशीनां त्वा पत्मन्नाधूनोमि (अग्नौ आधूननार्था मन्त्राः) रेशीनां त्वा पत्मन्नाधूनोमि । १०.५.१४

तैसं ३.५.७ वैकङ्कतो यज्ञावचरः स्यात् जुहुयाद् एतेन । ३.१.२२ यस्य वैकङ्कती ध्रुवा भवति, प्रति एव अस्य आहुतयस्तिष्ठन्ति ।

तैसं १.२.२ वैकृताः षड् मंत्राः- (आकूत्यै प्रयुजे अग्नये स्वाहा इत्यादयः) । अग्नौ प्राकृतेषु

तैसं ४.१.९ आकूतिम् अग्निं प्रयुजं स्वाहा इत्यादयः होमेषु प्रत्यक्षेण श्रवणेन विधीयन्ते । ते च होमाः वैकृतैर् मन्त्रैर् भवितव्यम् । १०.३.२५ सूत्रम् – आवृत्या मन्त्रकर्म स्यात् ।

तैसं ७.१.४ वैखानसं पूर्वेद्युः साम भवति (षोडशी उत्तरे) । १०.५.५३,५४

तां १४.४.६ वैखानसं भवति । 'न किष्टं कर्मणा नशद्' इति (प्रगाथे कृते) तृचे गातव्यम् ।

साम ११५५ ऋ ८.७०.३ न किष्टं कर्मणा नशद् यश्चकार सदावृधम् । इन्द्रं न यज्ञैर् विश्वगूर्तमृभ्वस समधृष्टं धृष्णुमोजसा ॥

साम ११५६ ऋ ८.७०.४ अवाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः । सं धेनवो जायमाने अनोनवुर् आवक्षामीरनोनवुः ॥ १०.५.५३,५४

तैब्रा ३.८.२०.४ वैतसे कटे प्राजापत्यान् चिनोति । १.३८ चिते अग्नौ अधिवैतसे कटे अश्वं चिनोति ।

आप ५.१४.३ वैद्युताद् वृष्टिकामस्य आहृत्य अवदध्यात् । १२.४.१७

आप ३.१५.४ वैमृधेष्टिः- अग्नीषोमीयम् एकादशकपालं पौर्णमास्याम् अनुनिर्वपति, आदित्यं वृते चरुं, सारस्वतचरुं अमावास्यायां, पौष्णं चरुम्, ऐन्द्रम् एकादशकपालम् अमावास्यायां पौर्णमास्यां च, अभिचरतो आतृव्यवतो वा । १०.८.१३

तैसं १.५.११ तत्र याज्यानुवाक्ये-अदितेः – अदितिर् न उरुष्यत्वदितिः शर्म प्र यच्छतु । अदितिः पातु अंहसः ॥

तैसं १.५.११ महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूची सुशर्माणमदितिं सुप्रणीतिम् ॥

तैसं १.६.१२ ऐन्द्रे– इन्द्रं वो विश्वतस्परि, हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥

तैसं १.६.१२ इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः । शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥

तैसं १.८.२२ सारस्वते - प्र णो देवी सरस्वती वाजेभिर् वाजिनीवती । धीनामविष्यवतु ॥

तैसं १.८.२२ आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् । हवं देवी जुजुषाणा घृताची शृण्वन्ती नः वाचमुशती शृणोतु ॥

तैसं ४.१.११ पौष्णे याज्यानुवाक्ये – पूषा गा अन्वेतु नः पूषा रक्षत्ववर्वतः। पूषा वाजं सनोतु नः॥
शुक्रं ते अन्यद्यजतं ते अन्यद् विपुरुषे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ १०.८.१३

आप ३.१५.४ वैमृधे सप्तदश सामिधेन्यः। १०.८.१३ सप्तदशसामिधेनीको यथाश्रद्धदक्षिणः।

तां १२.१०.१० वैराजः पृष्ठः। ७.३.३५ वैराजं साम भवति विराट्सु स्तुवन्ति 'पिबा सोम' अस्मिन् तृचे पृष्ठस्तोत्रतया कार्यम्।

वैराजसाम ९२७ पिबा सोममिन्द्र मदन्तु त्वा, यं ते सुषाव हर्यश्वाद्रिः। सोतुर् बाहुभ्यां
ऋ ७.२२.१ सुयतो नार्वा॥

सामपृष्ठं ९२८ ऋ ७.२२.२ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि। स त्वामिन्द्र प्रभूवसो ममत्तु॥

साम ९२९ ऋ ७.२२.३ बोधा सु मे मघवन् वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम्। इमा ब्रह्म सधमादे जुषस्व॥

तां १४.९.७ वैरूपपृष्ठम्। ७.३.३५ वैरूपं भवति। 'अध्वर्यो अद्रिभिर्' इति एतस्याम् उत्पन्नम्।

सामवैरूपं १२२५ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आनय। पुनाहीन्द्राय पातवे॥
ऋ ९.५१.१

सामपृष्ठं १२२६ तवत्य इन्दो अन्धसो देवा मधोर्व्यशत। पवमानस्य मरुतः॥
ऋ ९.५१.३

सामपृष्ठं १२२७ दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्॥ ७.३.३५
ऋ ९.५१.२

तां १६.५.२४ वैरूपं होतुः साम, वैराजं मैत्रावरुणस्य, रैवतं ब्राह्मणाच्छंसिनः, शाक्वरम् अच्छावाकस्य। ७.३.८

जैब्रा २.१७५ वैशाख्याम् अमावास्यायां सप्तदशमारुतीस्त्रिवत्सा अप्रवीता उपाकरोति। ११.२.५४

तैसं २.५.१० वैश्यस्य सप्तदश्यम्। ६.६.३७ सप्तदशानुब्रूयाद् वैश्यस्य, सप्तदशो वै वैश्यः।

याज्ञस्मृ १.९२ वैश्यायां क्षत्रियाद् उत्पन्नो माहिष्यः। ६.१.४ न्यामा. वैश्याशूद्रयोस्तु राजन्यात् माहिष्योग्रौ सुतौ स्मृतौ।

तां १८.४.५ वैश्यो वैश्यस्तोमेन यजेत। ६.६.३७; ९.२.४८; १०.४.४३; १०.८.३५; ११.४.४३

तैब्रा २.७.२.२ वैश्यो वैश्वदेवः। १.४.२४ वैश्वदेवो हि वैश्यः।

मैसं २.२.५ वैश्वदेवं चरुं निर्वपेद् भ्रातृव्यवान्। तं बर्हिषदं कृत्वा शम्यया स्फ्येन व्यूहेत्, इदम् अहम् अमुं च अमुं च व्यूहामि। यं द्विष्यात् तं ध्यायेत् यद् अधोऽवमृद्येत् यद् अधोऽवमृद्येत् यच्च स्फ्ये आश्लिष्येत् तत विष्णवे उरुक्रमाय अवद्येत्। १०.१.१ द्वादशकपालम्।

तैसं २.१.६ वैश्वदेवं धूम्रम् आलभेत। ९.३.४१ (वैश्वदेवं बहुरूपम् आलभेत वैश्वदेवीं बहुरूपामालभेत।)

तैब्रा १.३.४,४,५ वैश्वदेवीं कृत्वा पशुमिश्नन्ति।५.२.२ सूत्रम् सर्वेषां (सप्तदश प्राजापत्यपशूनाम्)

शत ५.१.३.३-७ वा एकजातीयं कृतानुपूर्व्यत्वात् । एकजातीयानुसमयः कर्तव्यः तत्सहत्वं श्रूयते– वैश्वदेवीं कृत्वा पशुमिश्नन्ति (मारुत्या वशाया वपां हुत्वा सप्तदशानां वपानाम् एकधा जुहोति) ।

तैसं २.३.९ वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकामः । ४.३.२९; ४.४.६; ६.३.८; ९.३.१; १०.४.७

तैब्रा १.६.२.५ वैश्वदेवी हि तत्र आमिक्षा समवैति । १.४.१५ वैश्वदेव्यामिक्षा ।

मैसं १.१०.१३ वैश्वदेवे त्रिंशत्संपत्तिर् आहुतीनां न युज्यते । १२.१.४

मैसं १.१०.८ वैश्वदेवेन यजेत पशुकामः, न वरुणप्रघासैर्, न साकमेधैर् हि पशुकामः । १.४.१३

मैसं ४.६.८ वैश्वदेत्रो ग्रहयजिः (यज्ञः) । १२.१.२६ वैश्वदेवं (ग्रहं) अभिगृह्णाति । यद् वैश्वदेवः प्रातःसवने हूयते प्रातःसवने वा एतद् वैश्वदेवे देवतास्तर्पयन्ति ।

मैसं १.१०.१ वैश्वदेव्यामिक्षा । ८.२.१९,२०

तैसं २.२.५ वैश्वानरं द्वादशकपालं निर्वपति पुत्रे जाते, यद् अष्टाकपालो भवति गायत्रिया एव एनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृता एव अस्मिन् तेजो दधाति, यद् दशकपालो विराजा एव अस्मिन् अन्नाद्यं दधाति, यद् एकादशकपालस्त्रिष्टुभा एव अस्मिन् इन्द्रियं दधाति, यद् द्वादशकपालो जगत्या एव अस्मिन् पशून् दधाति, यस्मिन् जाते एताम् इष्टिं निर्वपति पूत एव सः तेजस्वी अन्नादः इन्द्रियावी पशुमान् भवति । १.४.१७-२२

तैसं २.२.५ वैश्वानरं द्वादशकपालं निर्वपेद् अमावास्यां वा पौर्णमासीं वा अतिपाद्य संवत्सरो वा अग्निर् वैश्वानरः संवत्सरम् एव प्रीणाति, अथो संवत्सरम् एव अस्मै उपदधाति ।

आप ९.१४.३ वैश्वानरं द्वादशकपालं निर्वपेद् यदि पत्नीः संयाजयन् कपालम् अभिजुहुयात् । १२.३.१६ न्यामा. (पत्नी संयाजाहुतिर् यदि कपाले पतति ततो अग्निर् वैश्वानरस्तन्त्रमध्ये भवति ।)

ऋ ३.२६.१ वैश्वानरः– अग्नेर् अभिधानम् । १०.४.२३ वैश्वानरं मनसा अग्निम् ।

तैसं ७.५.१ वैश्वानरो ज्योतिष्टोमः प्रायणीयम् अहर् भवति । ७.३.५ ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद् दधते ।

शांब्रा १५.२१.१ वैश्वामित्रो होता भवति । ६.६.२६

लाट्या २.६.५ वैष्टुतं वै वासः, श्रीर् वै वासः, श्रीः साम । १.३.४ तं. (शाट्यायने- औदुम्बरीप्रकरणे औदुम्बरीवेष्टनस्य मूलम्)

तैसं १.८.८ वैष्णवं त्रिकपालम् । १०.५.१

मैसं २.६.४ वैष्णवस्त्रिकपालः । ७.३.१७

मैसं ३.६.८ वैष्णवीम् अनूच्य वाग् यन्तव्या । १०.५.१ सारस्वतीम् अनूच्य वाग् यन्तव्या बार्हस्पत्याम् अनूच्य वाग् यन्तव्या ।

मैसं ३.९.२ वैष्णवीम् अनूच्य आच्छेत्यो (यूपः) । ११.२.२७

तैसं ६.२.१ वैष्णवो नवकपालो भवति । ७.३.१७

मैसं २.२.५ वैष्णवो वैश्वदेवस्य । १२.२.१४ वैश्वदेवं द्वादशकपालं निर्वपेत् ... यदधोऽवमृद्येत यच्च स्फ्ये आश्लिष्येत तद् विष्णवे उरुक्रमाय अवद्येत ॥

तैसं ३.१.६ वैष्णव्या इविर्धानम् उपतिष्ठते । ३.२.२३

तैसं ५.३.१ व्यत्यस्तम् ऋतव्या उपदधाति । ५.१.७ व्यत्यस्तम् ऋतव्या उपदधाति । पञ्चोपदधाति । एकेन पदेन व्यावर्तन्ते तस्माद् ऋतव्या व्यावर्तन्ते ।

भर १४.१६.६ व्यत्यस्तं षोडशिनं शंसति । ५.१.७ षोडशिशस्त्रं व्यत्यासं परिगृह्णाति 'ओथामोद इव मदामोद इव' उभयथा परिगृह्णाति ॥

पा परिभाषा १ व्याख्यानतो विशेषप्रतिपत्तिः, न हि संदेहाद् अलक्षणम् । १.३.२४ तं.

तैसं ७.४.८ व्यस्तं वा एते संवत्सरस्य अभिदीक्षन्ते, ये एकाष्टकायां दीक्षन्ते । ६.५.३७

तैब्रा २.१.१०.३ व्यृद्धे प्रायश्चित्तम् आमनन्ति–यस्य अहुतम् अग्निहोत्रं सूर्योऽभ्युदियात् मैत्रं चरुं निर्वपेत् सौर्यम् एककपालम् । भूः स्वाहा इति जुहुयात् । २.४.८

पा ६.१.६६ व्योर् वलि लोपः– लोपो व्योर् वलि । वकारयकारयोर् लोपः वलि (वरट् हल्) परतः । १.३.३० तं.

तैसं ६.१.४ 'व्रतं कुरुत' इति वाचं विसृजति । ३.२.१० (उदितेषु नक्षत्रेषु+वरम्)

तैसं २.२.२ व्रातपतीयं च कर्म । ३.२.२० अग्नये व्रतपतये पुरोडाशम् अष्टाकपालं निर्वपेद् यः आहिताग्निः सन् अव्रत्यम् इव चरेद्, अग्निम् एव व्रतपतिं स्वेन भागधेयेन उपधावति स एव एनं व्रतम् आलम्भयति । ३.२.२०

शत ११.३.१.३ व्रीहिभिर् यजेत् । ३.१.१२; ६.१.१०; ४.१.२ व्रीहिणा यागः कर्तव्यः ।

शत ११.३.१.३ व्रीहिभिर् यवैर् वा यजेत् । १०.७.६४; १२.३.१ यत् पयो न स्यात् अथ केन जुहुयात्–व्रीहियवाभ्याम् ।

मैसं २.३.१ व्रीहिमयो यवमयो वा पुरोडाशः । १०.७.५१

कात्या १.४.२ व्रीहिषु अपचत्सु नीवारा उपादीयन्ते । ६.६.३७; ९.३.२३ नियते सामान्यतः प्रतिनिधिः स्यात् ।

तैब्रा ३.७.५.३ व्रीहीणां मेध सुमनस्यमानः । ९.३.१-२ न्यामा.

आप १.२१.७ व्रीहीन् अवहन्ति । २.१.१०; ३.१.७; ४.२.२६; ११.१.२७; ११.४.४१; ७.२.१ अवहन्तेस्तण्डुलीभवनम् । अवरक्षो दिवं सपत्नं वध्यासम् इति मन्त्रेण अवहन्ति पत्नी वा दासी ।

शत १.३.१.१० व्रीहीन् प्रोक्षति । १.३.३३,३४; ९.१.११,१३; ९.२.४० (हवींषि प्रोक्षति तैसं २.६.५) 'प्रोक्षिताः स्थ' तदेताभ्यो निहनुते अथ हविः प्रोक्षति ।

कात्या २.२.१० कात्या–'प्रोक्ष यज्ञम्' इति हविषि हविःप्रोक्षणे अध्वर्युणा आमन्त्रितो ब्रह्मा 'प्रोक्ष यज्ञम्' इति मन्त्रेण प्रसौति ।

वसिष्ठस्मृ १.३२,३६ शतम् अतिरथं दुहितृमते दद्यात्, आर्षं गोमिथुनम् इति विक्रयो हि श्रूयते । ६.१.१०

तैसं १.८.१८ शतं ब्राह्मणा पिबन्ति । ३.५.५२-५३ न्यामा. शतं ब्राह्मणाः सोमं भक्षयन्ति, दश दशैकैकं चमसम् अनुसर्पेयुः । ३.५.५२

कात्या २०.७.२ शतं राजता हरितत्सखोऽसयः । ९.४.२४ रजतसुवर्णसीसं याभिः सूचिभिः एकशतेनैकशतेन अश्वस्य शरीरे असिपथान् कल्पयन्ति हरितत्–हरिणी–सीसम् ।

शत १.३.९.१९ शतं हिमाः । १.२.५३ शतं हिमाः–शतं वर्षाणि जीव्यासम् इति एतद् एव आह ।

तां २४.१९ शतरात्रम्। ८.१.१७ एतेन शतरात्रेण प्रजापतिर् देवान् अमृतं प्रायच्छत्।
शुयस २.२२.२३ शतरुद्रदेवत्ये शतरुद्राः। १.२.४८ तिस्रोऽशीतयो रुद्राणां तेषाम् उभयतो नमस्काराः असंख्याता बहुरुद्रदेवत्याः।
शत ११.५.२.२ शताग्निष्टोमं भवति। ८.३.८,१२ शताग्निष्टोमे शतोक्थ्ये च।
कात्या २४.३.३९
शत ११.५.६.६ शतातिरात्रं भवति। ८.३.८,१० शतातिरात्रं सत्रम् उपेयुः।
तैब्रा १.८.६.४ शतातृण्णायां विक्षारयन्ति। ३.५.१५ समवनयति।
तैसं १.३.७ शतायुर् वै पुरुषः। ६.७.३३,३४
तैसं २.६.१० शतेन यातयात्, सहस्रेण यातयात्, स्वर्गं लोकं न प्रजानीयात्। ३.४.१७ पितृलोकम्।
शत १.५.५.२ शतोक्थ्यं भवति। ८.३.१०
तैब्रा १.२.१.१ ऋ १०.९.४ शं नो देवीरभिष्टये आपो भवन्तु पीतये। शंयोर् अभिस्रवन्तु नः॥ १.३.२४ तं.
मैसं ३.७.७ शफेन ते सोमं क्रीणामि। १०.३.७
तैब्रा ५.४.४.७ शमयित्रीभिर् अद्भिर् अश्वस्य अवकानां च सम्बन्धो यजमानस्य कष्टं शमयति। १.२.२३ शब्दोऽवकाः। वेतसशाखया च अवकाभिश्च विकर्षति, आपो वै शान्ताः, शान्ताभिरेव अस्य शुचं शमयति।
कात्या ६.५.१८ शमिता पशुं कण्ठे गृह्णाति। ३.७.२९ तं. संगृह्य मुखं तमयन्ति अवाश्यमानम्। (यथा मार्यमाणं शब्देन करोति तथा तमयन्ति।)
ऐब्रा ७.१ शमितारम् उपनयीत। ३.४.२८
तैसं ३.१.४ शमितार उपेतन यज्ञं देवेभिरिन्वितम् पाशात् पशुं प्रमुञ्चत, बन्धाद् यज्ञपतिं परि॥ ३.७.२८-२९ न्यामा.
आप ८.५.२९ शमीमय्यः स्रुचो भवन्ति हिरण्मय्यो वा। २.१.१२
कात्या १.३.३६ शम्या– प्रादेशमात्री प्रादेशमात्रं तीक्ष्णाङ्गुष्टपर्वमात्रपृथुमुखं शतावदानम्। ३.१.११
तां २५.१३.४ शम्या परा समीयात्। २.३.२५ तं.
मैसं ४.१.७ शम्यायां इषदम् उपदधाति। ३.१.११; ४.१.८ अन्याधाय
शत ३.२.३.२३ शंयवन्ता प्रायणीया संतिष्ठते। न पत्नीः संयाजयन्ति। १०.७.३८,३९
सत्या ७.४.३ शयानत्वं परिधेर् धर्मः। ११.२.२७-२९ न्यामा. शयाः परिधयाः।
आप १८.१.१ शरदि वाजपेयेन स्वाराज्यकामो यजेत ब्राह्मणो वा राजन्यो वा। १.४.६; २.२.२१; ४.१.३३; १०.४.६
तैसं २.१.५ शरमयं बर्हिर् भवति। ८.३.३१; १०.४.१,२,८; १०.७.११,५१; १२.३.७
मैसं २.१.६ कुशेषु शरशब्दः कल्पयितव्यः। कुश-बर्हिः कौश एव बर्हिः कार्यम्। शरवणम् एव इदं कुशवनम्। ८.३.३३,३४; सूत्रम्– तथा शरेषु अपि। शरशब्दस्यापि प्रयोगः कुशवने।
अमर २.४.१६६ अस्त्री कुशः कुथो दर्भः पवित्रम्। ८.३.३३
शत ३.१.३.१३ शरेषीकयाऽनक्ति। ३.८.५
मनुस्मृ ५.८७ शवशिरसां स्पर्शनं स्मृतिप्रतिषिद्धम् अपि क्रियते। ६.६.२ नारं स्पृष्ट्वाऽस्थि सस्नेहं स्नात्वा विप्रो विशुध्यति।

तां २५.७.१ शाक्त्यानाम् अयनं षट्त्रिंशत् संवत्सरम् । ३.८.४२ तत्र संस्थिते संस्थिते

आप २३.११.१३ अहनि गृहपतिर् मृगयां याति स तत्र यान् मृगान् हन्ति तेषां तरसाः पुरोडाशाः सवनीयाः मांसमयाः भवेयुः ।

तां १६.५.२४ शाक्वरम् अच्छावाकस्य । ७.३.९

तां १३.४.१ शाक्वरम्–एतेन शक्नुहि वृत्रं हन्तुम् इति तत् शक्वरीणां शक्वरीत्वम् ।

साम ६४१ विदा मघवन् विदा गातुमनु शँसिषो दिशः । शिक्षा शचीनां पते पूर्वीणां पुरुवसो ॥ महानाम्न्यार्चिकः

साम ६४२ आभिष्टवमभिष्टिभिः स्वाऽर्ण॥ शुः । प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥

साम ६४३ एवा हि शक्रो राये वाजाय वज्रिवः । शविष्ठ वज्रिन् ऋञ्जसे मँहिष्ठ वज्रिन्नृञ्जसे आ याहि पिब मत्स्व ॥

साम ६४४ विदा राये सुवीर्यं भुवो वाजानां पतिर् वशाँ अनु । मंहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥

साम ६४५ यो मँहिष्ठो मघो नामँ जुह्वः शोचिः । चिकित्वो अभि नो वयेन्द्रो विदे तमु स्तुहि ॥

साम ६४६ ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम् । स नः स्वर्षदति द्विषः ऋतुश्छन्दऋतं बृहत् ॥

साम ६४७ इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् । स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ॥

साम ६४८ पूर्वस्य यत्ते अद्रिवोऽ॥शुर्मदाय सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते । वशी हि शक्रो नूनं तन्नय्यँ संन्यसे ॥

साम ६४९ प्रभो जनस्य वृत्रहन् त्समयेषु ब्रवावहै । शूरो यो गोषु गच्छति सखां सुशेवो अद्वयः ॥

साम ६५० (अथ पञ्च पुरीषपदानि) – एवाह्येऽ३ऽ३ऽ३ व एवाह्यग्ने एवाहीन्द्र एवा हि पूषन् । एवा हि देवाः ओ एवा हि देवाः ॥

भर १.२.१७,१८ शाखया गां दोहयति । ४.२.९ एकां शाखया उपस्पृशति प्रस्थिता अनुमन्त्रयते शुद्धा अपः सुप्रपाणे पिबन्तीः शतमिन्द्राय शरदो दुहानाः (रुद्रस्य हेतिः परि वो वृणक्तु ॥ तैब्रा २.८.८.१२)

तैब्रा ३.२.१.२ शाखया गाः प्रापयति । ४.२.९ प्रापयति

तैब्रा ३.२.१.१ शाखया वत्सान् । ४.२.९ अपाकरोति ।

पा ५.३.१०३,९६ शाखादिभ्यो यत् इव प्रतिकृतौ । ३.२.१ तं.

पा ४.१.६३ वा काशिका शाखाऽध्येतृवाची शब्दो जातिकार्यं लभते । ६.१.१७-२१ न्यामा. स्त्रियां ङीष् । कठी, बह्वृची । आकृतिग्रहणाज् जातिर् लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥

आप १.६.६ शाखां परिवास्य । ४.२.८ मूलतः शाखां परिवास्य उपवेषं करोति ।

तैब्रा ३.२.१,३ शाखादृणं गवां प्रस्थापनं गवां प्रस्नावनम् इत्येवमादयः सांनाय्यस्य धर्माः । ३.१.७

पाम १.३.१२ शाटकं कर्तुं सूत्राणि धयन्ति । ११.२.६४

अमर २.४.३२ पा ४.१.१०५ — शाण्डिल्यः अग्नेर् अभिधानम् । १०.४.२३ शाण्डिल्यः पावकान्तरे । शण्डिलस्य गोत्रापत्यम्–शण्डिलस्य गोत्रापत्ये यञ् । १०.४.२३ गर्गादिभ्यो यञ् । गार्ग्यः वात्स्यः प्राचीनयोग्यः जामदग्न्यः पाराशर्यः धौम्यः माण्डव्यः पौलस्त्यः बाभ्रव्यः ।

शत १४.७.१.६ — शान्तायां वाचि किं ज्योतिर् एव अयं पुरुषः आत्मज्योतिः सम्राड् इति होवाच । १.१.५

व्यासस्मृ १.३८ — शापानुग्रहसमर्थाः महर्षयः श्रूयन्ते । १.३.७ तं. शापानुग्रहसामर्थ्यं ऋषीणां च सलोकताम् ।

भरद्वाज ७.१२.१२,१४ — शामित्रम् अपि आध्वर्यवे समाख्यातम् । ३.७.२ स्नानात् अध्वर्युणा कर्तव्यं तस्मात् शमनात् शमिता अध्वर्युर् यजमानम् अभिमन्त्रयते ... स शामित्रो भवति ।

भर १२.१६.५,६ — शालामुखीयः एषोऽत ऊर्ध्वं गार्हपत्यो भवति । १२.१.१२ शालामुखीये पाशुकानि आज्यानि गृह्णाति एतस्मिन्नेव, अत ऊर्ध्वं गार्हपत्यानि कर्माणि कुर्वन्ति ।

पाम १.१.५ — शाल्यर्थं कुल्याः प्रणीयन्ते सान्यश्च पानीयं पीयते उपस्पृश्यते च । ४.१.१२

पाम १.१.१.११ — शास्त्रपूर्वकप्रयोगे अभ्युदयः । १.३.२४ वार्तिककारः ।

वाराहगृ ४.२४ — शिखाकर्म कर्तव्यम् । १.३.१० यथार्थं केशयत्नान् कुर्वन्ति, दक्षिणतः कपर्दो वसिष्ठानाम्, उभयतो अत्रिभार्गवकाश्यपानां, पञ्चचूडा अङ्गिरसां, शिखिनो अन्ये वाजिम् एके मङ्गलार्थम् ।

तैसं ७.५.५ — शिपिविष्टवतीषु स्तुवते । २.१.२४ शिपिविष्टशब्दवतीषु ऋक्षु स्तुवते-सामानि ।

साम १६२५ ऋ ७.१००.६ — किमित्ते विष्णो परिचक्षि नाम प्र यद् ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदपगूह एतद् यदन्यरूपः समिथे बभूथ ॥

साम १६२६ ऋ ७.१००.५ — प्र तत्ते अद्य शिपिविष्ट हव्यमंयः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तव समतव्यान् क्षयन्तमस्य रजसः पराके ॥

साम १६२७ ऋ ७.१००.७ — वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

ऋ ७.१००.६,५,७ — शिपिविष्टवतीः शंसति । २.१.२२; ७.१.१७ शिपिविष्टशब्दवतीः ऋचः पठति ।

शत ३.४.१.१ — शिरो वा यज्ञस्य आतिथ्यं बाहू प्रायणीयोदयनीयौ, अमितो वै शिरो बाहू भवतः, तस्माद् अमितः आतिथ्यम् एते हविषी भवतः प्रायणीयः उदयनीयश्च ।

शत ३.३.२.७ — शुक्रं ग्रहं गृह्णाति । १०.४.३ शुक्रं हि अस्माद् ग्रहं ग्रहीष्यन् भवति । १०.४.४५-४६ व्यामा.

तैसं १.१.१० — शुक्रं त्वा शुक्रायां धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामि ।

मैसं ४.६.३ — शुक्रं यजमानोऽन्वारभते । ६.१.२४;९.१.४०; १०.२.४७, ४९,५९; १२.४.२८

तैसं ७.२.७ — शुक्राग्रान् गृह्णीयात् अभिचरतः । १०.५.६७,७०,७३,७५

तैब्रा १.२.३.१,२ — शुक्राग्रो विष्णुवान् इति उच्यते । १०.५.५८,५९ शुक्राग्रा ग्रहा गृह्यन्ते विष्णुवान् एकविंशोऽहर् भवति ।

मैसं ४.६.३	शुक्रान्वारम्भणम् । १०.२.४७
भरद्वाज १३.२३.१०,११	शुक्रामन्थिप्रचारे एव सवनमुखीयाः । ३.२.२९ ये शुक्रामन्थिप्रचारे सवनमुखीया ऐन्द्रास्ते भवन्ति ।
शांब्रा २५.१०	शुक्लो होता । १.३.१८ शुक्लः एतस्य अहः पिङ्गाक्षो होता स्यात् ।
तां १९.४.६	शुद्धाशुद्धीये भवतः । १०.४.१६,१७,१८,२० नौधसस्य ऋक्षु 'पद' इति अनेन निधनेन उपेतम् ।
सामशुद्धाशुद्धीयम् ६८५	तं वो दस्ममृतीषहं वसोर् मन्दानमन्धसः । अभि वत्सं न स्वसरेषु धेनव
ऋ ८.८८.१	इन्द्रं गीर्भिर् नवामहे ॥
साम ६८६	शुक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् । क्षुमन्तं वाजं शतिनं
ऋ ८.८८.२	सहस्रिणं मक्षू गोमन्तमीमहे ॥
तां १९.४.६	शुद्धाशुद्धीयं साम स्वासु ऋक्षु गीयते । १०.४.१६,१७,१८,२०
साम १४०२	एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना । शुद्धैरुक्थैर् वा वृष्वाँसँ शुद्धैराशीर्
ऋ ८.९५.७	वान्ममत्तु ॥
साम १४०३	इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः । शुद्धो रयिं विधारय शुद्धो
ऋ ८.९५.८	ममद्धि सोम्यः ॥
साम १४०४	इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो
ऋ ८.९५.९	वाजं सिषाससि ॥
तैसं १.३.१	शुन्धध्वं दैव्याय कर्मणे । ३.३.१४ पात्राणि दैव्याय कर्मणे शुन्धध्वम् । सर्वाणि
कात्या २.३.३९	पात्राणि एकत्रराशीकृत्य प्रोक्षणम् ।
काठकसं १५.९	शुष्कदतिर् दण्डउपानद्दौ दक्षिणा । १०.२.२२
कात्या २२.१.१०	शूद्रश्च न देय इति अन्वादेशः । ६.७.६ (विश्वजिति सर्वस्वदाने दासी दासाश्च न देयाः ।)
याज्ञस्मृ १.९२	शूद्रायां वैश्याद् उत्पन्नः करणः । ६.१.४४ न्यामा. वैश्यात्तु करणः शूद्रायाम् ।
शत २.५.२.२३	शूर्पेण अन्नं क्रियते । १.२.२९,३० शूर्पेण जुहोति तेन हि अन्नं क्रियते ।
शत २.५.२.२३	शूर्पेण जुहोति, तेन हि अन्नं क्रियते । १.२.२७,३०; २.१.३,३३; ८.१.११
शत १.१.४.११,२२	शूर्पेण विविनक्ति । ३.१.११; ४.१.१८ शूर्पम् आदत्ते वायुर् वो विविनक्तु इति एष विविनक्ति ।
वाराह ३.२.७.८५	शूलैश्च मासरेण च अवभृथम् अभ्यवयन्ति । १०.१.३७; ४.१.३८
तैसं १.३.१३	शृणोत ग्रावाणः । १.२.३५,४५,४६
तैसं २.५.२	शृते चरुं दधनि चरुम् । ६.५.१,२;९.४.४१,४२,४३;१०.१.३०;१२.४.१५
आप ८.३.१२	शेषं समं विभज्य समुपहूय भक्षयन्ति । ८.२.३ शेषं सर्वे समुपहूय भक्षयन्ति । समुपहूय
पा १.३.७८	शेषात् कर्तरि परस्मैपदम् । ३.४.१३ तं.
तां २०.१६.६	शोभतेऽस्य मुखम् य एवं वेद । १.२.३,१५
तैब्रा १.७.१०.६	शौनःशेपम् आख्यापयति । ३.१.१४; ४.४.१; ५.२.२१
तैसं ४.२.११ ऋ ६.६०.१	श्रथद् वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् । हरज्यन्तां वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥ ३.३.१२ ऐन्द्राग्नैः याज्या

छांड ३.१४.३ श्यामाकतण्डुलमात्रादि । २.१.५ तं. एष मे आत्मा अन्तर्हृदयेऽणीयान् व्रीहेर् वा यवाद् वा सर्षपाद् वा श्यामाकाद् वा श्यामाकतण्डुलाद् वा । एष मे आत्मा अन्तर्हृदये ज्यायान् पृथिव्याः ज्यायान् अन्तरिक्षाद् ज्यायान् दिवो ज्यायान् एभ्यो लोकेभ्यः ।

तैब्रा १.३.४.४ श्यामास्तूपरा एकरूपाः । २.२.२१

तां ८.५.७,८,१२ श्यावाश्वम् आन्धीगवं च द्वे सामनी, तयोः पूर्वाऽनुष्टुप् उत्तरे गायत्र्यौ, तासाम् आनुष्टुभः प्रगाथः । ९.२.२५/३

सामश्यावाश्वं ६९७ पुरोजिती वो अन्धसः सुताय मादयित्नवे । अपश्वानं श्रथिष्टन सखायो
ऋ ९.१०१.१ दीर्घजीह्व्यम् ॥ अनुष्टुप्

साम ६९८ ऋ ९.१०१.२ (सखायो दीर्घजिह्व्यम् +) यो धारया पावकया परि प्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः ॥

साम ६९९ ऋ ९.१०१.३ (इन्दुरश्वो न कृत्व्यः +) तं दुरोषमभी नरः । सोमं विश्वाच्या धिया यज्ञाय सन्त्वद्रयः ॥ इदमेव आन्धीगवं साम ।

तैसं ५.४.११ मैसं ३.४.७ श्येनचितं चिन्वीत स्वर्गकामः । १.३.३३ श्येनाकारम् इव चितम् अग्निस्थलम् इष्टकाचयनेन निर्वर्तितम् ॥

तैब्रा ३.६.६.१,२ श्येनम् अस्य वक्षः कृणुतात्, प्रशसा बाहू, शला दोष्णी, कश्यपे वाऽसौ, अच्छिद्रे श्रोणी, कवषोरू स्रेकपर्णाऽष्ठीवन्ता । ९.४.२५

षड् ४.२.१,२ श्येनेन अभिचरन् यजेत । १.१.१,२; ७.१.१३; ८.१.१६; २.१.१.२

षड् ४.२ श्येनो नाम एकाह आभिचारिकः ज्योतिष्टोमपूर्वकः ज्योतिष्टोमिकविध्यन्तः । ७.१.१३

तैसं ३.२.१ श्येनोऽसि गायत्रीछन्दा अनु त्वा आरभे स्वस्ति मा संपारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वा आरभे स्वस्ति मा संपारय सघाऽसि जगतीछन्दा अनु त्वा आरभे स्वस्ति मा संपारय । १०.५.८८ पवमानानाम् अन्वारोहाः ।

सामश्रवसं २५८ श्रवसंसाम- बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् । येन ज्योतिर् जनयन्नृ-
ऋ ८.८९१ तावधो देवं देवाय जागृवि ॥ १०.१.२०

आपध २.७.१६ श्राद्धादीनि अपरपक्षे अपराह्णे । ६.८.२५

आपध २.४.२.६ श्रावण्यां पौर्णमास्यां व्रतानि उपाकृत्य अर्धपञ्चमान् मासान् (४॥) स्वाध्यायम् अधीयीत । ९.२.३

मनुस्मृ ४.९५ श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांसि अधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥

महाभारत १२.३२७.४९ श्रावयेत् चतुरो वर्णान्, कृत्वा ब्राह्मणमग्रतः । वेदस्याध्ययनं ह्येतद्, तच्च कार्यं महत् स्मृतम् । १.२.७ तं. १.३.३८

याज्ञस्मृ १.७ श्रुतिः स्मृतिः सदाचारः, स्वस्य च प्रियमात्मनः । सम्यक् सङ्कल्पजः कामो, धर्ममूलमिदं स्मृतम् ॥ १.३.५-७ न्यामा.

तां ५.४.१० श्लोकानुश्लोकाभ्यां हविर्धाने उपतिष्ठते । १०.४.१६

तैसं ७.५.८ श्लोकेन पुरस्तात् सदसः स्तुवते, अनुश्लोकेन पश्चात् सदसः, क्रौञ्चेन चास्वालम् अवेक्षमाणः स्तुवते । १.४.१६

सामश्लोक ४३९ ऋ ५.३१.४/२	ब्रह्माण इन्द्रं मदयन्तो अर्केरवर्धयन्नहये हन्तवा उ ॥
साम अनुश्लोक ४४० ऋ ५.३१.४/१	अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥
पाम १.१.२४.८ वा	श्वेतो धावति अलम्बुसानां याता । ४.३.४ द्विछं वाक्यं श्वेतो (गौ) श्वा इतो श्वोभूते हि यजते । १२.२.१९
तैसं १.६.७	
तैसं ५.६.१०	षट् चितयो भवन्ति षट् पुरीषाणि द्वादश संपद्यते, द्वादशमासाः संवत्सरः, संवत्सरे एव प्रतितिष्ठति । ४.४.१६
तैसं २.५.१०	षट्त्रिंशतम् अनुब्रूयात् पशुकामस्य (सामिधेनीः) । १०.५.२७ (भाष्ये तु 'षड्विंशति,' श्रुतौ नास्ति)
मैसं ३.८.४	षट्त्रिंशत्प्रक्रमा प्राची चतुर्विंशतिर् अग्रेण त्रिंशत् जघनेन इयति शक्ष्यामहे । ३.७.७,९
तां. २५.७.२	षट्त्रिंशत्संवत्सरे (शाक्त्यानाम् अयने) तरसमयाः पुरोडाशा सवनीयाः । २.१.२;३.८.४२
तां १०.३.९	षट्त्रिंशदहो वा एष द्वादशाहः । ११.४.२१ द्वादशदीक्षा, द्वादशोपसदो, द्वादशप्रसुतः, षट्त्रिंशदेता रात्रयः ।
तैसं ६.१.८; ३.१.३ आप १०.२३.२	षट् पदानि अनुनिष्क्रामति सप्तमं पदं गृह्णाति, यर्हि हविर्धाने प्राचीं प्रवर्तेयुः । तर्हि तेन अक्षम् उपाज्यात् । ४.१.२५ सप्तमे पदे जुहोति ।
तैसं ४.१.९; १.२.२	षट् पूर्वान् जुहोति षड् उत्तरान् । १०.३.२७ पूर्वान् प्राकृतान् आकूतिम् अग्निं प्रयुजम् उत्तरान् वैकृतान् आकूत्यै प्रयुजे अग्नये ।
तैसं ७.४.६	षडङ्गा भवन्ति । ८.४.३
तैसं ६.२.३	षडुपसद उपसाद्यन्ते । १०.७.४३ अप्रयाजास्ताः अननुयाजास्ताः इति प्रतिषेधात् प्रयाजानुयाजानुयाजान् वर्जयित्वा अवशिष्टाः धर्माः कर्तव्याः । १०.७.४२ तिस्रः उपसदः उपैति, त्रय इमे लोका इमान् एव लोकान् प्रीणाति, षट् संपद्यन्ते ।
आप १६.३५.६	षडुपसदो अग्नेश्चित्यस्य भवन्ति । २.३.२१;५.३.१ तिसृणाम् उपसदाम् आवृत्त्या षट् संपद्यन्ते ।
शत २.२.२.३-५	षड् देया द्वादशदेयाश्चतुर्विंशतिर् (गावः) देयाः । १.३.३१,३४
तैसं ५.४.६	षड्भिर् आहरति । १२.३.३० षड्भिर् हरति ।
मैसं ३.६.६	षड्भिर् दीक्षयति । १०.३.२३,२६ षट् प्राकृतीनां षड् वैकृतीनां द्वादश-आहुतीर् जुहोति ।
तैसं ७.२.१	षड्रात्रेण यजेत । १०.५.१ यजेरन् ।
तैसं २.५.१०	(षड्विंशति) षट्त्रिंशतं (सामिधेनीर् अनुब्रूयात् पशुकामस्य ।) १०.५.२७
तैब्रा ३.६.३.३	षड्विंशतिर् अस्य वङ्क्रयः ता अनूष्य उच्चावयतात् । ९.४.१,७,१०
तैसं २.५.१०	षड्विंशतिरित्येव ब्रूयात् । न चतुस्त्रिंशद् इति ब्रूयात् । ९.४.१८ सूत्र– तत् प्रतिषिध्य (न चतुस्त्रिंशद्) प्रकृतिर् नियुज्यते षड्विंशति इति सा चतुस्त्रिंशद् वाच्यत्वात् – सा नियुज्यमाना चतुस्त्रिंशद् वाच्यत्वाद् वारयति । ९.४.१८

तैआ ३.४ षड् होतृमन्त्रः- (हे पशो)– सूर्यं ते चक्षुः वातं प्राणः द्यां पृष्ठम् अन्तरिक्षम् आत्मा, अङ्गैर् यज्ञं, पृथिवी शरीरैः । ३.७.१२

मनुस्मृ १०.७६ षण्णां तु कर्मणाम् अस्य त्रीणि कर्माणि जीविका । यजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः । ४.१.२/३

मनुस्मृ १०.७९ शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक् पशुकृषिर्विशः । आजीवनार्थं धर्मस्तु दान-मध्ययनं यजिः ॥ ब्राह्मणस्य प्रतिग्रहादिना राजन्यस्य जयादिना वैश्यस्य कृष्यादिना । ४.१.२/३

पा. ८.३.८२,५५ षत्वम् । २.१.१७ तं. अग्नेः स्तुत् स्तोमसोमाः । मूर्धन्यः अग्निष्टुत् अग्निष्टोम अग्नीषोम ।

पा ८.३.८३,५५ ज्योतिरायुषः स्तोमः मूर्धन्यः ज्योतिष्टोम आयुष्टोम ।

तां ७.४.८; जैब्रा १.२४३ षष्टिस्त्रिष्टुभो माध्यन्दिनस्य सवनस्य । ९.२.२८/३

महाभारत ५.१४०.१५ षष्ठे च त्वाम् अहनि द्रौपदी पर्युत्थापयति । १.३.७ तं.

तां १६.५.२४ षाडहिकानां पृष्ठानां भावात् एकाहो विश्वजित् षडहः तम् एकाहं षडहः इति आचक्षते । ७.४.१३

चरक ६.१.५२ षाष्टिकं पयसा भुञ्जीत । (यदि शालिं भुञ्जीत तत्र दध्युपसिञ्चेत्) । २.३.१

पा ४.११.४१,४० षिद् गौरादिभ्यश्च । ३.४.४६ तं. याथाकाम्यं + षिद् याथाकामी यलोपः (हलस्तद्धितस्य । पा ६.४.१५०)

आश्व ४.१.७ षोडशकर्तारो वरीतव्याः । ३.७.२४ एते अहीनैर् एकाहैर् याजयन्ति ।

तां १२.१३.१ षोडशिना यजते, षोडशी यज्ञः । ३.६.४३ षोडशी तेऽयं यज्ञक्रतुरस्तु ।

तैसं ६.६.११ षोडशिना वीर्यकामः स्तुवीत । ३.६.४२ यत् षोडशी गृह्यते इन्द्रियम् एव तद् वीर्यं यजमान आत्मन् धत्ते ।

वाराह ३.२.१.४८ षोडशी वैराजसामा । १०.६.१५ एकविंशः षोडशी वैराजसामा ।

तैसं ७.१.४ षोडश्युत्तरे । १०.५.५४ द्विरात्रे उत्तरे (द्वितीये) अहनि षोडशी गृह्यते ।

तैसं २.१.१ स (प्रजापतिः) आत्मनो वपाम् उदक्खिदत् – प्रजापतिः स्याद् वायुर् आकाश आदित्यो वा स आत्मनो वपाम् उदक्खिदत् वृष्टिं वायुं रश्मिं वा ताम् अग्नौ प्रागृह्णात् वैद्युते आर्ष्टिसे (आर्चिषे १) लौकिके वा ततो अज इति अन्नं बीजं विरुद् वा तम् आलभ्य उपयज्य प्रजाः पशून् प्राप्नोति । १.२.१०

शत ४.२.५.१२ स आश्विनं ग्रहं गृह्णाति, आश्विनग्रहं गृहीत्वा उपनिष्क्रम्य यूपं परिव्ययति परिवीय यूपं पशुं उपाकरोति, रसम् एव अस्मिन् एतद् दधाति । ३.६.२१

ऋ २.२६.३ स इज् जनेन स विशा स जन्मना स पुत्रैर् वाजं भरते धना नृभिः । देवानां यः पितरम् आविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥ ९.१.८

तैसं २.१.२ स एतान् पशून् आदित्येभ्यः कामाय आलभते, यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेय इति स एताम् अविं वशाम् आदित्याय कामेभ्य आलभेत । ९.३.४१

काठकसं ८.१२ स एतां रात्रिं व्रतं चरेत्–न मांसम् अश्नीयात्, न स्त्रियम् उपेयात् । १०.६.५६

तैसं २.३.१२ स (एव) एतं वारुणं चतुष्कपालम् अपश्यत् । ३.४.३१

तैब्रा १.५.९.७ स एष द्विदेवत्यः पशुः औपवसथ्ये अहनि आलब्धव्यः । ३.६.२० स एष उपवसथीयेऽहन् द्विदेवत्यः पशुरालभ्यते ।

शत १४.६.९.२८ स एष नेति नेति आत्मा होवाच । १.१.५

शत १२.५.२.८ स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति । १.१.५ स्वर्गो लोको जितो भवति ।

तैसं २.६.९ सकृत् परिधीन् संमार्ष्टि । ११.१.३६ परिधीन् संमार्ष्टि, सकृत् सकृत् संमार्ष्टि ।

तैसं २.६.६ सकृत् सकृद् इति स्विष्टकृदवदानवीप्सा सर्वेभ्योऽवदाने कल्प्यते । ३.४.४५

तैब्रा १.३.१०.५ सकृदाच्छिन्नं बर्हिर् भवति । (पितृयज्ञे) ११.१.३६

तैसं ६.४.४ सक्तुभिर् मन्थिनं श्रीणाति । ९.१.१२;९.४.४५

तैसं २.४.१० (सक्तु-) ससमारुतैककपालेषु । ४.२.१२ मारुतं सप्तकपालं सौर्यम् एककपालम् अग्नये धामच्छदे पुरोडाशम् ... ।

ऋ १०.७१.२ सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥ १.३.२४ तं.

तैसं ३.३.८ सक्तून् जुहोति । २.१.११

तैब्रा १.८.५.२ सक्त्वादीनां प्रदर्शनं समाधिश्च । ४.२.१३ त्रयः सक्तवो भवन्ति इन्द्रियस्य अवरुध्यै ।

छांउ ३.१४.१,२ सक्रतुं कुर्वीत । मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वम् इदम् अभ्यात्तः, अवाकी अनादरः ॥ ४.२.२३-२४ न्यामा.

छांउ ८.१५.१ स खल्वेवं वर्तयन् यावद् आयुषं ब्रह्मलोकं संपद्यते न च पुनरावर्तते । १.२.२७ तं.

याज्ञस्मृ १.९६ सङ्करजातानाम् अपि च पुनरुत्कर्षापकर्षाभ्यां सप्तमे पञ्चमे वा अन्यतरवर्णापत्तिः स्मर्यते । १.२.२ तं. जात्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेऽपिवा । व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥

मैसं १.९.६ संग्रामिणं चतुर्होत्रा याजयेत, चतुर्गृहीतम् आज्यं कृत्वा चतुर्होतारं व्याचक्षीत, पूर्वेण ग्रहेण अर्धं जुहुयात् उत्तरेण अर्धम् । ४.२.२८

वाजसं ८.१० सजूर् देवेन त्वष्ट्रा पिब । अग्ना इ पत्नीवन् सजूर् देवेन त्वष्ट्रा सोमं पिब स्वाहा । ३ २.३५ शेषभक्षे त्वष्टुर् अनुपलक्षणीयता ।

तां १६.१.४ स तं दीपयति । ५.४.४३-४४ न्यामा.

काठकसं ८.१२ स तां रात्रिं व्रतं चरेत् । १०.६.५४ आधातुश्च व्रतविधानं यस्तं श्वोऽग्निम् आधास्यन् स्यात् स तं रात्रिव्रतं चरेत् – न मांसम् अश्नीयात् न स्त्रियम् उपेयात् ।

अभिज्ञानशाकुन्तल १.२२ सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । १.३.७ तं.

मनुस्मृ ४.१३८ सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् । प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः ॥ ३.४.४२ तं.

वाराह ३.२.२.४७ सन्नाद् उदवसाय पृष्ठशमनीयेन सहस्रदक्षिणेन यजेत । १०.२.३९

आप १.५.७ सत्वकः परिधिः, अनुच्छ्रयश्च । ९.२.४१ आर्द्राः शुष्काः वा सत्वकाः परिधयः ।

सत्या ७.४.३ परिधिः अनुच्छ्रयः । ९.२.२१ शयाः परिधयः ।

कात्या २२.१.२१ सत्वग् अवभृथाद् उदेति। १२.३.१ अवभृथाद् उदेत्य रोहिण्यौ वत्सछन्यौ (वत्सत्वच्चौ) सकर्णां पुछावछाते परिदधाते॥

सामबृहत्पृष्ठम् ८०९-८१० स त्वं नश्चित्र इति बृहत्पृष्ठे उत्तरा पङ्क्तिः, पूर्वा-त्वा मिद्धि हवामहे इति

ऋ ६.४६.२;६.४६.१ बृहती। ९.२.२५/१

सामपृष्ठं ८१० स त्वं नश्चित्र वज्रहस्त धृष्णुया महःस्तवानो अद्रिवः। गामश्वँ रथ्यमिन्द्र

ऋ ६.४६.२ संकिर सत्रा वाजं न जिग्युषे॥

साम बृहत्पृष्ठं ८०९ त्वामिद्धि हवामहे सातौ वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां

ऋ ६.४६.१ काष्ठा स्वर्वतः॥

साम रथन्तरपृष्ठं ६८० रथपृष्ठं रथन्तरस्य योनिर् बृहती 'अभि त्वा शूर नोनुमो' उत्तरा पङ्क्तिः

ऋ ७.३२.२२ न त्वावाँ अन्यो ...। ९.२.२५/१

अभि त्वा शूर नोनुमोऽदुग्ध इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥

साम रथन्तरपृष्ठं ६८१ न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। अश्वावन्त मघवन्

ऋ ७.३२.२३ इन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥ ९.२.२५/१

तैसं ६.२.११ सदसि भक्षयन्ति। ३.५.१९-२१ न्यामा.

आश्व १.२३ सदस्यं वृणीते। ३.७.३८ तं.

षड् २.५.६ सदस्य उपह्वयस्व। ३.७.३८ तं. आकाशो मे सदस्यः, स माम् उपह्वयतां, सदस्य उपमाह्वयस्व।

काठकसं २५.१० सदस्यौदुम्बरी मध्यमा स्थूणा भवति। तां स्पृष्ट्वा अनपाश्रित उद्गाता

लाट्या २.६.२ उद्गायेत। ९.२.११

तैसं १.८.१८ सद्यो दीक्षयति, सद्यः सोमं क्रीणाति। ११.२.६०

तैसं २.५.११ सन्ततम् आधारयति। २.२.१३;१२.३.८,२३

भर २.१२.४ सन्ततम् ऋजुम् आधारम् आधारयति, प्रजापतिं मनसा ध्यायन्। १०.३.१३-१७ न्यामा.

मैसं २.४.१ सन्ततं वसोर् धारां जुहोति। १२.३.२१,२७

तैब्रा १.२.२.३,४ सन्ततया अतिग्राह्या गृह्यन्ते। ७.३.२६ सन्तनय एते ग्रहा गृह्यन्ते अतिग्राह्याः परःसामसु।

तैसं ५.१.९ काठकसं ६.६ सन्तापेन अग्निं जनयन्ति। १२.४.१७ यदा वा अग्निः सन्तप्यते अथ जायते।

वाराह १.३.१.२२ सं ते तन्वा तनूः सृज्यताम् इति परिमार्ष्टि पुरोडाशम्। १०.१.५५

तैसं १.३.८ सं ते वायुर् वातेन गच्छतां, सं यजत्रैर् अङ्गानि गच्छन्ताम्, सं यज्ञपतिर्-आशिषा गच्छताम्। २.१.४९ प्राणो वायुना।

षड् ४.४.४ सन्दंशेन यथा दुरादानम् आदत्ते। १.४.५

षड् ४.४.१,२ सन्दंशेनाभिचरन् यजेत्। १.४.५

शांब्रा २.९ आप ६.४.७ सन्धौ जुहोति (अग्निहोत्रं)। ५.१.३३ सन्धौ होतव्यम् इति शैलालि ब्राह्मणो भवति।

बौधाध २.३.६.२३ सन्ध्यायां मृगाः अपि न चरन्ति किमु पुनर्ब्राह्मणाः। १.१.३२ न प्रति सायं व्रजेत्।

तैसं. २.३.१२ स पर्यदीर्यत। ३.४.३१

काठकसं १५.१० सप्तदश आर्भवपवमानः । ५.३.३८ नवतिशतं स्तोत्रीयाः- अत्र ।

आश्व ४.१.६,७,८ सप्तदश ऋत्विजः । ३.७.३८;८.२.३२ होता मैत्रावरुणोऽच्छावाको ग्रावस्तुत् । अध्वर्युः प्रतिप्रस्थाता नेष्टा उन्नेता । ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोता । उद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्यः । एते अहीनैर् एकाहैर् याजयन्ति ।

तां २१.१४.८ सप्तदश च पृश्नीन् उक्षणः इति चार्थो न वक्तव्यः प्रचयाद् एव गम्येत चतुस्त्रिंशत् एतानि कर्माणि चोद्यन्ते । तेषां सप्तदशानां पर्यग्निकरणान्ते उत्सर्गः क्रियते । सप्तदशसु यथाप्रकृति आलम्भनं न च उत्सृष्टानां कर्मान्तरं योगो युज्यते । ११.२.५६

काल्या ४.१.१० सप्तदशदीक्षो वाजपेयः । १.४.७ (यदा ज्यौतिष्टोमिको विध्यन्तः)

तां. २१.६.१ सप्तदशानि पृष्ठानि । १.४.३

तैब्रा १.३.४.३ सप्तदशप्राजापत्यान् पशून् आलभते । सप्तदशो वै प्रजापतिः प्रजापतेराप्त्यै शामास्तूपरा एकरूपा भवन्ति । २.२.२१; ४.१.३३; ५.१.८; ५.२.१; १०.४.६

आप १८.६.७ सप्तदशप्राजापत्यान् पशून् संचिनुते, तान् पर्यग्निकृतान् उत्सृजते, ब्रह्मसाम्नि आलभते । ११.२.४९-५१ न्यामा.

तां २१.१४.७ सप्तदशपृश्नीर् मारुतीर् उपाकरोति । ११.२.५५

कात्या १४.४.१३,१४ सप्तदशरथान् ददाति । १०.३.७४-७५ न्यामा.

तैसं २.५.१० सप्तदशवैश्यस्य अनुब्रूयात् । (सामिधेनीः) ६.६.३८

तैब्रा १.३.६.३ सप्तदशशरावश्चरुः । १०.२.६४-६७ न्यामा.

काल्या १४.४.१३.१४ सप्तदशसप्तदशकानि ददाति । १०.३.७५ अध्वर्यवे यजुर्युक्तं रथं ददाति । सर्वेभ्यः षोडशरथान् ।

तैसं २.५.१० सप्तदश सामिधेनीर् अनुब्रूयात् । ३.६.९;१०.८.१७,१९

तैसं ६.३.७ सप्तदशसामिधेनीर् अन्वाह । ८.४.१४

मैसं. १.७.४ सप्तदशसामिधेन्यः कार्याः पुनराधाने ।

शांब्रा १.१ सप्तदशसामिधेन्यो भवन्ति अध्वरकल्पायाम् । ६.६.३९;१०.७.३२ सप्तदशसामिधेनीका इष्टयः ।

तां २१.६.१ सप्तदशानि पृष्ठानि । १.४.३;७.३.६

तैसं २.५.१० सप्तदशानुब्रूयाद् वैश्यस्य । ६.६.३६ + सप्तदशो वै वैश्यः ।

तां ४.५.५ सप्तदशा भवन्ति । ७.३.२६ सर्वेषु स्तोत्रेषु सप्तदशस्तोत्रो भवति ।

तैब्रा १.२.२.१ सप्तदशा भवन्ति । ७.३.२६ सप्त भवन्ति सन्तत्या अतिग्राह्या गृह्यन्ते ।

शत ३.६.४.२६ सप्तदशारत्निर् वाजपेयस्य यूपो भवति । ३.१.८

आश्व ४.१.८ सप्तदशावरसत्रम् आसीरन् । ६.२.१;६.३.२२;६.६.१ एते एव आहिताग्नयः, इष्टप्रथमयज्ञाः, गृहपतिसप्तदशा दीक्षित्वा समिध्य अग्नीन् तन्मुखाः सत्रम् आसते ।

तैब्रा १.३.३.२ सप्तदशैते ग्रहा गृह्यन्ते द्वये प्राजापत्याः सोमग्रहाः सुराग्रहाश्च । १०.४.४ सप्तदशप्राजापत्या ग्रहा गृह्यन्ते सोमग्रहान् सुराग्रहांश्च गृह्णाति ।

तैसं ५.१.७ मैसं ३.१.७ सप्तभिर् आ धुनोति । १०.५.१४ सप्तभिर् धूपयति ।

तैसं २.५.१० सप्तदशो वै वैश्यः । ६.६.३७ हि

तां २.१४.१ सप्तभ्यो हि करोति स एकया (बृहत्या) स तिसृभिः (ककुब्भिः) स तिसृभिः (ककुब्भिः) । ९.२.२८

आप १०.२३.२ सप्तमे पदे अध्वर्युर् अञ्जलिना गृह्णाति । ४.१.२५

तैसं ७.२.२ सप्तरात्रेण यजेत । १०.५.१

गोपथ १.५.२३ सप्त सोमसंस्थाः– अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रः वाजपेयः, अप्तोर्यामः । ३.६.४३

तां. १५.११.५ सफं साम– सफेन वै देवा इमान् लोकान् आप्नुवन् संपूर्वाद् आप्नोतेर् वर्णव्यावृत्त्या सफशब्दः प्रापणे । ९.२.२५/३

सामसफं ६९२ ऋ ९.१०८.१ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः । महि द्युक्षतमो मदः ॥

साम ६९३ ऋ ९.१०८.२ यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः । सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥ प्रगाथं कृत्वा तृचे गीयते । ९.२.२५/३

तैसं ६.६.११ समयोऽभ्युषिते सूर्ये षोडशिनं स्तोत्रम् उपाकरोति । ५.१.३५ विष्टिते

तैसं २.३.७ समन्तं पर्यवद्यति । ३.५.१.१६-१७ न्यामा.

पा २.१.१ समर्थः पदविधिः । २.१.१६ तं. विग्रहवाक्यार्थाभिधाने समर्थः ।

पा ४.१.८२ समर्थानां प्रथमाद् वा (तद्धितप्रत्ययः) । २.१.१६ तं.

पा २.१.१ समर्थानां हि पदानां समासो भवति । २.३.१ समर्थः पदविधिः ।

शत ११.९.२.११ समस्तं दाक्षिण्यं धेनुः । १०.३.५७ धेनुविधिर् भुवि कृत्स्नस्य क्रतुदक्षिणस्य कार्यं भवति ।

पा ३.४.२१,१८ समानकर्तृकयोः पूर्वकाले । १.१.१ क्त्वा

मैसं १.६.८ समानबर्हींषि भवन्ति । ११.४.१२,१४

मशककल्पसूत्र समानम् इतरं गवाम् ऐकाहिकेन । १.३.२४ तं.

मशककल्पसूत्र समानम् इतरं ज्योतिष्टोमेन । १.३.२४ तं.

पा ७.१.२६ न इतरात् छन्दसि अदड् स्वमोः (सु+अमोः) छन्दसि इतरत् न भवति ।

षड् ४.३.७;४.४.१० समानम् इतरत् इयेनेन । ७.१.१२,१३,१४,१५,१६

तां १८.११.५ समानम् वा एतद् यज्ञं विच्छिन्दन्ति यद् अभिषेचनीयस्य अवभृथम् अभ्यवयन्ति । ११.२.६०

पा १.२.४२ समानाधिकरण (कर्मधारय) समासस्तु बलीयान् । ६.१.५१ (षष्ठीसमासात् कर्मधारयो बलीयान् ।) ३.३.२४-३१ न्यामा.

आप २.९.११ समावप्रच्छिन्नाग्रौ दर्भौ अरत्निमात्रे विधूनी कुरुतः । ३.८.३२

आप १.११.७ समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रे पवित्रे कुरुतः । ३.८.३२

तैसं ६.४.८ स मित्रोऽब्रवीत् पयसा एव मे सोमं श्रीणन् । ९.४.४९ तस्मात् मैत्रावरुणं पयसा श्रीणन्ति ।

तैब्रा ३.६.१.१,२ समिद्धस्य श्रयमाणः पुरस्ताद् ब्रह्म वन्वानो अजरं सुवीरम् । आरे अस्मदमतिं बाधमानः उच्छ्रयस्व महते सौभगाय ॥ १२.३.३६-३८ न्यामा. यूपोच्छ्रयणे मन्त्रः

तैब्रा ३.५.५.१ समिधो अग्न आज्यस्य वियन्तु । तनूनपादग्न आज्यस्य वेतु । इडो अग्न आज्यस्य वियन्तु । बर्हिरग्न आज्यस्य वेतु । स्वाहा अग्निम् । स्वाहा सोमम् । स्वाहा अग्निम् । स्वाहा प्रजापतिम् । स्वाहा अग्निम् । स्वाहेन्द्राग्नी ।

स्वाहा इन्द्रम् । स्वाहा महेन्द्रम् । स्वाहा देवान् आज्यपान् । स्वाहा अग्निं होत्रा । ९.२.५९-६० न्यामा.

तैसं २.६.१ समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर् यजति, स्वाहाकारं यजति । २.२.२; ३.३.२१; ४.१.४; ५.१.४; ९.२.५९; ११.१.५,८

तैब्रा ३.५.२.९ समिध्यमानवती– समिध्यमानो अध्वरे अग्निः पावक ईड्यः । शोचिष्केश-स्तमीमहे ॥ ५.३.४

तैब्रा ३.५.२.३ समिद्धवती–समिद्धो अग्न आहुत देवान् यक्षि स्वध्वर । त्वं हि हव्यवाड् असि ॥

तैब्रा ३.६.१.३ धाय्या– पृथु पाजा अमर्त्यः घृतं निर्णीकस्वाहुतः । अग्निर् यज्ञस्य हव्यवाट् ॥

तैब्रा ३.६.१.३ तं सम्बाधो यतस्रुचः हृत्था धिया यज्ञवन्तः । आ चक्रुर् अग्निमूतये ॥ ५.३.४

तैसं ६.६.२ समिष्टयजुर् जुहोति । २.२.३ यजूंषि

पा परिभाषा १०९ समुदायप्रसिद्धिर् अवयवप्रसिद्धेर् बाधिका एव समधिगता । ६.७.२२; ६.८.४२,४३

पा परिभाषा ११९ समुदाये वाक्यपरिसमाप्तिः । ३.१.१२

तैसं ७.५.६ समुपहूय भक्षणं सोमधर्मः । ८.२.३ समुपहूय भक्षयन्ति (सोमं) ।

शांब्रा २७.७ समूढं द्वादशाहम् उपयन्ति सर्वेषां कामानाम् आप्त्यै ।

आप ७.१.१७ समे जातम् अशाखाजं, बहुपर्णशाखम्, अप्रतिशुष्काग्रम्, असुषिरम्, अभ्या-वृत्तम् अघूर्णम्, ऋजुं वृक्षं यूपार्थं गृह्णाति । १०.२.७१,७२

काठक २६.३

तैसं ६.२.६ समे दर्शपूर्णमासाभ्यां यजेत । ४.२.२३;११.२.१,२,४,१५ एतद् वै प्रतिष्ठितं देवयजनं यत् सर्वतः समम् ।

तैसं ६.२.६ समे यजेत् । ११.२.२

तैब्रा ३.७.५.११ सं पत्नी पत्या सुकृतेन गच्छताम् । यज्ञस्य युक्तौ धुर्यावभूताम् । सज्ञानानो विजहतामरातीः दिवि ज्योतिर् अजरम् आरभताम् । ६.१.२१

पा १.४.३२ संप्रदानं च कर्मणा अभिप्रेयते । ४.२.१७ कर्मणा यम् अभिप्रैति स संप्रदानम् ।

पा १.४.३२ संप्रदानं च नाम कर्मणोऽपि ईप्सिततमाद् अभिप्रेततरम् । ९.१.६

पा २.३.१३ संप्रदानं हि चतुर्थी । ४.२.१७ चतुर्थी संप्रदाने ।

पा १.३.३६,१२ संमाननम्, उत्सर्जनम्, आचार्यकरणं, ज्ञानं, भृति– वेतनं, विगणनं– ऋणात् निर्यातनं, धर्मार्थं च व्ययः एतेषु नियः आत्मनेपदं स्यात् । ९.१.६

तैसं १.३.८ सं यजत्रैर् अङ्गानि गच्छन्ताम् । २.१.४९

ऋ ७.१०३.१ संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः । वाचं पर्जन्यजिन्विताम् प्रमण्डूका अवादिषुः ॥ १.३.२४ तं.

तां २५.१,२,३,४ संवत्सरसत्राणि आदित्यानाम् अयनम्, अङ्गिरसाम् अयनं, इतिवातवतोऽयनम् । १.३.२ तं. कुण्डपायिनाम् अयनम् ।

तैब्रा १.१.६.७;९.१० संवत्सरस्य प्रतिमा द्वादशरात्रयः । ६.७.३९

तां ९.८.१३ संवत्सरे अस्थीनि याजयेयुः । २.१.१७

तैसं ५.४.२ संवत्सरं वा एनं प्रतिष्ठायै नुदति योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वश्चितयो भवन्ति अथ षष्ठीं चितिं चिनुते । ४.४.१४

गोभिलगृ २.२.२० संवेष्टितं कटम् (एवं जातीयकं वा अन्यत्) पदा प्रवर्तयन्तीं वाचयेत् ' प्र मे पति यानः पन्थाः कल्पताम् ।

तैब्रा १.४.६.२ संसवे उभे बृहद्रथन्तरे कुर्यात् । ९.२.४९;१०.६.२४

तैसं १.८.१७ संसृपां हवींषि—आग्नेयम् अष्टाकपालं निर्वपति हिरण्यं दक्षिणा (२) सारस्वतं चरुं वत्सतरी दक्षिणा (३) सावित्रं द्वादशकपालम् अपध्वस्तो दक्षिणा (४) पौष्णं चरुं श्यामो दक्षिणा (५) बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा (६) ऐन्द्रम् एकादशकपालम् ऋषभो दक्षिणा (७) वारुणं दशकपालं महानिरष्टो दक्षिणा । सौम्यं चरुं बभ्रुर् दक्षिणा (८) त्वाष्ट्रम् अष्टाकपालं शुण्डो दक्षिणा (१०) वैष्णवं त्रिकपालं वामनो दक्षिणा । ४.५.६ न्यामा.

सत्या १७.३.२७ संस्थापयत मे यज्ञम् । १०.२.५७

तैसं २.५.४ संस्थाप्य पौर्णमासी वैमृधम् अनुनिर्वपति । ४.३.३२

गोपथ १.५.२३ संस्था समाम्नाताः – अग्निष्टोमः उक्थ्यः षोडशी अतिरात्रः अत्यग्निष्टोमः वाजपेयः असोर्यामः । सप्त सोमसंस्थाः । ३.६.४१;८.३.८

आश्र ६.११.१ संस्थिते अग्न्याधेये अग्निहोत्रं जुहोति । १.४.९;२.२.१३,२३

शांब्रा १८.१४

तां १३.१२.१४,१५ संस्थिते षडहे पृष्ठ्ये मधु आशयेद् घृतं वा । १०.६.२७,२९,३१,३२,३३; १०.६.२८,३०

तैसं ६.३.४ संस्थिते सोमे प्रस्तरं प्रहरति स्वरुं च अवैशसाय । ११.३.८

षड् १.१.७ संस्थिते संस्थिते अहनि आग्नीध्रागारं प्रविश्य सुब्रह्मण्य सुब्रह्मण्याह्वानम् ।

षड् १.१.७ ११.३.२८ प्रत्यहं सुब्रह्मण्याह्वानम् । उत्करे तिष्ठन् सुब्रह्मण्याम् आह । (वेद्याः उद्धृतामृत्कटः उत्करः)

लाट्या १.३.१६

आप २१.११.१२,१३ संस्थिते संस्थिते अहनि गृहपतिर् मृगयां याति, स तत्र यान् हन्ति तेषां तरसाः पुरोडाशाः सवनीया भवन्ति । ३.८.४२

तां ८.४.६,८ संहितं साम स्वादिष्ठा वा देवेषु पशव आसन् मदिष्ठा असुरेषु ते देवा स्वादिष्ठया इति पशून् असुराणाम् अवृञ्जत । ९.२.२५

सामसंहितं ६८९ ऋ ९.१.१ स्वादिष्ठया मदिष्ठया, पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥

सामसंहितं ६९० ९.१.२ रक्षोहा विश्वचर्षणि रभि योनिमयोहते । द्रोणे सधस्थ मासदत् ॥

साम ६९१ ९.१.३ वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः । पर्षि राधो मघोनाम् ॥ गायत्रस्य तृच एव संहितस्यापि । ९.२.२५

ऐब्रा २.३ स यदग्निषोमीयं पशुम् आलभते । ८.१.१२

छांउ ८.१२.६ स यदि पितृलोककामो भवति सङ्कल्पाद् एव अस्य पितरः समुपतिष्ठन्ति, तेन पितृलोकेन संपन्नो महीयते । १.३.२० तं.

आप १२.२४.५ स यदि राजन्यवैश्यं वा याजयेत् स यदि सोमं विभक्षयिषेत् न्यग्रोधस्तिभीर् आहृत्य ताः सम्पिष्य दधनि उन्मृज्य तम् अस्मै भक्षं प्रयच्छेत् न सोमम् । ३.५.२२,४७,४८;३.६.३६;१२.४.४४

शत १.८.१.११,२४ स यो हैव विद्वान् इडया चरति इत्यभिधाय अथ प्रतिपद्यते इडोपहूतोपहूते इडोपास्माँ इडाह्वयताम् इडोपहूत सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः । उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो असृवो वाजिनीवति । (बृसयस्य=बृहतः)

शत ११.१.४.१,२ स यदि अगृहीत हविर् अभ्युदियात् प्रज्ञातम् एव तद्, एषा एव व्रतचर्या यत् पुर्वेद्युर् दुग्धं दधि हविरातञ्चनं तत् कुर्वन्ति प्रति प्रमुञ्चन्ति वत्सान् तान् पुनरपाकुर्वन्ति । तान् अपराह्णे पर्णशाखया अपाकरोति । तद् यथैवादः प्रज्ञातम् आमावास्यं हविर् एवम् एव तद् ॥ ४.३.२

शत १३.४.९.३ सर्पाः सत्रम् आसत । १.१.३२ काद्रवेयो राजा तस्य सर्पा विश ते इमे आसत ।

मुण्डकउ १.१.६ सर्वगतत्वाद् आत्मनः । २.१.५ नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीराः ॥

तैसं ६.४.९ सर्वतः परिहारम् आश्विनं भक्षयन्ति, तस्मात् सर्वा दिशः शृणोति पुरस्ताद् ऐन्द्रवायवं भक्षयति । ३.५.२०,२१

तैसं ७.५.१४ सर्वपृष्ठेष्टिः– अग्नये गायत्राय त्रिवृते राथन्तराय वासन्ताय अष्टाकपालम् (१) इन्द्राय त्रैष्टुभाय पञ्चदशाय, बार्हताय ग्रैष्माय एकादशकपालः (२) विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्य वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालः (३) मैत्रावरुणाभ्याम् आनुष्टुभाभ्याम् एकविंशाभ्यां वैराजाभ्यां शारदाभ्यां पयस्या (४) बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय चरुः (५) सवित्रे आतिच्छन्दसाय त्रयस्त्रिंशाय रैवताय शैशिराय द्वादशकपालः (६) अदित्यै विष्णुपत्न्यै चरुर् (७) अग्नये वैश्वानराय द्वादशकपालः (८) अनुमत्यै चरुः (९) काय एककपालः (१०) ।

तैसं ७.५.१५ सर्वपृष्ठेष्टिप्रयोगः– यो वा अग्नौ अग्निः प्रहियते यश्च सोमो राजा, तयोर् एष आतिथ्यं यद् अग्नीषोमीयः, अथ एष रुद्रो यश्चीयते यत् सञ्चिते अग्नौ एतानि हवींषि निर्वपेद् एष एव रुद्रो अशान्त उपोत्थाय प्रजां पशून् यजमानस्य अभिमन्येत यत् संचिते अग्नौ एतानि हवींषि निर्वपति भागधेयेन एवैनं शमयति, नास्य रुद्रो अशान्तः उपोत्थाय प्रजां पशून् अभिमन्यते दशहवींषि भवन्ति । ११.२.२३

तैसं ७.५.१४ सर्वपृष्ठेष्टिः (प्रायश्चित्तम्) । ११.२.२३

जैब्रा १.३५८ स यदि यज्ञः ऋक्तो ध्रेषं नीयात् 'भूः स्वाहा' इति गार्हपत्ये जुहुवाथ, सैव तत्र प्रायश्चित्तिः । अथ यदि यजुष्टः 'भुवः स्वाहा' इति आग्नीध्रे जुहुवाथ । अथ यदि सामतः 'स्वः स्वाहा' इति आहवनीये जुहुवाथ । अथ यदि अनुपस्मृतात् 'भूर् भुवः स्वः स्वाहा' इति आहवनीये जुहुवाथ ।

शांब्रा ६.१२ अथ यद्धि ऋचि उल्बणं स्खलितं वा स्यात् चतुर् गृहीत्वा आज्यं गृहीत्वा गार्हपत्ये आहुतिं जुहुयात् 'भूः स्वाहा' इति । यदि यजुषि उल्बणम् अन्वाहार्यपचने 'भुवः स्वाहा' इति । यदि साम्नि उल्बणं स्यात् आहवनीये 'स्वः स्वाहा' इति जुहुयात् । यदि अविज्ञातम् उल्बणं स्यात् आहवनीये 'भूर् भुवः स्वः स्वाहा' इति जुहुयात् ।

छांउ ४.१७.४-६ तद् यदि ऋक्तो रिष्येत् 'भूः स्वाहा' इति गार्हपत्ये जुहुयात्। अथ यदि यजुष्टो रिष्येद् 'भुवः स्वाहा' इति दक्षिणाग्नौ जुहुयात्। अथ यदि सामतो रिष्येत् 'स्वः स्वाहा' इति आहवनीये।

शत ११.५.८.७ यदि ऋक्तो 'भूर्' इति चतुर्गृहीतम् आज्यं गृहीत्वा गार्हपत्ये जुहुथ। यदि यजुष्टो 'भुवः' इति आग्नीध्रीये, यदि सामतः 'स्वर्' इति...आहवनीये जुहुथ। ११.२.२३

मैसं १.४.८,३७ सर्वप्रायश्चित्तम्- अयाश्च अग्नेऽसि अनभिशस्तिश्च इति। अया वै नाम एषा अग्नेः प्रिया तनूः। अया मयां धैर्येण इति खलु वा आहुः। यच्चैव अत्र यज्ञे क्रियते, यच्च न, यां चैवात्र यज्ञस्य प्रायश्चित्तिं विद्मः यां च न तस्य एषा उभयस्य प्रायश्चित्तिः। १२.१.४

जैब्रा १.२७८ सर्वप्रैषाणाम् आध्वर्यवत्वम्। ३.७.४३ तं.

मैसं २.२.२ सर्वं ब्रह्मणे परिहरति। १०.२.९,१८ परिहर्तवै

काल्या १३.२.२ सर्वर्त्विज उपवसन्ति। १०.६.५३

सत्या १७.२.३ सर्वस्तोमे सर्वा ऋचः सर्वाणि यजूंषि प्रयुज्येरन्। २.१.२३

तैसं ५.४.१२ सर्वस्तोमोऽतिरात्र उत्तमम् अहर् भवति सर्वस्य आप्त्यै सर्वस्य जित्यै, सर्वम् एव तेन आप्नोति सर्वं जयति।

तैब्रा ३.३.५ सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायाम् आज्यम्। ३.५.६; ४.२.१४; १०.८.४८

शत १२.९.२.११ सर्वस्य क्रतुदक्षिणस्य निर्वर्तिका धेनुः। १०.३.५७

तां ६.७.१५ सर्वस्वदानम्- प्रतिहर्तुर् अपच्छेदे। ६.५.५३

तां ६.७.१४ अदाक्षिण्यम् - उद्गातुर् अपच्छेदे। ६.५.५३ दक्षिणाविरहितम्

तां १७.१२.१,६ सर्वस्वारः क्रतुः शुनःकर्णी अग्निष्टोमः, मरणकामो ह्येतेन यजेत, यः कामयेत 'अनामयः स्वर्गं लोकम् इयाम्'। १०.२.५७

तां १७.१२.१ सर्वस्वारात्। ५.३.३६ सूत्रम्-यथा परेषु सर्वस्वारात्।

मैसं १.१०.७ सर्वहुतं जुहोति। ७.३.२६

सत्या १७.२.३ सर्वा ऋचः, सर्वाणि यजूंषि, सर्वाणि सामानि वाचस्तोमे पारिप्लवं शंसति। २.१.२३

सत्या १.१.३२ सर्वानुवचनानां हौत्रसमाख्यानम्। ३.७.४३ तं.

आप १४.२३.१ सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानम् आगुरते यः सत्राय आगुरते। स विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेत। सर्वाभ्य एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणाति। ६.४.३२

तैब्रा १.४.७.७ सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीते। ६.४.३३

आप १४.२३.१ स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् आप्नोति। १.३.२७ तं.

छांउ ८.१२.६ सर्वा वा स्रुचः। १.४.२३ प्रस्तरे जुहूम् आसादयति सर्वा वा स्रुचः।

आप २.९.१४ सर्वासु तिथिषु अमावास्या कार्या पूर्वपक्षे। आ पौर्णमास्या अमावास्या नात्येति। १.३.१४ पूर्वपक्षो दर्शाख्यः।

गोभिलगृ १.९.१५ सर्वे ऋत्विज उपवसन्ति। ३.८.११

द्राह्यायण २.२.८

कात्या १३.२.२

तां १६.३.१ सर्वेभ्यः (कामेभ्यः) ज्योतिष्टोमः। ४.३.२६

वाराह १.२.१.१ सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ। ४.३.२४

आप ३.१४.९

आप १४.२३.१ सर्वेभ्यो वा एष देवेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानम् आगुरते

तैसं २.६.६ यः सत्राय आगुरते, स विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षिणेन यजेत। ४.३.११

शत २.५.२.३९ सर्वेभ्यो हविर्भ्यः समवद्यति। ३.५.१,१०; ४.१.३२ अग्नये स्विष्टकृते अनुब्रूहि इति स अध्वर्युः सर्वेषाम् एव सर्वेषां हविषाम् उत्तरार्धात् सकृत् सकृत् अवद्यति।

तैसं ६.६.४ सर्वे वा अन्ये यूपाः पशुमन्तः उपशय एव अपशुः। ७.३.३३-३४ न्यामा.

तैसं ३.५.९ सर्वेषां वा एतद् देवानां रूपं यद् एष ग्रहो (दधिग्रहो) यस्य एष गृह्यते सर्वाणि एव एनं रूपाणि पशूनाम् उपतिष्ठन्ते। ४.४.१०

सत्या १७.३.२० सर्वेषां सूक्तानां वाचस्तोमे अर्थवत्ता। २.१.२३ त्रयो वाचःस्तोमास्तेषु सर्वस्तोमोऽतिरात्रः तस्मिन् सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि शंसति।

पा १.२.६३ वा सर्वो द्वन्द्वो विभाषया एकवद् भवति। १०.४.१ तं.

लाट्या २.६.१,२ सर्वौदुम्बरी वेष्टयितव्या। १.३.३ औदुम्बर्याः सर्ववेष्टनम्। विष्टुतेन वसनेन परिवेष्ट्य।

मैसं ३.९.५ सवनीयपशोर् वपया प्रातःसवने प्रचरन्ति, पुरोडाशेन माध्यन्दिने, अङ्गैस्तृतीये सवने। ११.२.६३

मैसं ३.९.५ सवनीयः पशुः। ३.६.१८ सवनीयपशोर् वपया।

शत ४.२.५.१५ सवनीयाः पुरोडाशाः। १२.२.१७ अथ सवनीयैः पुरोडाशैः प्रचरन्ति।

आप १२.१८.१२ सवनीये पशौ त्रिवृता यूपं परिवीय। ११.३.४

तैसं ६.६.११ सवने सवने गृहीतव्यः (षोडशी)। १०.५.४४ सवने सवने अभिगृह्णाति (षोडशिनम्)।

शत १४.६.९.२८ स वा अयम् आत्मा अशीर्यो न हि शीर्यते। १.१.५

काट्या १८.६.१९ स वा अहरहर् युनक्ति, अहरहर् विमुञ्चति। ११.३.२० सूत्रम्– अहर्गणे च प्रत्यहं स्यात् तदर्थत्वात्। एके अहरहर् युञ्जन्ति अहरहर् विमुञ्चन्ति।

तैसं १.१.४ सवितुः प्रसवे अश्विनोर् बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामि। २.१.४७

काठकसं ३१.७ सवितृप्रसूत इति एवैनं देवताभिः संवपति। १०.१.५२ देवताभ्यः

काठकसं १५.५ मैसं २.६.६ सवित्रे प्रसवित्रे सतीनाम् अष्टाकपालं निर्वपति। ११.३.१५

आप १४.२३.१ स विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षिणेन यजेत्। ४.३.१०

शत ३.८.२.२५ स वै ध्रुवाम् एव अग्रे अभिधारयति, ततो (तस्यै) हि प्रथमौ आज्यभागौ यक्ष्यन् (होष्यन्) भवति। ३.५.५; ५.४.४

तां १२.१३.१ स वै षोडशी नाम यज्ञोऽस्ति। ३.४.४ तं. इन्द्रो बृहत्साम अब्रवीत्। षोडशी ते अयं यज्ञक्रतुरस्तु।

छांउ ८.१२.६	स सर्वांश्च लोकान् आप्नोति, सर्वांश्च कामान् । १.३.२७ तं.
तैसं ६.५.४; २.५.६	स सोमेन इष्ट्वा अग्नीषोमीयो भवति । १०.८.६२-७० न्यामा. आग्नेयो वै ब्राह्मणो देवतया स सोमेन ।
मैसं ४.७.६	स स्तोत्रशस्त्रः षोडशी । १०.५.५१,५२
छांउ २.१०.१-४	स स्तोभस्वरकालाभ्यासविकारायां, हिङ्कारप्रणवप्रस्तावोद्गीथप्रतिहारोपद्रव-निधनवत्याम् ऋचि साम शब्दोऽभियुक्तैर् उपचर्यते । ७.२.१;९.२.३५
तैसं २.३.१२	स स्वां देवताम् आर्च्छत् । ३.४.३१
आप ३.१६.१७	सहकुम्भीभिर् आक्रमन् आह (इन्द्राय अनुब्रूहि, आश्रावय इन्द्रं यज इति प्रेषौ)। ३.५.१३ न्यामा.
आश्रगृ १.६.१	सह धर्मश्चरितव्यः । ६.१.१७
काठकसं ३६.६	सह पत्न्या जुहोति । ८.४.२४ स्त्रीपुंसौ जुहुतः । अयज्ञो वा एष योऽपत्नीकः ।
तैब्रा २.२.२.६	
तैब्रा १.३.४.५	सह पशून् आलभते (वाजपेये) एकधा वपा जुहोति । सह पशून् आलभते (साद्यस्क्रे) श्येने च । ३.८.३९
कात्या २२.३.२८	
शत १.२.२.४	सह पिशन्ति । ११.१.६५
पा २.३.६	सहयुक्तेऽप्रधाने तृतीया । ६.४.४३ सहशाखया प्रस्तरं प्रहरति ।
पा २.२.२८	सहयोगे यत्र तृतीया तस्य गुणभावः (शाखया) यत्र द्वितीया (प्रस्तरं) तस्य प्राधान्यम् ।
वाराह १.३.६.८	सह शाखया प्रस्तरं प्रहरति । ४.२.१०; ६.४.४३ सहशाखया आहवनीये प्रस्तरं प्रहरति ।
मैसं २.६.६	सह श्रपयति । ६.५.३ तं. अभ्युदयेष्टौ
आप १८.१२.२	सह सोमौ क्रीणाति (अभिषेचनीयदशपेययोः) । ११.२.५८
तां १६.८.३,६	सहस्रं दक्षिणा सहस्रं स्तोत्रीयाः । यावद् अस्य सहस्रस्य उत्तरोधरा गौर् गवि प्रतिष्ठिता तावद् अस्मात् लोकात् असौ लोकः । ३.३.४९
तैसं ७.१.७	सहस्रतमीं च दक्षिणाम् एवम् आह एतानि ते नामानि । १०.३.४९ इडे रन्ते अदिते सरस्वति प्रिये प्रेयसि महि विश्रुति इति एतानि ते अग्निये नामानि सुकृतं मा देवेषु ब्रूतात् ।
ऋ ८.२१.१८	सहस्रमयुता ददत् । २.१.३३ चित्र इद् राजा राजका इदन्यके यके सरस्वतीमनु । पर्जन्यइव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥
तैसं २.३.१४	सहस्राक्षो गोत्रभिद् वज्रबाहुर् अस्मासु देवो द्रविणं दधातु । ९.१.६-१० न्यामा.
मनुस्मृ ९.२७	सहापत्यम् उत्पादयितव्यम् । ६.१.१७ उत्पादनम् अपत्यस्य प्रजां प्रजनयावहै ।
आश्रगृ १.७	
कात्या १४.२.१५	सहालभते (वाजपेये)। ११.१.३५ वाच उत्तमम् एके । सप्तदश पशुप्राजापत्यम् एके आलभन्ते उपांशु ।
शत १.२.२.४	सहावद्यन्ति । ११.१.६६
पा २.२.२८ काशिका	सहैव दशभिः पुत्रैर् भारं वहति गर्दभी । ३.२.३४ न्यामा.
तैसं ६.२.५	सहैव अह्ना संस्थापयति । ३.३.१५ तिस्र एव साह्नस्य उपसदो द्वादशाहीनस्य । साह्नशब्देन तावत् अह्ना समाप्यमानत्वात् सहैव अह्ना संस्थापयन्ति ।
तां ३.३.१५	

तां १८.१.२१,२२ स हि अनिरुक्तः स ब्रह्मणे देयः । १०.३.६५
तैसं २.५.४ साकंप्रस्थायीयेन यजेत पशुकामः । २.३.५,११
आप ३.१६.१७ साकंप्रस्थायीयेन यजेत आज्यभागाभ्यां प्रचर्य आग्नेयेन च पुरोडाशेन अग्नीधे स्रुचौ प्रदाय सह कुम्भीमिर् अभिक्रामन् आह इन्द्राय अनुब्रूहि, आश्रावय इन्द्रं यज । १०.८.४३,५५,६१
तां १६.१३.९ साण्डस्रिसंवत्सरः सोमक्रयणः स्पर्धमानानाम् इति पूर्वस्मिन् साद्यस्क्रे आम्नाय उत्तरस्मिन् (त्रिवत्सः) । ८.१.१९;९.१.४२;१०.३.६०
आप २२.४.१३ स्त्री गौः सोमक्रयणी निवृत्ता ह्येषा स्पर्धिता ।
तां १६.१२.६ साद्यस्क्रो यागः– सद्यःक्रियाः वा, अनुक्रियाः वा, परक्रिया वा स्वर्गकामाः ।
तां १६.१२-१६ साद्यस्क्राः सहस्राः = सहस्रदक्षिणाः । ८.१.१९
पा १.४.४२ साधकतमं करणम् । १.३.२७ तं.
मैसं ३.९.५ (१५) साध्या वै देवाः । ७.३.१८ (इति आरभ्य अग्नौ श्रूयते निर्मन्थ्येन इष्टकाः पचन्ति) ते देवा अग्निं मथित्वा अग्नौ अजुहुवुः ।
तैसं १.८.४ सांतपनस्य माध्यन्दिने निरुप्यते । ११.४.१६ सांतपनेभ्यो मध्यन्दिने चरुम् ।
तैसं १.१.१ सांनाय्यधर्माः-शाखाहरणं, गवां प्रस्थापनम्, गवां प्रस्नावनं इत्यादयः । ३.१.७
ऐब्रा ३.२३ साम तृचे गीयते । १.१.१ न्यामा.
आप १८.३.१ सामभिर् युक्तं रथम् उद्गात्रे ददाति । १०.३.७५
द्र.चरणव्यूह खण्ड ३ सामवेदे सहस्रं गीत्युपायाः । ९.२.२९
साम १८२८ नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः । युञ्जे वाचं शतपदीम् ॥
जातिमेवाकृतिं प्राहुर् व्यक्तिर् आक्रियते यथा । १.१.५ तं.
स्थितं नैवेहि जात्यादेः परत्वं व्यक्ततो हीनः ॥ (जात्यात्मिका व्यक्तिः)

जायमानस्य हि पुरुषस्य अग्रे शिरो जायते, मध्ये मध्यं, पश्चात् पादौ, एवम् आग्नेयोऽग्रतः उपांशुयाजो मध्ये अग्नीषोमीयः पश्चात् । ४.४.३७ सूत्रम् – उत्पत्तौ अभिसम्बन्धात् अङ्गोपदेशः स्यात् ।

जुहोतिर् आसेचनाधिकः उत्सर्गः । ४.२.२८ सूत्रम् – तदुक्ते श्रवणात् जुहोतिर् आसेचनाधिकः । यजत्युक्तेऽर्थे जुहोति श्रूयते ।
ज्ञानस्य अप्रामाण्यस्य स्वतस्त्वं प्रामाण्यस्य परतस्त्वम् । १.१.२

ज्योतिष्टोमेन अग्निष्टोमसंस्थेन रथन्तरपृष्ठेन गवां द्वादशशतदक्षिणेन यक्ष्ये तत्र त्वम् उद्गाता भव । १०.२.३५-३८ न्यामा.

ज्योतिष्टोमे सोमयागः प्रधानम् । ४.४.४० सूत्रम् - गुणानां तु उत्पत्तिवाक्येन सम्बन्धात् कारणश्रुतिः तस्मात् सोमः प्रधानः स्यात् । त्रिवृदादिस्तोमकः सोमयागः । स ज्योतिष्टोमः ।

ज्यौतिष्टोम्यस्तु दक्षिणाः – सर्वासाम् एककर्मत्वात् प्रकृतिवत् तस्मात् नासां विकारः स्यात्। ज्यौतिष्टोम्यः हि दक्षिणाः साङ्गकर्मराशिम् अङ्गीकृत्य सकृद् दीयन्ते। १०.६.६५

तच्च विदित्वा यथानुरूपम् अनुष्ठातुं क्षमा वयं न तु वेदं पर्यनुयोक्तुम्। १.२.१ तं.

तत्काला या सुब्रह्मण्या (द्वादशाहे) सा तु आवर्तेत, प्रयोगं प्रति तस्या विशेषसंयोगत्वात्। १०.३.२२

तत् परिसमापयन् श्रुतं करोति, परित्यजन् श्रुतं जहाति। १०.५.८ इति प्रारब्धं परिसमापनीयं गम्यते।

तत् प्रख्यं च अन्यशास्त्रम्। १.४.४ सूत्रम्-अग्निहोत्रादिशब्दानां नामधेयता तत्प्रख्यन्यायः।

तत् प्रत्यक्षविहितं च आर्षकल्पेन न तत्र अनुमानं विद्यते। इति ब्राह्मण-विहितादपि आर्षकल्पविहितगरीयस्त्वं अङ्गीकृतम्। १.३.११

तत् प्रवृत्तिः गुणेषु स्यात् प्रतिपत्ति यूपदर्शनात्। ८.१.१५ ऐकादशिनाम् अर्थः तत्कारकं हेतुसंज्ञं भवति।

तत्र यूपादिकरणवद् व्याकरणपरम्परा अनादिकालत्वाद् अनुपालम्भः। १.३.२४-२९ न्यामा.

तत्रान्यान् ऋत्विजो वृणीरन्। सूत्रम् – १०.२.४२ न हि पृष्टशमनीये ये सत्राद् उदवसातारः ते कर्तारो विधीयन्ते।

तत्रार्थात् प्रतिवचनम्। ३.५.४२ तदुपहूत उपह्वयस्व इत्येतदेव प्रतिवचनम्। तत् सर्वं बलवतः पश्यम्। १.३.७ तं.

तत्सिद्धि– जाति-सारूप्य– प्रशंसा– लिङ्ग– भूमभिः। षड्भिः सर्वत्रशब्दानां गौणी वृत्तिः प्रकल्पिता। १.४.२३-२८ न्यामा.

तत्स्नेहनं करोति – प्रथमं स्नेहनं करोति। ४.१.३८ (वाजपेये)

तदागमे हि तद् दृश्यते। २.१.१ तं. सूत्रम् – शब्दवत् तु उपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथा अन्येषाम्। ४.१.१५ अश्वागते अश्वो ज्ञायते – दृश्यते।

तदादि उत्कर्षे तदन्तम् अपकर्षे स्यात्। ५.१.२४ सूत्रम् – तदादि वाऽभिसम्बधात् तदन्तम् अपकर्षे स्यात्।

'तदुपहूत उपह्वयस्व' इति अनेन अनुज्ञापयेत् (सोमपाने)। ३.५.४१ सूत्रम् – प्रतिवचनम् उत एतदेव।

तदुभयाश्रयत्वात् समत्वेनापि युज्यते। १.३.९ तं. (मनुवचनम्) नवतन्तुकं त्रिवृत्।

तदेतद् अपेशलम्। ३.१.१२

तद्धितेन देवतोपदेशः, कपालवत्ता, निर्वपतिशब्दश्च इष्टिषु दर्शपूर्णमासयोर् लिङ्गानि। ८.१.११

तद् बर्हिः परिसमाप्तायाम् आतिथ्यायाम् आसीत् पूर्वं तद् आतिथ्यायाम् अपवृक्तम् आसीत्, पूर्वं तद् आतिथ्यायाम् आसीत्, उपसत्काले आतिथ्य-सम्बधस्तस्य नास्ति। ४.२.२९ आतिथ्यायाम् अपवृक्तम् आसीत् पूर्वं तद् आतिथ्यायाम् आसीत्।

तद्भूतानां क्रियार्थेन समाम्नायः, अर्थस्य तन्निमित्तत्वात्। १०.७.२९

तस्माद् अपि आऽमित्रौ सङ्कृत्य नाम्ना चेद् ह्वयेते मित्रम् एव भवतः।

तस्य ज्ञानम् उपदेशः। १.१.५

तस्याधारम् आधार्यं। १.४.४ चतुर् गृहीतं वा एतद् अभूत् तस्याधारम् आधार्यं।

तस्या यावदुक्तम् आशीर् ब्रह्मचर्यम् अतुल्यत्वात्। ६.१.२४ तस्याः पत्न्याः आशीर् ब्रह्मचर्यं स्यात्, विद्यादिषु अतुल्यत्वात्।

तादर्थ्यं तु धर्मजिज्ञासाम् अधिकृत्य अथशब्दं प्रयुक्तवान् आचार्यः, या वेदाध्ययनम् अन्तरेण न सम्भवति। १.१.१

तिलको मे स्पन्दते। ८.४.२८ इति तिलकाभावे तद्देशलक्षणया भवन्ति वक्तारः।

तां ४.४.२ तिस्र उ ह्येव एका गायत्री तास्तिस्रो बृहत्यः।

आप १.१२.५ तिस्रो दोहयित्वा– बहु दुग्धीन्द्राय देवेभ्यो हव्यम् आप्यायतां पुनः, वत्सेभ्यो मनुष्येभ्यः पुनर् दोहाय कल्पताम् इति त्रिर् वाचं विसृज्य अनन्वारभ्य तूष्णीम् उत्तरा दोहयति।

तैसं ५.४.१२ तिस्रोऽनुष्टभश्चतस्रो गायत्रीः कुर्वन्ति।

तैले पीते पानीयं न पातव्यम्। विलेप्य यवागूश्च पीयते। ९.४.३४

तैसं ६.१.३ त्रिवृत् पञ्चदश सप्तदश एकविंशाश्चत्वारः स्तोमाः ज्योतिष्टोमे, त्रिणवस्त्रयस्त्रिंशच्च द्वौ अधिकौ अतिरात्रे।

त्रयी विद्याख्या च तद्विदि। ३.३.५ सूत्रम्–त्रयी यस्य विद्या स त्रयीविद्यः। त्रीन् वेदान् अधीते स त्रयीविद्यः। ऋक्सामयजुःषु त्रयीशब्दः।

त्रयोदश रात्रादिषु सत्रभूतस्तेषु आसनोपायिचोदनात्। ८.२.२७

ऐब्रा ५.३३ त्रय्या विद्यया–ऋचैव होत्रं क्रियते, यजुषा आध्वर्यवं, साम्ना उद्गीथम्, अथ केन ब्रह्मत्वं? त्रय्या विद्यया इति ब्रूयात्।

त्रिपर्वा। ३.३.३१ दशमुष्टि स त्रिपर्वा परिमाणयोः।

तैसं ६.१.१ दक्षिणं पूर्वम् आङ्क्ते, सव्यं हि मनुष्याः पूर्वम् आञ्जते।

मैसं ३.१०.१ दक्षिणस्य पूर्वपदस्य अवदेयम् इति ह स्माहुर् दाक्षिणायनाः तथाऽस्य सर्वस्य पशोर् अवत्तं भवति।

दक्षिणाकाले यत् स्वं विद्यते, तदेव देयं न यत् प्राग् ऊर्ध्वं च (विश्वजिति सर्वस्वं देयम्।) ६.७.७ सूत्रम्–दक्षिणाकाले यत् स्वं तत् प्रतीयेत, तद्दानसंयोगात्।

दक्षिणायुक्ता वहन्ति ऋत्विजः। १०.२.२४ सूत्रम्–दक्षिणायुक्तवचनाच्च। परिक्रयणार्थं वा कर्मसंयोगात्।

ददातिः = आत्मनः स्वत्वस्य व्यावृत्तिः। ४.२.२८

दर्भज्वालया त्रिः प्रदक्षिणीकरणं = पर्यग्निकरणम् । ३.६.१८ न्यामा.

कात्या ९.१५ दर्वी द्व्यङ्गुलः पृथ्वग्रः ।

दर्विहोमाः– नारिष्टहोमेषु, सर्वेष्टिषु, सर्वपशुबन्धेषु प्रवर्तमाना दृष्टाः ।८.४.१८ सूत्रम् – तच्चोदना वा इष्टेः प्रवृत्तित्वात् तद् विधिः स्यात् ।

शत ५.५.४.१४ दर्विहोमान् यो राजसूयेन यजेत ।

दर्विहोमेषु अतिदेशः । ८.४.१-२८ न्यामा.

तैब्रा ३.७.५.११ दश ते तनुवो यज्ञ यज्ञियाः ।

दार्शपूर्णमासिकस्य हविषो विकारौ सुरावाजिने । ८.२.५ औषध (व्रीहि) विकारः सुरा, सांनाय्यविकारो वाजिनम् ।

दार्शपौर्णमासिको विध्यन्तः सोमे– दीक्षणीयायां प्रायणीयायाम् आतिथ्यायां पशौ वाजिने सुराग्रहेषु च । ८.१.१

दिग्देशकालशब्दो हि (वचनो हि) पराक् (पराक् पराञ्चम्) । १०.५.४७ सूत्रम् – पराक्शब्दस्य देशवाचित्वात् ।

दीक्षाणाम् उपसदां च दर्शनं नावकल्पते वाजपेये (दार्शपौर्णमासिकविध्यन्ते) १.४.७ सूत्रम्– तुल्यत्वात् क्रिययोः, तुल्ये हि इमे क्रिये, या च वाजपेय–क्रिया या च दर्शपूर्णमासक्रिया ।

दीक्षासु तु विनिर्देशात् अक्रत्वर्थेन संयोगः । तस्माद् अविरोधः स्यात् विश्वजिति सर्वस्वदानात्, किञ्चिच्छेषयितव्यं नास्ति, दीक्षासु विनिर्देशो भवति । ज्योतिष्टोमे–इदं क्रत्वर्थम्, इदं भक्षार्थम्, इदम् (ऋत्विजाम्) आनमनाय । तदिह आनमनाय यद् दातव्यं तस्य अयं विकारः सर्वता नाम । ६.३.१३

दीक्षा दक्षिणं तु वचनात् प्रधानस्य–सोमस्य । तिस्रो दीक्षाः, द्वादशशतं दक्षिणा ।

दीक्षिता ते ब्रह्मचारिणः । १०.६.३२ सूत्रम्–मधु न दीक्षिता ब्रह्मचारित्वात् ।

दीक्षिताः सत्रैर् यजते, अदीक्षिता अहीनैर् यजन्ति । १०.६.५८ स्वयंकर्तृत्वात् सत्राणाम् अदक्षिणत्वात् च । १०.६.५९ अदक्षिणत्वात् सत्राणां स्वयं कर्तृकत्वम् ।

दूरभूयस्त्वात् । १.२.१२ सूत्रम् – रात्रौ धूमस्य, दिवा च अग्नेर् ज्वालायाः अदर्शनं दूरभूयस्त्वात् ।

दृष्टकार्यम् अदृष्टाद् बलीयः । १०.१.२३

दृष्टो हि तस्यार्थः कर्मावबोधनम् । १०.१.२३

पशुपतिर् अनेन उपचरितः पुत्रोऽनेन लब्धः । ९.१.९

दैक्षस्य च इतरेषु । ८.१.१३ सूत्रम् – दैक्ष इति अग्नीषोमीय उच्यते, दीक्षा-सम्बधात् । इतरेषु पशुषु सवनीयादिषु अग्नीषोमीयस्य विध्यन्तः ।

द्यावोस्तथेति चेत् । १.३.२४ तं. द्याव्यापृथिव्यो इति वक्तव्ये ।

द्रव्यस्य तु कर्मार्थता स्वभावतः पुरुषप्रयत्नस्य च फलार्थता । ६.१.१

द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिः अर्थवादः स्यात् । १.१.१ न्यामा.

द्वादशाहस्य दशाहस्य दश अहानि महाव्रतम् अतिरात्रं च । १०.६.६०

द्वादशाहस्य सत्रत्वम् आसनोपायि चोदनेन यजमानबहुत्वेन सत्रशब्द-संयोगाच्च । ८.२.२४

द्वादशाहस्य व्यूढसमूढत्वं, तत्र व्यूढः समूढविकारः स्यात् । १०.५.७८,८० द्वे एते चतुर्गृहीते । ४.१.४८ सूत्रम् – द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने – अष्टौ उपभृति ।

धर्मजिज्ञासा । १.१.१ धर्माय जिज्ञासा = जिज्ञासा हि पुरुषस्य ज्ञातुम् इच्छा ।

धर्मं प्रति हि विप्रतिपन्नाः बहुविदः । १.१.१

धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते ।
तथापि सर्वसामान्यरूपेणैवावगम्यते ॥ २.१.१ तं.

धारणे विधिरेव स्यात् न हि प्राप्तिः कृतश्चन । समित्प्रच्छादनाशक्तेर् नाचाराद् उपरिस्थिता ॥ ३.४.९ + ६.२ तं. अधस्तात् समिधं धारयेद्, उपरि हि देवेभ्यो धारयति–आप ९.११.९

ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी । रूपवन्तौ अतो यागौ विधीयेते पृथक्तया ॥

ध्वजिनो गच्छन्ति इति एकेनापि ध्वजिना सर्वे ध्वजिनः इति कथयन्ति । ३.८.४४

न ऋषीणां यागादिषु आर्षेयान्तराभावात् (भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति) न देवानां यागादिषु अधिकारः देवान्तराभावात् । ६.१.५

न कण्टकः पादेन अधिष्ठेयः । १०.८.२ कण्टको वा न पादेन अधिष्ठीयते ।

न चतुस्त्रिंशद् इति ब्रूयात्, षड्विंशतिरेव ब्रूयात् । ९.४.१८ तत् प्रतिषिध्य प्रकृतिर् नियुज्यते, सा नियुज्यमाना चतुस्त्रिंशद् वाच्यत्वाद् वारयति ।

न च दृष्टे कारणे सति अदृष्टं कल्पयितुं शक्यते । १.१.१,५

न च बुद्धशास्त्राविद्यमानवचनाचेतनार्थबन्धनात् मन्त्रार्थोपयोगः । १.२.४० तं.

न त्वामूर्तोऽर्थः (अमूर्तः अर्थः न क्रियासाधनं) क्रियासाधनं भवति । ३.१.१२

'न पिता वर्धते न माता' इति अन्ये वर्धन्ते, प्रत्यक्षं कौमारयौवनस्थाविरैर् वर्धन्ते मात्रादयः । ऊहदर्शनं च विवक्षितानाम् अर्थानाम् एव भवति । न मातृपित्रादयः ऊहितव्याः । १.२.५२ सूत्रम् – ऊहः ।

न पिता वर्धते न माता न नाभिः प्राणो हि सः । ३.८.३१ अत्र ऊहो नावकल्पेत् ।

अङ्गानि ज्ञातिनामान्युपमा चेन्द्रियाणि च । एतानि नोहं गच्छन्ति अग्निगौ विषमं हि तत् ॥ १.३.२४ तं.

न ब्रह्मवर्चसकामस्य अयम् अग्निर् होमार्थो भवति । वृक्षाग्रात् ज्वलतः आहृत्य अवदध्याद् ब्रह्मवर्चसकामस्य । होमस्तु यथाप्राप्ते उल्मे एव । कामनियोगाद् अयम् अग्निर् होमार्थो न भवति ।

न वयं निन्दितान् अनिन्दितान् वा असुरान् विद्मः कदाचिद् हि यस्माद् असुरान् अपि एषा वशीकृत्य आनयीत क्रिया । १.२ तं.

न विषं भक्षयितव्यम्। १०.८.२,७ विषं भक्षयितव्यं न कदाचित्। (विधिप्रतिषेधयोः) प्रतिषेधो बलवान्।

पाम १.१.४९,१५ नष्टाश्वदग्धरथवत् सह संप्रयोगो भवति। (तव अश्वो नष्टः, ममापि रथो दग्धः, उभौ संप्रयुज्यावहै।)

न सप्तदशावराः फलसमवाये भवेयुः। ६.३.२४ सप्तदशावरैर् याजमानाः पदार्थाः कर्तव्याः। ते च निहितेन क्रियन्ते। अफलत्वेऽपि च सङ्कल्पं सत्यं कर्तुम् आनयन्ति (प्रतिनिधीन्)।

न सर्पाय अङ्गुलिं दद्यात्। ६.२.२०; १०.८.२ न सर्पाय अङ्गुलिर् देया।

न सर्वस्वं दक्षिणाकाले देयं, यावता तत् कर्म परिसमाप्यते तावत् शेषयितव्यम्। ६.७.९ सूत्रम्– अपि वा शेषकर्म स्यात् क्रतोः प्रत्यक्षशिष्टत्वात्।

नहि कश्चिद् स्वार्थाद् ऋते परार्थे प्रवर्तते। १०.६.५९

न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुम्। १.२.७ तं. २.४.२१

नहि प्रत्यक्षम् अनुपपन्नम् अस्ति। १.३.३

नहि येन विधीयते तस्य वाक्यशेषोऽर्थवादः स्यात्। १.२.३१ यथा 'उरु प्रथा उरु प्रथस्व' इति पुरोडाशं प्रथयति। शत १.२.२.७

नहि अज्ञाते अर्थे कश्चिद् बुद्धिम् आलभते। १.१.५

नहि अविद्वान् विहितोऽस्ति। २.१.५ तं. ३.८.१८ ज्ञाते च वाचनम्।

नागवेलायाम् आगन्तव्यं, शङ्खवेलायाम् आगन्तव्यं, पटहवेलायाम् आगन्तव्यम्, अग्निहोत्रवेलायाम् आगन्तव्यं, यस्मिन् ग्रामे नागशङ्खपटहाग्निहोत्रादयो न स्युः तत्रापि स एव कालः। ११.३.४९

नामधेयेन तु प्राजहिते कौण्डपायिनाम् अयने अग्निहोत्रस्य श्रपणं प्राप्यते न शालामुखीये। 'प्राजहितम्' इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा। ज्योतिष्टोमे हि तस्य शालामुखीयस्य गार्हपत्यत्वम्। १२.१.१३ सूत्रम्– श्रपणं च अग्निहोत्रस्य शालामुखीये न स्यात् प्राजहितस्य विद्यमानत्वात्।

नामूर्तोऽर्थः क्रियायाः साधनं भवति। ३.१.१२

'नायं मम'। ९.३.३६ सूत्रम्-उत्सर्गात् च भक्त्या तस्मिन् पतित्वं स्यात्। उत्सृष्टं च यजमानेन 'नायं मम' इति। देवताम् उद्दिश्य 'नायं मम' इत्यनेन स्वस्वामित्वं त्यज्यते।

नारिष्टहोमपूर्वत्वं दर्विहोमानाम्। ८.४.२० नारिष्टौ = अग्निवायू = जाठराग्निः प्राणवायुश्च। सायणः, १९ शब्द = चोदनासामान्यात्। "जुहोति" नारिष्टहोमाः प्रवृत्तिधर्माणः सर्वेष्टिषु, सर्वपशुबन्धेषु प्रवर्तमाना दृष्टाः। ८.४.१८

नारिष्टहोमाः– पूर्वं उपहोमाः, ततो नारिष्टहोमाः। ५.२.१८

नावयविनम् उपाददीत। ४.१.२८ विद्यमानस्य अवयविनः एकदेश उपादातव्यः उत्तरार्धाद् अवद्यति।

नाश्वं विक्रीणते इति स्मर्यते । १०.३.४७ गाव्यः अश्वा उपकारकतराः यदि एषां दानप्रतिग्रहविक्रया न प्रतिषिध्येरन् । न केसरिणो ददाति – दानं प्रतिषिद्धम्, उभयतोदतः प्रतिगृह्णाति-प्रतिग्रहः प्रतिषिद्धः, नाश्वं विक्रीणीत, विक्रयश्च प्रतिषिद्धः । तस्माद् द्वादशशतं गवां स्यात् । सूत्रम्-भागित्वाद् वा गवां स्यात् ।

नास्ति दृष्टे अनुपपन्नं नाम । १.१.५

निकायिनां च पूर्वस्य उत्तरेषु प्रवृत्तिः स्यात् । ८.१.१९ निकायः सङ्घात औत्तराधर्येण अवस्थितः उच्यते, यथा साहस्राः साद्यस्काः । तेषां पूर्वस्य केचिद् धर्मा आम्नाताः, उत्तरे तु अधर्मकाः, तेषां पूर्वस्य उत्तरे प्रवृत्तिः । निगदा वर्तन्ते यजूंषि । यजूंषि वा तद्रूपत्वात् । निगदो मन्त्रान्तरं स्यात् । निगदेन उच्चैर् अनूच्यते ।

नित्या प्रकृतिः, आगन्तुका विकृतिः । कामे वा निमित्ते उत्पन्ने आगच्छति । वैकृतं तन्त्रं प्रकृतौ प्रसज्यते । १२.२.३३,३४

निमित्तार्था हि कालश्रुतयः । ६.२.२७ उदिते जुहोति, अनुदिते जुहोति, प्रातर् जुहोति, सायं जुहोति, प्रदोषे जुहोति, इत्यादयः कालश्रुतयः । आगते आगते काले प्रयोगः कर्तव्यः ।

निर्गुणं च पुनःश्रवणम् इतरेषाम् अश्रुतानां परिसङ्ख्यापकम् भवति । १०.७.४ सूत्रम्-निर्देशात् परिसङ्ख्या स्यात् ।

नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः । नीलकौशेयसंवीताः प्रनृत्यन्तीव कादम्बाः । १.१.२४,२६ रामाकौशेयसंवीताः प्रनृत्यन्तीव कादम्बाः । (पाठान्तरम्)

नैमित्तिकं तु उत्तरात्वं आनन्तर्यात् प्रतीयेत । ९.२.२३/२ त्रैशोकसामसु पूर्वा अतिजगती, उत्तरे द्वे बृहत्यौ उत्तरार्चिकग्रन्थात् ।

नोच्चैर् गेयम्, बलवद् गेयम् । रथन्तरे रथन्तरधर्माः (बृहद् उच्चैर गेयम्) रथन्तरे प्रस्तूयमाने संमीलयेत्, स्वर्दृशं प्रतिवीक्षेत् । बृहद् उच्चैर् गेयम्, बृहति गीयमाने समुद्रं मनसा ध्यायेत् । ९.२.४७,४८ ताण्ड्य-ब्राह्मणे (७.७.९,१०) यद् रथन्तरं प्रस्तौति, समुद्रम् अन्तर्धाय उद्गायेत्, वाग् वै समुद्रः । बलवद् गेयम् ।

पञ्चभिश्च प्रयाजैः, त्रिभिर् अनुयाजैः पुरोडाशस्य कार्यम् । १२.१.२ पश्वर्थानुष्ठितप्रयाजादिभिरेव पशुपुरोडाशस्यापि उपकारसिद्धेर् न पृथग् अनुष्ठानम् ।

आप १०.४.६ पत्नीसंयाजान्ता दीक्षणीये संतिष्ठते ।

पदानां साकाङ्क्षत्वाद् विधेः स्तुतेश्च एकवाक्यत्वम् । १.२.७ वायव्यं श्वेतम् आलभेत, वायुर् हि क्षेपिष्ठा देवता । सूत्रम्– विधिना तु एकवाक्यत्वात् स्तुत्यर्थेन विधिना स्युः ।

पम्पा कुलाय प्रतिमाश्च वृक्षाः । (एतद् ब्राह्मणानि एव पञ्चहवींषि यद् ब्राह्मणानीतराणि) । ७.१.१७ एवम् अर्थवादस्य अतिदेशो भवति ।

पयोविकारः पशुः । ८.२.१८ सूत्रम् – द्रवत्वं च अविशिष्टं, पशुरपि द्रवति, पयोऽपि ।

परमाणुषु व्यभिचारः। ३.१.१२ तं. येषां तावत् "कार्यद्रव्याणि एव घटादीनि पच्यन्ते यथा पैठराणां" तन्मतेन अभेद एव पैलुकानाम् अपि तु परमाणुषु व्यभिचारो घटादीनि द्रव्यान्तरेण...

पररथैर् वा एते स्वर्गं लोकम् यन्ति ये अनाहिताग्नयः सत्रम् आसते। ६.६.२८ (सारस्वते)

परिक्रियाविभागाद् वा समस्तस्य विकारः स्यात्। १०.६.६७ सूत्रम् – कृत्स्नं हि क्रतुम् अङ्गीकृत्य दक्षिणाः विधीयन्ते।

परिधयो वेदिश्च अङ्गप्रधानार्थत्वात् नारिष्टहोमाङ्गम्। ८.४.२० नारिष्टहोमानां जुहोति चोदनात्वात्।

परिभोजनीयनाम बर्हिस्ततो विधृती पवित्रे च कर्तव्याः। ३.८.३२ विधृतिपवित्रयोः परिभोजनीयबर्हिषां कर्तव्यताधिकरणम्।

परिसङ्ख्यायास्त्रयो दोषाः–स्वार्थप्रहाणं, परार्थकल्पना, प्राप्तबाधश्च।

पर्यनुयोगो नाम भवति – यः स्वपक्षं साधयति, विपक्षस्य च प्रतीपम् आचरति। ३.१.१२

पशुपतिर् अनेन उपचरितः पुत्रोऽनेन लब्धः। ९.१.८

तैब्रा ३.२.८.८ पशोर् वा प्रतिमा पुरोडाशः।

पश्वङ्गं रशना चेत् यद्येकस्मिन् बहून् युञ्जीत। प्रतिपशुः रशना कार्या यूपे चेद् द्वैरशन्यं स्यात्। ४.४.२४

सत्या १.१.१९ पारिप्लवार्था दाशतय्यः।

पार्वणस्थालीपाके अष्टकाचरौ आग्रहायणे इतिकर्तव्यताविधिः, सौर्यश्चरुः (सौर्यचरुविध्यन्तः)। ७.४.२

पावकः शीतः। ४.३.१०

पित्रादिकं न देयम्। (विश्वजिति सर्वस्वदाने)। ६.७.२ सूत्रम् – यस्य वा प्रभुः स्याद् इतरस्य अशक्यत्वात्। स्वशब्द आत्मीयधनवाचकः। पित्रादीनाम् अशक्यं स्वत्वं निवर्तयितुम्।

तैब्रा ३.९.१०.१ पुरस्तात् स्वाहाकारा वै अन्ये देवाः, उपरिष्टात् स्वाहाकारा अन्ये।

पूर्वावसायिनश्च बलीयांसो जघनावसायिभ्यः। १२.२.३३

पूर्वावसायिनो जघन्यावसायिनं नोन्नीयन्ते। १२.३.२४

पृष्ठाकोटेन=प्रत्येकद्रव्यनिरीक्षणे पुनःपुनः पृष्ट्वा कुटिलीक्रियते। २.१.३२ तं.

पृष्ठस्तुतौ हि साम विनियुज्यते, तत् च सामपदानां स्तुतिं निर्वर्तयन्तां संश्लेषादिभिर् विशेषैः स्तुतिपदाक्षराणि उपदर्शयत् स्तुतिम् अभिनिर्वर्तयति। १०.६.३

पेषणं, संयवनं (प्रणीताभिः संयौति), संवपनं (वेदेन) सन्तापनम् अधः श्रपणात्, उपधानं (कपालेषु) प्रथनम्, अङ्गारैर् अभ्यूहनं, दर्भपिञ्जुलैर् अवज्वलनं, (कपालेभ्यो व्युदूह्य) आसादनम्, एते पुरोडाशधर्माश्चरौ न विद्यन्ते।

प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे तस्य वाचकं भवति। २.३.२४

प्राकाशौ अध्वर्यवे ददाति। आभरणविशेषौ सौवर्णदर्पणौ।

प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु । धर्मप्रदेशो येन स्याद् सोऽतिदेश इति स्थितिः ॥ ७.१.१ न्यामा.

प्रकृतिर् नित्या, विकृतिर् आगन्तुका । १२.२.३४ कामे वा निमित्ते वा उत्पन्ने आगच्छति । १२.२.३३ अनित्यत्वाद् विकृतेः ।

प्रगीतं मन्त्रवाक्यम् । ९.२.१ गीतिषु समाख्या साम ।

प्रगीतेषु मन्त्रवाक्येषु 'स्तौति' शब्दः, अप्रगीतेषु 'शंसति' शब्दः । ७.२.१७

प्रजापतिः स्याद् वायुर् आकाशः, आदित्यो वा स आत्मनो वपाम् उदक्खिदत् इति वृष्टिं वायुं रश्मिं वा ताम् अग्नौ प्रागृह्णात् इति वैद्युते आर्बीसे लौकिके वा, ततो अज इति अन्नं, बीजं विरुद् वा, तम् आलभ्य – तम् उपयुञ्ज्य प्रजाः पशून् प्राप्नोति इति गौणाः शब्दाः । १.२.१०

तैसं ५.५.८ प्रजापतेर् हृदयेन अपि पक्षं प्रति उपतिष्ठते ।

मैसं ३.३.५ प्रतिपश्च रशना कार्या । ४.४.२४ – पश्चङ्गं रशना चेत् ...

प्रतिप्रस्थातुश्च वपाश्रपणादपि अभक्षो वा कर्मभेदात् तस्याः (वपायाः) सर्वप्रदानत्वात् । १०.७.२२,२३

प्रत्यक्षम् अनिमित्तं विद्यमानोपलम्भनत्वात् । १.१.४ सूत्रम् – सत्संप्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्यं तत्प्रत्यक्षम् ।

प्रत्यक्षं च अनुमानाद् बलीयः । १२.१.७ तं.

प्रत्यङ्मुखा उदङ्मुखा वा पृष्ठत आदित्यं प्राशुपदार्थान् प्रतितिष्ठन्ति मानवाः । ३.४.१० तं.

प्रथमं हि स्नेहनं करोति, न द्वितीयम् । ४·१.३८ (तत् स्नेहनं करोति, कतमत् तत्-यत् प्रथमम् ।)

प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति । १.१.५ न्यामा.

प्रयतं पुरुषं त्मना । १.३.३०-३५ न्यामा. मन्त्रेषु आङि आदेर् आत्मनः । आत्मन् शब्दस्य आदेः लोपः छन्दसि ।

प्रयाजाः – समिधस्तनूनपातं इडो, बर्हिः स्वाहाकारं च – तत्र देवतोपदेशाभावात् मान्त्रवर्णिकी देवता भवेयुः । ९.२.५८-६० न्यामा.

प्रयोगश्च उत्पत्तिं न त्यजति । ८.३.४ तं.

प्रयोगाच्च स्मृतिर् बलीयसी । प्रयोगाद् हि स्मृतिर् अनुमीयेत । २.३.३

प्ररोचनया तु प्रवर्तते, द्वेषात् निवर्तते इति तयोः रुचिद्वेषयोर् विवक्षा । १.२.१० प्रवहणसोमसूक्तम् (अष्टौ मन्त्राः) ।

ऐब्रा ३.१,२ 'अस्मे ज्योतिः विक्रयिणि तमः' इत्याह, ज्योतिरेव यजमाने दधाति ।

तैसं ६.१.१० तमसा सोमविक्रयिणम् अर्पयति ।

प्रवीणः–बहुषु वीणावादस्य गुणेषु सत्सु निपुणे एव प्रवीणशब्दो वर्तमानो रूढः इत्युच्यते । ६.७.२२

प्रशंसा सोमशब्दः । सोमो वै वाजिनं, सुरा सोम इत्यत्र । ८.२.६

प्रसिद्धश्च स्थाल्यां चरुशब्दः आ हिमवतः आ च कुमारीभ्यः । १०.१.३५ सूत्रम् – चरुर् इविर्विकारः स्यात् इज्यासंयोगात् । सूत्रम् – प्रसिद्धि-

ग्रहणत्वाच्च । ओदनो वा अन्नसंयोगात्–चरुः ओदनः । १०.१.३४-३६ न्यामा.

प्रसीदति देवता–प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः ।

प्रसन्नोऽस्य वैश्रवणः धनम् अनेन लब्धम् । ९.१.७

प्राक्सोमाद् एकपुरोडाशा पौर्णमासी । (ऊर्ध्वं सोमाद् द्विपुरोडाशा) । १०.८ ६२ सूत्रम् – द्विपुरोडाशा स्याद् अन्तरार्थत्वात् । नैकपुरोडाशा । उपांशुयाजम् अन्तरा यजति (पौर्णमास्याम्) ।

प्राजहित इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा । १२.१.१३ सूत्रम् – श्रपणं चाग्निहोत्रस्य शालामुखीयेन स्यात्, प्राजहितस्य विद्यमानत्वात् । कौण्डपायिनाम् अयने अग्निहोत्रस्य हविषां श्रपणं प्राजहिते इति नामधेये अग्नौ प्राप्तम् । १२.१.१४

प्राजापत्यं चरुं चरोः घृते श्रपणं, तस्मात् चरुः आज्यविध्यन्तः । ८.१.३७-३९

प्राणैर् वा एष वृद्ध्यते यः सर्वं ददाति । पशुभिर् वा एष वृद्ध्यते यः सर्वं ददाति ।

कात्या ९.६.१८,१९,२० प्रातःसवने च उच्चैः कर्माणि कार्याणि, मध्यमेन माध्यन्दिने, उत्तमेन तृतीये सवने ।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।

अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥ २.२ ६.१ तं; १.४.३ न्यामा.

प्रोक्षणीभिर् उद्वेजिता स्मः । १.४.११ अत्र 'प्रोक्षणी' इति जातिशब्दः ।

फलवत्सन्निधौ अफलं तदङ्गम् । ४.४.१९

फलं तु तत्प्रधानायाम् । ४.३.३

बल्वजान् शिखण्डकान् कुरु, बल्वजा एव शिखण्डकाकारेण ईप्सिताः । २.१.१२ द्वितीया विभक्तौ लौकिकप्रयोगं दर्शयितुम् । यथा च तण्डुलान् ओदनं पचति । एवं वेदेऽपि 'सक्तून् जुहोति' कर्मगुणभूतम् अत्र दृश्यते ।

बहवः सत्रं यजेरन् । १०.६.४५,४६ सूत्रम् – वचनात् तु बहूनां स्यात् । सत्रम् आसते – उपयन्ति – उपेयुः ।

बहिष्पवमानम् । १.४.३ पवमानार्थं मन्त्रकत्वाद् बहिः सम्बधाच्च ।

बाधो नाम यदेव इदम् इति निश्चितं विज्ञानं कारणान्तरेण मिथ्येति कल्प्यते । १०.१.१

बाहीकवत् । ७.१.८ सूत्रम् – यदि वा अपि अभिधानवत् सामान्यात् सर्वधर्मः स्यात् बाहीकवत् । बहुशो बाहीकानां यवान्नप्रियता, बाहीको अतिथिर् आगतः, यवान्नम् अस्य प्रक्रियताम् (देशनिमित्तेन यवान्नप्रियता) ।

बाहीकोऽतिथिर् आगतः, यवान्नम् अस्मै प्रक्रियताम् इत्युक्ते यो यो बाहीकस्तस्य तस्य यवान्नं क्रियेत । एवं पदार्थधर्मा कार्याः । ७.१.८,९

ब्रह्मचर्यं च अहिंसा च अपरिग्रहं च सत्यं च यत्नेन रक्षेत्, श्रुतौ च शाक्ये च । १.३.५-७ न्यामा.

'ब्रह्मचारिणा मांसं न भक्षयितव्यम्' इत्युक्ते दर्विगतम् अपि लेपं वर्जयितव्यम् । ९.४.३९ सूत्रम्–व्रतधर्माच्च लेपवत् ।

मैसं ३.२.३ ब्रह्म यजुः ।

ब्राह्मणस्य सोमपूर्वत्वम् । ५.४.१० सूत्रम् – उत्कर्षाद् ब्राह्मणस्य सोमः स्यात् आग्नेयो ब्राह्मणः सोमेन इष्ट्वा अग्नीषोमीयो भवति ।

ब्राह्मणा वा राजन्यचमसान् अनुसर्पेयुः । ३.५.५३ सूत्रम् – ब्राह्मणा वा तुल्यशब्दत्वात् ।

भविष्यन् वा एषोऽर्थो (कर्मफलार्थो) न ज्ञानकालेऽस्ति । १.१.४

भसद्वीर्या हि पत्नयः । भसदा वा एताः परगृहाणाम् ऐश्वर्यम् अवरुन्धते । ६.१.१६

भाक्तो हि अन्यासु अष्टमीषु एकाष्टकाशब्दः, एषा हि मुख्या या माघ्यां वृत्ता । ६.५.३४

भावशब्दाः – यजति, ददाति, जुहोत्यादयः, अपूर्वस्य चोदकाः । भावाः कर्मशब्दाः अपूर्वं चोदयन्ति । २.१.१ धातवः

भूतभव्यसमुच्चारणे भूतं द्रव्यं, भव्यं भविष्यत्फलार्थं च । १०.८.१६

भूतं भव्याय उपदिश्यते । ३ ४.४०; ४.१.१८; ४.२.१०; ६.१.१; ९.१.४

भूमिरथिको भूमौ रथम् आलिख्य शिक्षां करोति, सङ्ग्रामे प्राशुभावो भविता इति । यथा च छात्रः शुष्केष्टीः प्रयुङ्क्ते, प्रयोगे प्राशुकर्मा भवितास्मि इति एवम् अर्धपञ्चमान् मासान् अध्ययनं प्रयुज्यते । ९.२.१३,१२

भृत्या आनमति–दक्षिणया परिक्रीय वशं करोति । १०.२.२२-२८ न्यामा.

मन्त्रकार्याणां तर्हि संहत्य कारित्वाद् एकविनाशे समस्तावृत्तिः स्यात् । नैतदस्ति तद् विनाशानुरोधेन एव अनुष्ठानम् ।

मन्त्रभूतानि एतानि आर्षाणि – ('कयानश्चित्र आ भुवत्' आदीनि) नित्यानि सामानि ऋक्षु अधिष्ठितानि । ९.२.१

मन्त्रवर्णाद् हि कल्प्या प्रयोगवचनेन श्रुतिः । यथा 'छागस्य वपाया मेदसोऽनुब्रूहि' इति छागः कल्प्यते । ६.८.३२

मन्त्राणां संनिपातित्वाद् एकार्थानां विकल्पः स्यात् । १२.३.२९ पूषा वां विभजतु, भगो वां विभजतु, अर्यमा वां विभजतु त्रयाणाम् एकार्थानां मन्त्राणां विकल्पः स्यात् ।

मस्तु शूद्रस्य । ६.१.३१ (मण्डं दधिभवं मस्तु । वस्त्रनिःसृतदधिजलम् एके–अमरः) मस्त्वेव शूद्रस्य । व्रते अपि शूद्रस्य नियम्यते–मस्तु एव शूद्रस्य व्रतम् ।

महाभारत ३.११३.११७ महाजनो येन गतः स पन्थाः ।

मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात् । १.१.२ न्यामा.

कात्यास्मृ ९.१० माषकोद्रवगौरादि वर्जयेत् । गौरादि-सरसू-मोहरी ।

'मासम् अग्निहोत्रं जुह्वति' इत्येवमादीनि प्राग् अग्नीषोमीयात् । एषु उपांशुत्वसम्बधो भवति – यथा पूर्वपक्षः । यथा तर्हि सिद्धान्तः न सम्बधः । ९.१.२५

माषेन शूद्रीभवति । १.२.३ तं. इत्येवम् आदीनि कर्मनिन्दावचनानि,

अथवा 'वर्णत्रयकर्महानिप्रतिपादनार्थानि' इति वक्तव्यम् । किं कृत्वा शूद्रीभवति इत्यपि नोक्तम् ।

मासो देवता संवत्सरो देवता । १०.४.२१ न्यामा.

मिश्रस्य अन्येन हविषा समवद्यति । ३.५.३ सूत्रम् – एकस्मिन् समवत्त-शब्दात् । आज्यावदाने क्रियमाणे समवद्यति ।

मुख्यं वाऽपूर्वचोदनात् लोकवत् । १०.५.१,६०
सूत्रम्–मुख्येन वा नियम्येत ।

मृश्यामहे हविषो विशेषणम् । ६.४.२३ आर्तिहविर् इति ।

मौद्गं चरुं निर्वपेत् श्रियै श्रीकामः । ९.३.३

य ऋगक्षरेभ्योऽधिको, न च तैः सवर्णः स स्तोभो नाम । ९.२.३९
(अधिकत्वे सति ऋत्विग्लक्षणवर्णः स्तोभः)

य एव लौकिकाः शब्दास्त एव वैदिकास्त एव तेषाम् अर्थाः । १.३.३०

यच्च नाम ज्ञानं तन्न विपर्येति । १.१.५

यच् च्छृप्यमाणायाः अपरम् उद्वासितायाः । ४.१.३९ (यत्तावत शृप्यमाणायाः)

यजतिचोदनाद् अहीनत्वं स्वामिनां च अस्थितपरिमाणत्वात् । ८.२.२४,२५

अपि वा यजतिश्रुतेः अहीनप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् ।

'यजति ददाति जुहोति' इति आख्यातशब्दाः, सर्वेषु उत्सर्गः समानः । २.२.१; ४.२.२७ जुहोतौ आसेचनम् अधिकम् ।

मैसं ३.९.८ यजमानम् वा एतद् वृणीते, स वृतो वषट्करोति ।

यजूंषि एव निगदाः । २.१.४ सूत्रम् – यजूंषि वा तद्रूपत्वात् । सूत्रम् – वचनाद् धर्मविशेषः । उच्चैर् निगदेन । ३.२.४१

यज्ञविषयब्राह्मणगतस्तोमविधिवाक्यशेषे यथा माषकं तत्प्रामाण्यात् करिष्यते, न तद् निरपेक्षशुद्धब्राह्मणप्रामाण्यात् । १.३.११ तं. (कृताक्षणसूत्रप्रणयन-प्रक्रमे कात्यायनः ।)

यत् तावत् च्छृप्यमाणायास्तद् अग्नेर् अर्चींषि दहन्ति, यद् उद्वासितायास्तद् अग्न्यवयवाः उष्मावयवाश्च नाशयन्ति । ४.१.३९ (वपायाः)

यत्रार्चिंकानि निवर्तन्ते स्तोभा गेह्याश्च (स्वराश्च) अनुयन्ति । ९.२.३६ सूत्रम्– अन्वयम् (अनुगमनं चापि दर्शयति)

यथा गावो गोपायन्ति । १.४.५ न्यामा. (अथैष गवाऽभिचरन्)

यथाऽन्यप्राये लिखितं दृष्ट्वा भवेद् अन्यः इति मतिः । २.१.१२; २.३.१६; ६.८.२२; ९.४.५०

तैसं १.५.७ यथा वै पुरुषोऽश्वो गौर् जीर्यति एवम् अग्निर् आहितो जीर्यति, संवत्सरस्य पुरस्ताद् अग्निं पावमानीभिर् उपतिष्ठते, पुनर् नवम् एव एनम् अजरं करोति ।

यथाशरीरमात्रेऽपि मातृगर्भात्मवर्तिनाम् । सुखादीनां व्यवस्थैवं सर्वत्रैषा भविष्यति ॥ २.१.५ तं.

तैसं १.८.४

यद् अनीकवतो बर्हिस्तत् सान्तपनीयस्याः। ११.२.१७ साकमेधेषु। अनीकवद् अग्नित्वाद् अनेकवतो बर्हिर् ऊहितेन।

यद् अनुदिते होमकर्म तद् उदिते व्युद्धम्। २.४.८ (यदुदिते होमकर्म तत् कालान्तरे व्युद्धम्-विगतम् ऋद्धं-ऋद्धिरहितम्।

यदाऽनशनं तदा मेधार्हः, मेधश्च यज्ञो, यज्ञश्च त्यागः, त्यागं कर्तुं अर्हस्तपसा क्रियते। ३.८.१० यदि पञ्चपञ्चाशतस्त्रिवृतः न संवत्सराः, अथ यदि संवत्सराः तर्हि न त्रिवृतः। ६.७.३७ सूत्रम्-विप्रतिषेधात्तु गुण्यन्यतरः स्याद् इति लावुकायनः।

यदि पशुर् उखायां पचेत्। ८.२.१४ सूत्रम्-तस्य च पात्रदर्शनात्। तस्य च सांनाय्यस्य यत् पात्रम् उखा सा पशौ दृश्यते।

यदि पुरा दिदीक्षाणाः स्युर् यदि वा गृहपतिर् गृहपतेर् वाऽनुसत्रिणः, इति ते एनं बृहत्सामानं (अतिरात्रम्) उपेयुः, उपेतं ह्येषां रथन्तरम्। पूर्वदीक्षायां प्रयुक्तत्वात्।

यदि प्रतिहोमः क्रियेत, सायम् अग्निहोत्राद् आरभ्य अतिपन्नानि तेनैव आनुपूर्व्याणि होतव्यानि। ६.५.४३ सूत्रम्-प्रतिहोमश्चेत् सायम् अग्निहोत्र-प्रभृति निहूयेरन्।

'यदि बिभीयाद् अभि मा उदेष्यति' इति महारात्रे हवींषि निर्वपेत् फलीकृतैस्तण्डुलैर् उपासीत, अर्धम् हविर् आतञ्चानार्थं निदध्याद्, अर्धं न, यदि अभ्युदियाद् अनेन आतञ्चं प्रचरेद्, यदि उ न प्रातर् एतेन ब्राह्मणं भोजयेत्।

यदेव किञ्चन अनूचानोऽभ्यूहति आर्षं तद् भवति। १.३.७ तं. (आर्षेयाणि नित्यानि)

यदेवादः पौर्णमासं हविस्तत् तर्हि निर्वपेत्। ५.४.११,१७,१८,१९ (आग्नेयो वै ब्राह्मणः स सोमेन ...।)

यद् बृहद् गायत्रीषु क्रियते ऋक्त्वेन अन्तर् रुजते, न च तस्यां सम्भवति। ९.२.२२ (स्थाल्यां सक्तु अवधीयते ..)

यद् यस्य उपकरोति तत् तस्य शेषभूतम्। ३.७.२

यद् योन्यां गायति तद् उत्तरयोर् गायति। ९.२.३२,३४ सामवेदस्य पूर्वार्चिकोत्तरार्चिकौ द्वौ भागौ, पूर्वार्चिके एकर्चानि सूक्तानि योनिभूतानि, तैः सह उत्तरार्चिके एकर्चाधिकानि सूक्तानि पठितानि। यः कोऽपि स्वरक्रमः पूर्वार्चिके पठितायां योनेर् भवति तेनैव स्वरक्रमेण योनिभूत-संयुक्तानाम् उत्तरार्चिकपठितानाम् ऋचां भवति।

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्। तावुभौ पुण्यकर्माणौ पङ्क्ति-पावनपावनौ॥ १.३.२७-२९ तं. (मनुना पङ्क्तिपावनमध्ये वेदादेवोपलभ्योक्तम्)

यस्तु मेध्यं द्रव्यं शुचौ देशे प्रयतः प्राङ्मुखो दक्षिणेन हस्तेन समाहितमनाः मन्त्रवत् नियमवद् देवतायै उत्सृजति तस्य फलं भवति। ७.४.१

यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सा अर्थलक्षणा । ४.१.२; ८.१.२४

यस्मिंस्तु साधनोपकारे कार्ये तस्मिन्नेव उपकारेऽन्यत् साधनं विधीयते तत्र विकल्पः । ३.१.१२

यस्य च दुष्टं करणम् । १.१.५

यस्य लिङ्गम् अर्थसंयोगाद् अभिधानवद् इति न्यायेन । १०.६.१६

यस्य हि शब्दो हविषा तादर्थ्येन सम्बध्यते सा देवता । ९.२.६०;१०.४.२३ यस्य यां प्रति तादर्थ्यं सा तस्य देवता ।

यस्यैव पशोर् गुदो न संस्क्रियते, तस्यैव तेन संस्कारेण हानिः स्यात्, तस्मात् समुच्चयः । सूत्रम्–संस्कारं च तत्प्रधानत्वात् ।

'यः कामयेत राष्ट्रम् अस्य प्रजायै स्याद्' इति तस्य औपासने प्रतिहृतम् अन्या जुहुयात् । १२.२.४ (राजसूये प्रवृत्ते कर्मणि एतद् वचनम् । तस्मिंश्च काले विहारोऽस्ति । यदि च त्रेता एव लौकिकानां कार्यं साधयेत् सत्यां तस्यां न औपासनः कार्याभावात् स्यात् ।)

यः कृष्णमृत्तिकाप्रायः (देशः) स आह्वीनैबुकादीनाम् । १.३.२२ कृष्णमृत्तिकाप्रायेऽपि अन्येन कुर्वन्ति, तथाऽन्यलिङ्गेऽपि कुर्वन्ति तस्मात् न देशतो व्यवस्था ।

यः शब्दस्य श्रवणाद् एव विनियोगः प्रतीयते स श्रौतः । ३.३.१४

यः शास्त्रस्थानां स शब्दार्थः । १.३.९

यादृशी यस्य योनिस्ततोऽन्यादृशे यो वै विच्छन्दसी साम ऊहति स ऋचं शृणाति, साम वा विलिशति, सामं संशृणाति, ऋचं वा बिलिशति । ७.२.१८

सत्या १.१.२७ टीका

यान् प्राचीनम् आग्रयणाद् ग्रहान् गृह्णीयात् तान् उपांशु, यान् ऊर्ध्वान् तान् उपब्दिमतः ।

यावज्जीवम् अभ्यसेत् । २.४.२ सूत्रम्–यावज्जीविकोऽभ्यासः ।

यावता कालेन आजानि (अजमांसानि) पच्यन्ते तावता आविकानि (अविमांसानि) विलीयन्ते । ११.४.३७ सूत्रम् – पङ्क्तिवैषम्यात् कुम्भादीनां भेदः स्यात् ।

यावद् यावद् विवादाय मुक्तकं दीयते मनः । अनवस्थादिदोषेण तावद् तावद् विहन्यते ॥ १.३.३० तं.

यावद् वचनं वाचनिकं, तत्र न न्यायः क्रमते । ५.४.१

यावन्ति पदानि एकं प्रयोजनम् अभिनिर्वर्तयन्ति तावन्ति एकं वाक्यम् । २.२.२७

तां १५.७.२

या वै चतुर्विंशति गायत्र्यस्ता अष्टादश अनुष्टुभः ।

याऽसावन्या गौर् आदीयते सा यजमानस्य व्रतधुङ् न भवति । ११.३.४२ (ऋतपेये)

या सुब्रह्मण्या सा तु आवर्तेत । ११.३.२२ सूत्रम् – तत्कालात्तु आवर्तेत प्रयोगतो विशेषसंयोगात् (द्वादशाहे उपसत्काले) ।

या हि वन्ध्या स्मरेद् इदं मे दौहित्रकृतम् इति न मे दुहिताऽस्तीति मत्वा न जातुचिद् असौ प्रतीयात् । १.३.१

ये वेदम् अधीयते ते एव विदुः इदं कर्म कृत्वा इदं फलम् अमुत्र प्राप्नोति । ६.१.५ सूत्रम् – कर्तुर् वा श्रुतिसंयोगात् विधिः कार्त्स्न्येन गम्यते ।

तैत्रा १६.९.६ ये वै यज्वानस्ते पितरो बर्हिषदः ये वा अयज्वानो गृहमेधिनस्ते पितरः अग्निष्वात्ताः ।

येषु सप्तदश सामिधेन्यः (यथा वैश्यस्तोमे सप्तदशानुब्रूयाद् वैश्यस्य) योनिशस्याः । ७.२.१७ सूत्रम् – योनिश्चासौ शस्याश्च ताः ऋचः तुल्यवद् इतराभिः (उत्तरार्चिके पठिताभिः) विधीयन्ते ।

यो वै (सत्रे) बहूनां यजमानानां गृहपतिः, स सत्रस्य प्रत्येता, स हि भूयिष्ठाम् ऋद्धिम् आप्नोति । १०.६.५०; १२.४.३०

यो ह्यमेध्यं द्रव्यं उच्छिष्टः शयानो वा प्रौढपादो वा, वामेन हस्तेन पादेन वा यथा कथंचिद् देवताया उत्सृजति तस्य फलं न भवति इति शिष्टाः स्मरन्ति । ७.४.१

यो ह्यर्थः सामान्यस्य विशेषाणां च आश्रयः सा व्यक्तिः । १.३.३३

यौ द्वौ कौरवौ स एको बाहिकः । ८.३.२२ ये हि द्वे गायत्र्यौ सा एका जगती इति परिमाणदर्शनार्थम् ।

रजनी मे कण्डूयति । ८.४.२८ (रागाभावे वक्ति) ।

रशना हि या यावतीं द्रढिम्नो मात्रां यूपस्य संजनयति द्रढिम्ना च प्रयोजनं यूपस्य । ४.४.२३ सूत्रम् – यूपाङ्गं वा ।

वाराह ३.३.४.५० राजसूयेन इष्ट्वा सौत्रामण्या यजेत ।

लभ्यमाने फले दृष्टे न अदृष्टपरिकल्पना । १.१.१ तं. १.१.५

लिङ्गप्रकरणप्राप्तमन्त्रानुवादेन इष्टकोपधानम् । १.४.२८ न्यामा.

लिङ्गादिरहिते वाक्ये तदाविधिरुपेयते । न कथञ्चिद् यदा प्राप्तिलेशो न गम्यते ॥ १.४.९ तं.

लुप्यते वा एतत् षष्ठं कपालं यत् पञ्चकपालं निर्वपन्ति । ८.५.१,२

सूत्रम् – आनुपूर्व्यवताम् एकदेशग्रहणेषु आगमवद् अन्त्यलोपः स्यात् ।

लोकवद् विभागः स्यात् (श्रुतितो वा) । १०.६.८ प्रायणीयोदयनीययोर् ऐकादशिन्यपशूनां विभागः स्यात् ।

लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधकः । १.१.२ न्यामा.

लोकेऽर्थलक्षणः संव्यवहारो वेदे शब्दलक्षणः । ३.१.१६; ६.८.२७

लोके येषु अर्थेषु प्रसिद्धानि पदानि सति सम्भवे तदर्थानि एव सूत्रेषु इति अवगन्तव्यम् ।

लोहितं निरस्यति, शकृत् संप्रविध्यति । ४.१.२७ पशौ अनालम्भात् लोहितशकृतोर् अकर्मत्वम् ।

लौकिकाग्नौ उपनयनहोमाः स्थपतीष्टिस्तथैव च । १.१.१ न्यामा.

वनस्पतयः सत्रम् आसत । १.१.३२; ६.१.४

वयं वाग्यमेन तायमानं यज्ञं विद्मः । ९.१.२४

वरणम् ऋविजाम् आनमनार्थं (परिक्रयार्थं सत्रे न स्यात् स्वकर्मत्वात्)। १०.२.३४ सूत्रम्

वरणं सत्रे ऋतुयाज्यावरणहिरण्यदानयोर् अनुष्ठानम् अदृष्टार्थाय स्यात्। १०.२.६२

वर्धमानकं गायति। ७.२.१४,१६ सूत्रम् – तस्मिन् संज्ञाविशेषा स्युः विकार-पृथक्त्वात्। वर्धमानकगीतिः, आसारितकगीतिः।

वलीपलितस्य नाशकानि रसायनानि। ६.७.२३

वषट्कारः प्रदानार्थः, याज्या देवतोपलक्षणार्था। १२.३.३५ सूत्रम् –वषट्कारे नानार्थत्वात् समुच्चयः।

वसन्ते प्रातर् आग्नेयीं कृष्णग्रीवाम् आलभते, ग्रीष्मे माध्यन्दिने सैंही-संहिताम् ऐन्द्रीं शरदि अपराह्णे, श्वेतां बार्हस्पत्याम्।

वाजपेये क्रतुपशवः प्राजापत्यपशवश्च तत्र अग्निगुप्तस्य आवृत्तिः स्यात्। ११.४.५४

वाजिनो यजति – दार्शपौर्णमासिको विध्यन्तः। ८.२.१-९ सूत्रम् – वाजिन-यागसुराग्रहयोर् ऐष्टिकधर्मत्वम्।

वासिष्ठं गृह्यसूत्रं बह्वृचैर् परिगृहीतम्। १.३.१५ तं.

विकल्पश्च अन्याय्यः। १०.८.४ अन्याय्यत्वाद् विकल्पस्य।

विग्रहो हविषां भागः ऐश्वर्यं च प्रसन्नता। फलप्रदानमित्येतत् पञ्चकं विग्रहा-दिकम्। ९.१.६

देवता भुङ्क्ते। अर्थानाम् इष्टे देवता। प्रसीदति देवता। देवता यष्टुः फलं ददाति।

विद्याम् अधीयीत। ६.१.३१ सूत्रम्– ब्राह्मणस्य तु सोमविद्याप्रजम् ऋणवाक्य-संयोगात्।

विद्यायां धर्मशास्त्रम्। २.४.१४

विधिरेव भवेद् एवम् अपूर्वोऽर्थो विधास्यते। सर्वानुवादो व्यर्थो हि स्तुतेश्च विधिकल्पना॥ ३.४.९ तं.

विधौ हि न परः शब्दार्थः। १.२.२४

विध्यनुवादयोर् विधिर् ज्यायान्। १०.६.३

विप्रतिपत्तौ हविषा नियम्येत (विध्यन्तः)। ८.१.३२,३३ तेन च कर्म-संयोगात्। तेन–हविषा

विशदसिद्धे ओदने चरुशब्दम् उपचरन्ति। ३.३.३७

विशये प्रायदर्शनात्। २.३.१६ अत्र भगवान् आचार्य उपवर्ष इदम् उदाहृत्य

विश्वजिति द्वादशशतात् न्यूनस्य नाधिकारः। ६.७.१९

विश्वजिति सर्वस्वदाने न पित्रादयो देयाः अप्रभुत्वात्। ६.७.२

विषं भक्षयितव्यं न कदाचित्। १०.८.७; १०.८.२ न विषं भक्षयितव्यत्।

विहार इति गार्हपत्यादिर् अग्निरुच्यते। स लौकिकानि पार्वणस्थाली-पाकीदीनि साधयति। १२.२.१ सूत्रम् – विहारो लौकिकानाम् अर्थं साधयेत्।

विहारारामममण्डलकरणवैराग्यध्यानाभ्यासाहिंसासत्यवचनदमदानदयादि तद् बुद्धादिभाषितं प्रमाणेन अविरुद्धम् इति चेत् । न । शास्त्रपरिमाणत्वात् । १.३.७ तं.

वैद्युतम् आग्निं होमार्थं कुर्यात् । १२·४·२० सूत्रम् – विकारो वा तदुक्तहेतुः । यावद् उक्तं स्यात् 'वैद्युतम् आग्निं होमार्थं कुर्यात्' इति तावद् एव इदम् । वैश्वकर्मण एककपालो भवति ।

वैसर्जनहोमीयं वासो अध्वर्युर् गृह्णाति । १·३·४ न्यामा. अध्वर्युर् यजमानं तत्पत्नीं तदमात्यान् तन्नेदिष्ठसम्बधिनश्च अहतवाससा प्रच्छाद्य प्रचरण्यां च चतुर्गृहीतं गृहीत्वा प्रच्छादनार्थस्य वाससो अन्तम् उपनियम्य वाससो दशायां हिरण्यं निबध्य आज्ये अवधाय स्रुग्दण्डं वाससो अन्ते उपनियम्य शालामुखीये जुहोति, एतद् वासोऽध्वर्युर् गृह्णाति ।

व्यापन्नम्– दूषितं – भोज्यं केशकीटावपन्नं, अन्येन वा उपघातेन उपहतम् । ६·५·४८

व्यापन्नम् अप्सु प्रहरति इति श्रूयते । ६·५·४८ सूत्रम् – व्यापन्नस्य अप्सु गतौ, यद् अभोज्यम् आर्याणां तत्प्रतीयेत ।

व्यापृता जुहूर् भवति । ४·१·३३ न वा प्राजापत्यानां पशूनां वपाम् अभिघार्याः प्रयाजशेषाभावात् अपात्रत्वात् । –अपात्रत्वं तु एकदेशत्वात् – प्रयाजार्थस्य हि गृहीतस्य आज्यस्य एकदेशशेषः ।

व्यृद्धं उभयथा सम्भवति – यद् अनुदिते होमकर्म तद् उदिते व्यृद्धं, यद् उदिते तत् कालान्तरे व्यृद्धम् । २·४·८

शकृत् संप्रविध्यति लोहितम् अपास्यति । ४·१·२७ लोहितशकृतोर् अकर्मत्वम् लोपः ।

शङ्खलिखितोक्तं गृह्यसूत्रं वाजसनेयिभिर् एव परिगृहीतम् । १·३·१५ तं. गृह्यग्रन्थानां च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठव्यवस्था उपलभ्यते । शतकृष्णलचरुः उपांशुयाजविध्यन्तो भवेत् हिरण्यम् आज्यधर्मस्तेजस्वित्वात् ।

शतम् अतिरथं शोभनाम् अशोभनां च कन्यां प्रति–स्मार्तं च श्रुतिविरुद्धं विक्रयं नानुमन्यते । ६·१·१५ सूत्रम् – क्रयस्य धर्ममात्रत्वम् । क्रयो हि उच्चनीचपण्यवणो भवति । नियतं तु इदं दानम् ।

शतं भक्षयन्ति । एकस्यां राजन्यजातौ दशसङ्ख्या विधीयते । तेन दशराजन्याः अनुप्रसर्पयेयुः । ३·५·५३ सूत्रम् – ब्राह्मणा वा तुल्यशब्दत्वात् । तस्माद् ब्राह्मणानाम् एव चमसानुसर्पणम् ।

शब्दभेदाद् अर्थभेदो न्याय्यः । ६·८·३६

शब्दवती देवता । यस्य हि शब्दो हविषा तादर्थ्येन सम्बध्यते सा देवता । ८·३·२;१०·४·२३

शष्पतोकमसिंहलोमसु पौरोडाशिको विध्यन्तः । ८·२·८,९ सूत्रम् – पशुरोडाशिकस्य च लिङ्गदर्शनम् ।

शष्पैरेव दीक्षणीयाम् आप्नोति, तोक्मभिः प्रायणीयां, सिंहलोमभिर् आतिथ्याम् । सोमविकारत्वे प्रत्यक्षम् एव दीक्षणीयादीनि प्राप्नुयुः । प्राप्तानां शष्पादिभिस्तदाप्तिवचनं न उपपद्यते । ८·२·८ व्यपदेशश्च तद्वत् ।

शामित्रे अग्नौ किम् एतस्य पशुपुरोडाशस्य श्रपणं कर्तव्यम् उत शालामुखीये । १२·१·१२ सूत्रम् – शामित्रे च पशुपुरोडाशो न स्यात् ।

शास्त्राणि चेत् प्रमाणं स्युः गतास्ते परमां गतिम् ।
ईजाना बहुभिर् यज्ञैर् ब्राह्मणा वेदपारगाः ॥ १०·८·४२

शिनीनां दार्विहोमिको ब्राह्मणः । अम्बष्ठानां दार्विहोमिको ब्राह्मणः । ८·४·२ सूत्रम् – स (दर्विहोमः) लौकिकानां स्यात्, कर्तुस्तदाख्यत्वात् ।

शिरो वा एतद् यज्ञस्य यद् दीक्षणीया । ४·४·४१

शीतकर्मा हि इन्द्रः । ९·२·३४,३७ ऐन्द्र्याम् अवभृथसाम गायति ।

शुचिदेवत्ये आग्नेयस्य विध्यन्तः । ८·३·२ अग्नये पवमानाय पुरोडाशम् अष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये ।

शेषं स्विष्टकृते समवद्यति । २·३·२६ न्यामा. शेषस्य गुणभूतत्वात् ऐड-प्राशित्रसौविष्टकृतादीनि शेषकार्याणि ।

शेषकार्याणि – ऐडप्राशित्रसौविष्टकृतानि । ३·४·४२ सूत्रम् – शेषाद् इडाम् अवद्यति, शेषात् स्विष्टकृतं यजति ।

शृते दधनि च प्रणीताधर्माः कर्तव्याः । ९.२.४४,४५

श्रपणं च अग्निहोत्रस्य शालामुखीये न स्यात् प्राजहितस्य विद्यमानत्वात् । १२.१.१३

श्रुतिलक्षणाविषये च श्रुतिर् न्यायसी । १.४.२

श्रुतिश्च स्मृतितो बलीयसी । १२.३.३९

श्रुत्या च ये यस्य प्रकरणे श्रूयन्ते ते तस्यैव धर्माः भवितुम् अर्हन्ति । ७.१.१ तस्माद् यथाप्रकरणं व्यवस्था धर्माणाम् ।

षडहं तृतीयं जागतम् अहर् अन्तरीयमाणं दर्शयन् दशरात्रस्य प्रवृत्तिं दर्शयति । यत् प्रथमं द्विरात्रस्य तद् द्वितीयम् द्वादशाहस्य गायत्रम् अहः । यद् द्वितीयं द्विरात्रस्य तत् तृतीयं त्रैष्टुभं जगती अन्तर् गच्छति । षडहं तृतीयं जागतम् अहर् अन्तरीयमाणं दर्शयन् दशरात्रस्य ।

षड्भिर् अनुष्टुब्भिश्च चतस्रो जगत्यः । ९.२.२८/३ चतुर्विंशतिर्जगत्य-स्तृतीयसवनम् एका ककुप् । तत्र श्यावाश्वान्धीगवयोः द्वयोः साम्नोः प्रगाथेन षड् अनुष्टुभः ताश्चतस्रो जगत्यः ।

षड्विधः कर्मभेदः – शब्दान्तरम् अभ्यासः सङ्ख्या गुणः प्रक्रिया नामधेयं च । २.१.१

षष्ठीसमासात् कर्मधारयो बलीयान् । ३.३.२४-३१ न्यामा. निषादस्थपतिः ।

षोडशीसंस्थे प्रातर् अग्निहोत्रप्रभृतीनि अतिपन्नानीति प्रातर् अग्निहोत्रात् समारभ्याणि । ६.५.४४ सूत्रम् – प्रापस्तु षोडशिनि ।

स आहवनीयः स्याद् आहुतिसंयोगात् । १२.४.२६ सूत्रम् – यश्चासौ वैषहरिको अग्निः स आहवनीयः स्यात् । एत्य हूयते अस्मिन् स आहवनीय इति निर्वचनम् ।

स एव तित्तिरिः । १६.२.५६ पञ्चशारदीये उदाहरणम् ।

सकृद् उपस्तृणाति, सकृद् अवद्यति, द्विर् अभिधारयति, चतुर्वत्तस्य आप्त्यै । १०.८.३१ सूत्रम् – ताभ्यां वा सह स्विष्टकृतः सकृत्त्वे द्विर् अभिधारणेन तदासिक्तवचनात् – चतुरवत्तस्य आसिक्तवचनात् ।

सकृद् एव दक्षिणा दीयेत । १०.६.६७ सूत्रम् – परिक्रयाविभागाद् वा समस्तस्य विकारः स्यात् । कृत्स्नं हि क्रतुम् अङ्गीकृत्य दक्षिणा विधीयन्ते । दक्षिणा – परिक्रयस्य अविभागात् समस्ता सकृद् देया ।

सकृद् हिङ्कृत्य बहिष्पवमानेन स्तुवीरन् ।

सकृद् हुतान् चमसान् अभिद्रोणकलशाद् गृह्णाति । सशेषश्चमसो लक्षणम् अन्यस्य उन्नीयमानस्य न च चमसस्थो होतुम् उन्नेतव्यः । प्रेषितो वा । येषु यक्ष्यमाणा देवता प्रति आश्रावित इति । ३.२.३२ (अभ्युन्नीतसोमे)

सङ्क्रमयज्ञेन यजेत अन्नाद्यकामः । २.३,५,११ आवृत्तियज्ञ इति आवृत्ति-सम्बन्धोऽनुष्ठातव्यः । न यागान्तरम् ।

सत्रम् – अहीनश्च द्वादशाहस्तस्य उभयथा प्रवृत्तिः ऐककर्म्यत्वात् । ४.२.२४ अपि वा यजतिश्रुतेर् अहीनभूतप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् । ४.२.२५

सत्रम् ब्राह्मणानाम् एव स्यात् । ६.६.१८ सूत्रम् – ब्राह्मणानाम् एव इतरयोर् राजन्यवैश्ययोर् आर्त्विज्याभावात्, राजन्यवैश्ययोर् आर्त्विज्यं प्रतिषिद्धम् स्वयमेव आर्त्विज्यत्वेन विना सत्रं विगुणम् ।

सत्रस्य प्रत्येता । १.१.१ न्यामा. यो वै बहूनां यजमानानां गृहपतिः ।

सत्रे ब्रह्मचरिणोऽपि मधु भक्षयेयुः । १०.६.३३,३२ मधु न प्राश्नीयुः, दीक्षिताः ब्रह्मचारित्वात्, प्राश्येत वा यज्ञार्थत्वात् ।

सप्तमे अहनि ऐन्द्रवायवाग्रता, शुक्राग्रो विष्णुवान्, आग्रयणाग्रः प्रथमः स्वरसामा, ततो विश्वजित् इति त्र्यनीका समासा । १०.५.८५

सप्तदशोपसत्को वाजपेयः । १.४.७ दीक्षाणाम् उपसदां च दर्शनं नावकल्पेत–सप्तदशदीक्षो वाजपेयः, सप्तदशोपसत्कः वाजपेयः । तुल्यत्वात् क्रिययोः वाजपेयस्य दर्शपूर्णमासयोश्च क्रिया तुल्या ।

समर्थतराणि समानविभक्तीनि दुर्बलो विभक्तिः । १०.३.४२

समस्ता दक्षिणाः विक्रियेरन् । १०.६.६७ परिक्रयस्य अविभागात् क्रतुं कर्तुम् अङ्गीकृतत्वात्, समस्ता दक्षिणा सकृद् दीयेत ।

समाने अहनि आरप्स्यमानो – द्वितीयादिषु अपि प्रयोगेषु समाने (तस्मिन्नेव) एव अहनि दर्शपूर्णमासौ आरप्स्यमानो असौ कृतारम्भणीयाको जातः । ९.१.३५ सूत्रम् – सकृद् वा आरम्भसंयोगात् एकः पुनरारम्भो यावज्जीव-प्रयोगात् ।

समासस्य हि उपसर्जनं विशेषणैर् न सम्बध्यते । ३.४.१३ तं.

समिध्यमानवतीं समिद्धवतीं च अन्तरेण धाय्याः स्युः द्यावापृथिव्योरन्तराले समर्हणात् । ५.३.४

सम्बधिपदव्यवाये हि सम्बधाद् एव पूर्वसंस्कारो न अपैति, यत्रापि अपरेण साकाङ्क्षेण व्यवायः, तत्रापि अस्ति सम्बधः ।

सम्भरणम् एव कुर्वती स्थाली पङ्क्तिं करोति । ६.१.१७

सम्यग् इध्यते अग्निर् याभिर् ऋग्भिः ताः सामिधेन्यः । ३.१.२३ न्यामा.

संस्कारस्य तदर्थत्वात् । विधायां पुरुषश्रुतिः । ६.१.३५ विद्यार्जनार्थम् उपाध्यायस्य समीपम् उपनीयते ।

स यदि स्विष्टकृतो होमार्थं विपद्येत, न पुनर्ग्रहणं प्रयोजयेत् – शेषभाजां स्यात् लोपः ।

सर्वपृष्ठे सर्वेषां साम्नां प्रदेशः । ऊर्ध्वं माध्यन्दिनपवमानात् प्राग् मैत्रावरुणसाम्नः, इदम् अन्तरालं सर्वपृष्ठदेशः ।

सर्वमभ्यर्हितं द्रव्यं प्रच्छादनमपेक्षते । यत्र क्वचन न प्राप्ते समित् तत्र नियम्यते ॥ ३.४.९. तं.

द्राह्यायण २.२.५६ सर्वमहः प्रातराहुतेः स्थानं, रात्रिः सायम् आहुतेः ।

सर्वं बलवतः पथ्यम् । १.३.७ तं.

सर्वं भक्षयन्तो, अश्वमेधे न समापयेयुः । भक्षाणां बहूत्वात्, सर्वं न भक्षयेयुः ।

तां ७.८.५ सर्वाणि पृष्ठानि इन्द्रस्य निष्कैवल्यानि ।

सर्वार्थं वा आधानस्य स्वकालत्वात् । ३.६.१५

सर्वे छन्दोगाः सह सुब्रह्मण्या भक्षयेयुः । ३.५.२६ सूत्रम् – सर्वे तु वेदसंयोगात् कारणात् एकदेशं स्यात् ।

सवनीयो निरूढः पशुः सौम्यादयश्च एतेषु पशुषु अग्नीषोमीयविध्यन्तः । ८.१.१३

सवित्रश्विपूषशब्दानां विकृतिषु नास्ति व्यूहः । ९.१.३६,३७ न्यामा.

सव्याः (रूक्षा) एतर्हि वपा यर्हि अनभिघृताः, ब्रह्म वै ब्रह्मसाम यद् ब्रह्मसाम्नि आलभते, तेन असव्याः, तेन अभिघृताः । ४.१.३६; ११.२.५३ स (गृहपतिः) सत्रस्य प्रत्येता । १२.४.४१ यो वै सत्रे बहूनां यजमानानां गृहपतिः ...

स स्वर्गः स्यात् सर्वान् प्रति अविशिष्टत्वात् । ४.३.१५ सूत्रम्–अनादिष्टफले कर्मणि स्वर्गफलम् इति प्रत्ययो लोके ।

सहस्रम् ऋतपेये सोमचमसः (त्रैधातव्यायाम्) । १०.२.२२

सहस्रं प्राक् चतूरात्रेभ्यः । ६.७.१७ तं.

सहान्यपदार्थो बहुव्रीहिसमासः पूषा प्रपिष्टभागोऽदन्तको हि ।

साधारणं भवेत् तन्त्रं परार्थं त्वप्रयोजकः ।
एवमेव प्रसङ्गः स्यात् विद्यमाने स्वके विधौ ॥ ११.१.१

सांनाय्ययाजिन एव उपवेषः । तत्र हि सांनाय्यार्था शाखा ताम् अनु निष्पद्यते उपवेषः ।

सामान्यवचनेन विशेषापेक्षिणोपक्रमो वाक्यस्य विशेषे निगमनम् । १.४.२९

सामान्ये हि दृष्टोऽर्थो भवति न विशेषे । २.१.४६

साम्ना अपि हि दृष्टम् अदृष्टं वा क्रियते, तस्मात् साम अपि धर्मप्रयोजने समर्थम् । ९.२.५०

सांविज्ञायिकः स्विष्टकृत् । न व्युत्पाद्यते, अग्निरेव स्विकृत् शब्देन उच्यते । १०.४.३४

'सा हि तस्य ज्ञातुम् इच्छा' इति जिज्ञासा । १.१.२
अथातो धर्मजिज्ञासा ।

सिद्धसाध्यस्वभावाभ्यां धात्वर्थौ द्विविधस्तयोः । अन्योत्पादानुकूलात्मा भावना साध्यरूपिणी ॥ २.१.१ न्यामा.

सीसेन क्लीबात् क्रय्या (सुरा) । ८.२.४ (सौत्रामण्याम्)

सोमपो न द्वितीयां जायाम् अभ्यघूयते । ६.८.१८ सूत्रम् – सोमपानात्तु प्रापणं द्वितीयस्य तस्माद् उपयच्छेत ।

सोमपूर्वत्वम् एव ब्राह्मणस्य । ५.४.१०.१२ सूत्रम् – उत्कर्षात् ब्राह्मणस्य सोमः ।

सोमविक्रयी तु अन्यः ऋत्विग्भ्यः । ३.७.३१ सूत्रम् – विक्रयी तु अन्यः कर्मणो अविदितत्वात् ।

तैब्रा ३.२.३.११ सोमः खलु वै सान्नाय्यम्, य एवं विद्वान् सान्नाय्यम् पिबति अपुनर्भक्ष्योऽस्य सोमपीथो भवति ।

सोमो वै वाजिनम् । ८.२.१,६ सूत्रम् – प्रशंसा सोमशब्दः ।

स्तूयते स विधीयते । १.४.२९ न्यामा. विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ।

स्तौति स्तुवते प्रगीतमन्त्रवाक्येषु । शंसति अप्रगीतेषु । ७.२.१७

स्थपतिर् निषादः स्यात् । ६.१.५१ निषाद एव स्थपतिः इति समानाधिकरण एव समासः ।

स्थपतेर् इष्टिर् लौकिकाग्नौ स्यात् । ६.८.१२ सूत्रम्– स्थपतीष्टिवत् लौकिके ।

'स्थाल्यां सक्तु अवधीयते' इत्याहुः यद् बृहद् गायत्रीषु क्रियते ऋक्तेन अन्तर् रुजतीति । न च अस्यां सम्भवति इति विच्छन्दस्कासु दोषं ब्रुवन् समानच्छन्दस्कासु गानं दर्शयति । समानच्छन्दस्कासु एव तिसृषु ऋक्षु गानाधिकरणम् ।

स्थाल्या यागः कर्तव्यः । १०.१.३७ चरुणा । प्रसिद्धश्च स्थाल्यां चरुशब्दः आ हिमवत आ च कुमारीभ्यः ।

स्रुग्दण्डे समिधम् उपगृह्य अनुद्रवति । ३.४.९+६ तं.

स्रुवेणाथ स्वधितिना हस्तेनावद्यत्यमी ।
आज्ये मांसे पुरोडाशे सङ्कीर्णा वाऽवस्थिताः ॥

स्वस्थानविवृद्धिर् वा अङ्गाम् अप्रत्यक्षसङ्ख्यत्वात् । १०.५.८४ तस्माद् आग्रयणाग्रान् कृत्वा ऐन्द्रवायवाग्राः कर्तव्याः ।

स्वरसामैककपालामिक्षम् । ७.१.२३; ७.३.२६ सूत्रम् – स्वरसामैककपालामिक्षं च लिङ्गदर्शनात् ।

स्वरुर् यूपाङ्गम् इति चेत् एकस्यैव समञ्जनम् ।
बहूनां एकयूपत्वे सर्वेषां समञ्जनम् ॥

स्वामिकर्म – परिक्रयः (दक्षिणा) कर्मणस्तदर्थत्वात् । ३.८.१

स्विष्टकृद् आवापिकोऽनुयाजे स्यात्, प्रयोजनवद् अङ्गानाम् अर्थसंयोगात्, न बाह्यः । १०.४.३८ सूत्रम् – आवापिक – आवापस्थानम् – आज्यभागस्विष्टकृतौ अन्तरा आवापस्थानम् ।

हरति – प्रहरति = यजति । ३.२.१३ सूक्तवाकेन प्रस्तरं प्रहरति ।

हविर्धाने मानसं ग्रहं गृह्णाति पृथिव्या पात्रेण समुद्रं रसाम् अनुपयाम–गृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि ।

पा ७.१.३९ काशिका हविर्धाने यत् सुन्वन्ति तत् सामिधेनीर् अन्वाह ।

हविषा वा नियम्येत तद् विकारत्वात् । ८.२.५ दार्शपौर्णमासिकहविषो विकारः सुरा, वाजिनम् ।

हविःसामान्यं च देवतासामान्याद् बलीयः। ८.१.३२; ८.२.१३ विप्रतिपत्तौ हविषा नियम्येत, कर्मणस्तदुपाख्यत्वात् ।

हिरण्ये औषधस्य विध्यन्तः । ८.१.३७ सूत्रम् –
हृदयम् उपांशुयाजः । २.२.१२ तं. शिरो वा एतद् यज्ञस्य यद् आग्नेयः, हृदयम् उपांशुयाजः ।

हेतुर् निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारणकल्पना ॥ उपमानं दशैते तु विधयो ब्राह्मणस्य तु । एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम् ॥ २.१.३३ सूत्रम् – शेषे ब्राह्मणशब्दः । तत्र शेषशब्दप्रयोगात् लक्षणानभिधानाच्च सूत्रव्याख्यानम् एव इदम् ।

होता यक्षत् समिधा अग्निम् इडस्पदे । अश्विनेन्द्रसरस्वतीम् । सौत्रामण्याम् ।

होममाश्रितो गुणः फलं साधयति । २.१.२६

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१	२६	°गृह्णान्	°गृह्णान्
२	३८	तब्रा	तैब्रा
४	१३	अग्निरदं	अग्निरिदं
४	१८	तब्रा	तैब्रा
८	३७	तसं	तैसं
९	८	तआ	तैआ
२०	२१	४.३.२	४.३.१
२१	१	अमास्यायां	अमावास्यायां
२१	२४	अंशुरशुस्ते	अंशुरंशुस्ते
२२	१	एयः	एषः
४०	१२	इन्द्रमित्रावरुणपीतस्य	इन्द्रमरुत्पीतस्य
५१	५	उषपुटैर्	ऊषपुटैर्
६१	१८	स्तोमो	स्तोभो
६४	२४	८.३	६.८
७१	२४	२.६.१०	२.५.१०
७२	३७	दिजोत्तमैः	द्विजोत्तमैः
७३	३४	१.४.११	८.१.६
७५	१८	चतुर्मिर्	चतुर्भिर्
७७	३७	जगतीं	जगतीं
७९	२	वे	वै
८०	२९,३०	तण्डुलेर्	तण्डुलैर्
८०	१७	न	तेन
८१	५	प्रथोजको	प्रयोजको
८३	२९	काठकसं ८.१	द्र. तैसं २.२.५
८९	३३	महाभरते	महाभारते
९३	१६	हस्तो	हस्तौ
९४	९	मैत्रवरुणाय	मैत्रावरुणाय
९५	१०	दर्शपूर्णसयोर्	दर्शपूर्णमासयोर्
९६	१०	महाव्रतं	महाव्रतं
१०७	३७	२.२.५	२.५.५
१४२	३३	°ग्दण्डम्	स्रुग्दण्डम्
१४३	५	समिता	संमिता
१४३	१२	मन्त्रेर्	मन्त्रैर्
१५४	१९	पयासा	पयसा

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५५	४	त्रधा	त्रेधा
१७१	३८	विधेयश्च	विधेयश्च
१७९	२४	तण्डूलीभवनम्	तण्डुलीभवनम्
२०८	१३	आध्युद्नीं	अध्यूद्नीं
२०९	२१	ह्वोता	होता
२०९	२८	उदगयन	उदगयन...
२१०	२६	गोणशब्दः	गौणशब्दः
२१०	३४	अहिताग्निर्	आहिताग्निर्
२११	२५	इयुः	ईयुः
२१३	२३	प्रणीत याः	प्रणीतायाः
२१३	३८	पिबति	पिबति
२१४	८	दर्विहोमिको	दार्विहोमिको
२१४	१६	अर्थकलपाना	अर्थकल्पना
२१४	२९	विहितेतिकर्तव्यताद्-काधर्मान्	विहितेतिकर्तव्य-ताकाद्धर्मान्
२१६	२५	ऊजेत्वा	ऊर्जे त्वा
२१७	२९	पुराकल्प्याः	पुराकल्पः
२१८	३४	यत्	यः
२१८	३४	अनुपैत्यैतां	अनुपपत्यैतां
२२८	११	उपयुज्थ	उपयुज्य
२३४	११	भूयिष्टाम्	भूयिष्ठाम्
२३४	२४	लिङ्गादिरहिते	लिङादिरहिते
२३४	२५	१.४.९ तं.	३.४.९+५ तं.
२३५	३०	संयोगात्	संयोगात्
२३५	३५	भक्षयितव्यत्	भक्षयितव्यम्
२३५	३७	पार्वणस्थालीपाकीदीनि	पार्वणस्थालीपाकादीनि
२३६	४	आग्निं	अग्निं
२३६	५	आग्निं	अग्निं
२३६	२९	°पण्यवणो	°पण्यपणो
२३८	२	वैषहरिको	वैहारिको
२३९	१७	बहूत्वात्	बहुत्वात्
२३९	२५	आलमते	आलभते
२४०	३	स्विकृत्	स्विष्टकृत्

उक्तानुक्तचिन्ता

५ पृष्ठे ३६ पङ्क्तौ

अग्निहोत्रवेलायाम् आगन्तव्यम् । ११.३.४८ । इदमुद्धरणम् अनुपलब्धमूलम् । अतः परिशिष्टे अन्तर्भाव्यम् ।

६८ पृष्ठे १५ पङ्क्तौ

किंकृति च । इत्यस्यानन्तरं ३.४.१३ तं. इति पठितव्यम् ।

८४ पृष्ठे २ पङ्क्तौ

याजयन्ति । इत्यस्यानन्तरं १०.२.२६ इति पठितव्यम् ।

८४ पृष्ठे ३ पङ्क्तौ

तस्माद् इत्यस्य पूर्वम् – आप १०.१४.३-७, मैसं ३.६.५ इति पठितव्यम् ।

९१ पृष्ठे २० पङ्क्तौ

पृष्ठानि । इत्यस्यानन्तरं ४.४.४० इति पठितव्यम् ।

२०७ पृष्ठे ३८ पङ्क्तौ

पराभवति ॥ इत्यस्यानन्तरं ५.४.२४ शाभा इति पठितव्यम् ।